हैदराबादप्रांतस्थ-उस्मानाबादनिवासिगांधीकस्तूरचंद्रस्यात्मज-
बालचंद्रस्य स्मरणार्थं ।

श्रीपरमात्मने नमः ।

सनातनजैनग्रंथमालायाः

अष्टमाकं !

६

श्रीमदाचार्यवर्यश्रीसोमदेवसूरिविरचिता

शब्दार्णवचंद्रिका ।

(जैनेंद्रलघुवृत्तिः)

(१)

प्रकाशिका—
काशीस्थ-भारतीयजैनसिद्धांतप्रकाशिनी संस्था ।

संपादक :—
श्रीयुत पंडित श्रीलालजैन-व्याकरणशास्त्री ।

सूचना

भूमिका तथा इस व्याकरण के रचयिता **आचार्यवर्य पूज्यपाद** स्वामी और इस वृत्तिके कर्ता **सोमदेव सूरिका** परिचयतो ग्रंथसमाप्त होने पर प्रकाशित किया जायगा। इस समय केवल इतना ही सूचना देनी है कि-इंद्रचंद्रादि अष्ट व्याकरणोंमें जिस **जैनेंद्र** का नाम आया है वह यही पूज्यपाद (देवनंदि) स्वामीकृत **शब्दार्णवव्याकरण** सूत्रपाठ है। इस पर अनेक टीकायें और भाष्य है। उनमेंसे यह सोमदेव सूरिकृत **शब्दार्णवचंद्रिका** नाम की टीका है यह पूज्यपादस्वामीकृत असली सूत्रपाठ पर रची हुई है। पचवस्तु अभयनंदिकृत महावृत्ति वगैर टीकामें परिवर्तित सूत्रपाठ पर बनी हुई है। जिनका पूर्ण विवरण इसकी भूमिकासे ज्ञात होगा। यह व्याकरण पाणिनीय और जैनाचार्य श्रुतकेवलिदेशीय शाकटायनकृत प्राचीन व्याकरणसे भी अतिशय सुगम व उपयोगी है। इसकारण सर्वसाधारणको इसी व्याकरणसे शब्दज्ञानमें पूर्ण सहायता देनेकेलिये हमने इसे छपाया है। कलकत्ता संस्कृत यूनिवर्सिटीने भी इसकी **लघुप्रक्रिया** प्रथममें और इस टीका को मध्यमामें भरती कर लिया है। आशा है कि समस्त विद्यार्थी और विद्वज्जन इसका पठन पाठन कर लाभ उठावेंगे। इति शम् ॥

मंत्री।

सनातनजैनग्रंथमालाकी

नियमावली।

१. इस ग्रंथमालामें मूल संस्कृत प्राकृत तथा संस्कृतटीका सहित दिगम्बरजैनाचार्यकृत दर्शन, सिद्धांत, न्याय, अध्यात्म, व्याकरण, काव्य, साहित्य, पुराण, इतिहास, गणित, ज्योतिष वैद्यकप्रभृति सबप्रकारके प्राचीन ग्रंथ ही छपते है।

२. इस ग्रंथमालाका प्रत्येक अंक (खंड) दश फार्मसे (८० पृष्ठसे) कम नहीं होगा। और प्रत्येक खंडमें एक दो या तीनसे अधिक ग्रंथ नहिं रहेंगे।

३. इस ग्रंथमालाका मूल्य १२ अंकोंका सर्वसाधारणसे ८) रु. प्रथम ही ले लिया जायगा और नैयायिक, वेदांतिक विद्वानों और संस्कृतपुस्तकालयोंकी सेवामें यह ग्रंथमाला विना मूल्य भी भेजी जायगी। परंतु पोष्टेज खर्च प्रत्येक अंकका तीन आने वी. पी. से सबको देना होगा।

४. जो महाशय एक साथ १००) रु. भेजेंगे वे यावज्जीव स्थायी ग्राहक समझे जावेंगे अर्थात् उन्हें यह ग्रंथमाला उमर पर्यंत विना मूल्य भेजी जायगी। परंतु मार्गव्यय उनको भी जुदा देना होगा।

५. जो दानी महाशय पुस्तकालयों, मंदिरों, विद्यार्थियों वा विद्वानोंको वितरण करनेकेलिये दानी ग्राहक बनेंगे उनको १००) रु. पेशगी भेजनेसे १२ अंक तक पंद्रह २ प्रति प्रत्येक अंककी भेजी जायगी। मार्गव्यय पृथक् देना होगा। ऐसे ग्राहकोंका नाम संस्थाके प्रचारकोंमें लिखा जायगा।

मूल्य व पत्र भेजनेका पता— **पन्नालाल जैन,**

व्यवस्थापक—भारतीयजैनसिद्धांतप्रकाशिनीसंस्था।

पोष्ट—बनारस सिटी।

सनातनजैनग्रंथमाला ।

६

आचार्यवर्यश्रीसोमदेवसूरिविरचिता

शब्दार्णवचंद्रिका ।

(जैनेंद्रलघुवृत्तिः)

श्रीपूज्यपादममलं गुणनंदिदेवं सोमामरव्रतिपपूजितपादयुग्मं ।
सिद्धं समुन्नतपदं वृषभं जिनेंद्रं, सच्छब्दलक्षणमहं विनमामि वीरं ॥ १ ॥
श्रीमूलसंघजलजप्रतिबोधभानोर्मेघेंदुदीक्षितभुजंगसुधाकरस्य ।
राद्धांततोयनिधिवृद्धिकरस्य वृत्तिं, रेभे हरींदुयतये वरदीक्षिताय ॥ २ ॥
लक्ष्मीरात्यंतिकी यस्य निरवद्यावभासते ।
देवनंदितपूजेशे नमस्तस्मै स्वयंभुवे ॥ १ ॥

सिद्धिरनेकांतात् ॥ १ ॥ सिद्धिः शब्दानां निष्पत्तिर्ज्ञप्तिर्वा भवत्यनेकांतात्. अस्तित्वनास्तित्वनित्यत्वानित्यत्वविशेषणविशेष्याद्यात्मकत्वात् दृष्टप्रमाणाविरुद्धार्थशास्त्रपरिसमाप्तेरित्ययोऽधिकारो वेदितव्यः । वक्ष्यति सात्मेनादिरिति । अनेकांताधिकारे सत्येवायं तद्व्यपदेशो घटते, अन्यथा तदभावात् किं केन सह गृहीत यतः संज्ञा स्यात् । तथा--सस्थानक्रियं[1] स्वमिति---साधर्म्यवैधर्म्यात्मके सत्यनेकांतेऽकाराकारयोर्ह्रस्वदीर्घकालभेदेन वैधर्म्येऽपि तुल्यस्थानक्रियत्वेन साधर्म्यात् स्वसंज्ञाव्यवहारः सिद्धः । अधु मृदिति च भावाभावाभ्यां विभक्त्यंतेषु शब्देष्वर्थवत्ताऽनेकांतात् सिद्ध्यति । तदवयवानामपि । वृक्ष इत्यत्र विसर्जनीयस्यैकत्वार्थस्य च सद्भावः औकाराद्यभावश्चैकांते नास्ति । तथा "व्यपाये ध्रुवमपादानं" इत्येवमादिना लक्षणेन षट्कारकी सर्वथा नित्यक्षणिकयोर्नोपपद्यते व्यपायध्रौव्याद्यभावादिति । किं बहुना-ऽनिर्मापितमात्रमप्यनेकांतमंतरेण न सिद्ध्यतीत्ययोऽधिकारो निर्णेतव्यः ।

*** अइउण् १ । ऋक् २ । एओङ् ३ । ऐऔच् ४ । हयवरलण् ५ । ञमङणनम् ६ । झभञ् ७ । घढधष् ८ । जबगडदश् ९ । खफछठथचटतव् १० । कपय् ११ । शषसअंअः ≍क ≍प र् १२ । हल् १३ ।**

इति प्रत्याहाराः । लृवर्णाग्रहणं ऋवर्णलृवर्णयोरेकत्वाभ्युपगमात् । हकारस्य द्विरुपादानं वृक्षं हरत्यधुक्षदिति सिद्ध्ये ।

*** सात्मेनादिः ॥२॥** इत्संज्ञकेन सहोच्चार्यमाणः आदिवर्णस्तन्मध्यपातिनानां ग्राहको भवत्यात्मना सह । अण् । हल् । मिङ् । सुप् । सुट् ।

*** स्वस्याऽभाव्योऽन्परोऽणुदित् ॥ ३ ॥** अण उदिच्च गृह्यमाणः स्वस्य ग्राहको भवत्यात्मना सह भा-

---

१ समाना स्थाने क्रिया यस्य, समाने स्थानक्रिये वाऽस्य तत् ।

* एवं चिह्नि[illegible] [illegible] रव[illegible]-ऽभयनंदिविरचितायां वृत्तौ । १ घलोपोऽत्र ।

व्यं तपरं च वर्जयित्वा । एरिति स्वं । प्लाक्षिः । चौलिः । दैत्यः । कौमारः । उदित्– चोः कुः । ष्टुना ष्टुः । अभाव्य इति किं ?"त्यदादेरः"इत्यत्र आकारस्य ग्रहणं नास्ति भाव्यत्वात् ।

आदेशः प्रत्ययश्चैव कटमेतो हि लक्ष्मणि ।
भाव्यशब्देन पंचैते कथ्यंते देवनंदिभिः ॥

अतपर इति किं ? भिस्योऽत ऐस् । धर्मैः । दयाभिरित्यत्र ऐस् न भवति ।

संस्थानक्रियं स्वं ॥ ४ ॥ समाने स्थानक्रिये यस्य वर्णस्य स स्वसंज्ञो भवति । अ अ अ उदात्तोऽनुदात्तः स्वरितश्च ङश्चाङश्च । एवं दीर्घौ ज्ञातव्यौ । इत्यवर्णस्याष्टादश भेदाः परस्परं स्वा भवंति । तथैवर्णादीनामपि । एचां द्वादशभेदाः प्रस्याभावात् । यवला द्विधा--ङश्चाङश्च । रेफोष्मणां स्वा न संति । वर्ग्यो वर्ग्येण स्वं । लोकाग्रमित्यादि । स्थानग्रहणं किं ? कचटतपानां मा भूत् । तप्ता । क्रियाग्रहणं किं ? इचुयशानां मा भूत । अरुश्च्योतति । स्वप्रदेशाः "स्वेऽको दीः"इत्येवमादयः ।

आकालोऽच् प्रदीपः ॥ ५ ॥ अ आ आ३ इत्येवं कालोऽच् प्रदीपसंज्ञो भवति । दधि । गौरी । एहि जिनदत्त ३ । हलचां संघातनिवृत्त्यर्थमच्ग्रहणं । प्रतक्ष्य । तितउच्छत्रं । अन्यथात्र तुगतुग्विकल्पौ स्यातां । प्रदीपप्रदेशाः "प्रो नपि" इत्येवमादयः ।

अचश्च ॥ ६ ॥ अचः स्थाने प्रदीपसंज्ञका भवंति । अतिश्रि । स्तृणते । आव्रज जिनदत्ता ३ । अच इति किं ? सुवाक् कुलं । भिद्यते । धर्मवीरत् । चकारः संज्ञाविधौ नियमार्थः । द्यौः, पंथाः, यः, सः ।

नासिक्यो ङः ॥ ७ ॥ नासिकायां भवो वर्णो ङसंज्ञो भवति । अमङणनाः । शांतः दांतः । नासिक्य इति किं ? तप्तः तप्तवान् । ङप्रदेशाः "ङस्य झलक्त्व्योः क्ङिति"इत्यादयः ।

हलोऽनंतराः स्फः ॥ ८ ॥ हलोऽनंतराः अज्भिरव्यवहिताः स्फसंज्ञका भवंति । धर्म-रमौ । इन्द्रे-नद्राः । हल इति किं ? तितउः । अनंतरा इति किं? पनसं । शाकं । स्फप्रदेशाः"स्फे रुः"इत्येवमादयः।

अधु मृत् ॥ ९ ॥ धुवर्जितमर्थवच्छब्दरूपं मृत्संज्ञं भवति । डित्थः । डवित्थः । शुक्लः । अध्विति किं ? अहन् । मृत्प्रदेशाः "ङयाम्मृदः" इत्येवमादयः

कृद्धृत्साः ॥ १० ॥ कृदंतं हृदंतं ससंज्ञकं च मृत्संज्ञकं भवति । ज्ञाता । द्रष्टा । प्राजापत्यः । जिनधर्मः । नियमोऽयं त्यांतानां कृद्धृतेरेवेति । इह मा भूत्– अभवन् । अर्थवत्पदसंघातानां ससंज्ञस्यैव मृत्संज्ञा न वाक्यस्य, साधुर्धर्मं ब्रूते ।

प्रो नपि ॥११॥ नपि वर्तमानस्य मृदः प्रो भवति । अतिरि । अतिवधु कुलं । नतभ्रु मुखं । नपीति किं ? राजकुमारी ।

गोण्या मेये ॥१२॥ गोण्याः प्रो भवति मेयेऽर्थे । गोणीमात्रं गोणिः । मेय इति किं ? गोणी ।

स्त्रीगोर्नीचः ॥ १३ ॥ न्यग्भूतस्य स्त्रीत्यांतस्य गोशब्दांतस्य च मृदः प्रो भवति । अतिखट्वः । निष्कौशाम्बिः । निर्दयः । चित्रगुः । स्त्रीगोरिति किं ? अतिश्रीः । नीच इति किं ? नक्षत्रमाला । सुगौः ।

\+ **नांशीयसो बे** ॥ १४ ॥ अंशिलक्षणसविधेरीयसश्च यः स्त्रीत्यस्तदंतस्य नीचो बसे प्रो न भवति । पूर्वशाला । अर्द्धपिप्पली । बह्व्यः श्रेयस्योऽस्य स बहुश्रेयसी जिनः । बस इति किं ? निःश्रेयसिः ।

* **हृदुप्यसूचीगोण्योरुप्** ॥ १५ ॥ हृदुपि सति स्त्रीत्यस्य नीचः उप् भवति सूचीगोण्यौ विहाय । पंचेंद्राण्यो देवताः अस्य पचेंद्रः । दशभिः शष्कुलीभिः क्रीतः दशशष्कुलः । आमलक्याः अवयवः फलं

१ वर्णोत्पत्तिप्रदेशः स्थानं । अकुहविसर्जनीयजिह्वामूलीयानां कंठः । हविसर्जनीययोरुरः । कोर्जिह्वामूलीयस्य जिह्वामूलं । इ ए ऐ चुयशानां तालु । उ ओ औ पूपध्मानीयानामोष्ठौ । वस्य दंतोष्ठं । ऋटुरषाणां मूर्धा । ऌतुलसानां दंताः । नासिकानुस्वारस्य । क्रिया करणं प्रयत्नः । स्पृष्टं करणं स्पशानां । ईषत्स्पृष्टं यणां । विवृतमचां । विवृततरमेदोतोः । ऐदौतोर्विवृततमं । अवर्णस्यातिविवृततम । संवृतमकारस्य । ईषद्विवृतं शषसहानां ।

वर्गेष्वाद्या द्वितीयाश्च शषसा अघोषकाः ।
द्वितीयतुर्यवर्णाः स्युर्महाप्राणाः हसंयुताः ॥१॥

\+ एव चिह्नितसूत्राणां स्थाने कृतान्यभयनंदिविरचितमहावृत्तौ पाणिनीयवद्वार्त्तिकानि ।

आमलकं । बकुलं । बदरं । ह्रदिति किं ? गार्गीपुत्रः । उपीति किं ? गार्गी त्वं । असूचीगोण्योरिति किं ? पंचभिः सूचीभिः क्रीतः पंचसूचिः । दशगोणिः ।

आदैगैप् ॥ १६ ॥ अदैचो वर्णाः ऐप्संज्ञा भवंति । नाडायनः । रैमयं । नौमयं । ऐप्प्रदेशाः "मृजैरैप्"इत्येवमादयः ।

अदेङेप् ॥ १७ ॥ अदेङो वर्णा एप्संज्ञका भवंति । सर्ता । नेता । भोक्ता । एप्प्रदेशाः "मिदेरेप्" इत्यादयः ।

इकस्तौ ॥ १८ ॥ तावैबेपौ इक एव स्थाने स्तः । सावैम्मे-अनैपीत् । गागर्याः-नयति । इक इति किं ? आदिञ्ज्ञल्वां मा भूत् । यानं । ग्लायति । उंभिता । तौग्रहणं संज्ञाविधौ नियमार्थं । मथाः । य. ।

न धुखेऽगे ॥ १९ ॥ धोरेकदेशस्य खनिमित्तेऽगे ऐबेपौ न स्तः । लोलुवः । पोपुवः । मरीमृजः । देवः । धुखे इति किं ? लूञ्-लविता । अग इति किं ? रोरवीति । इक इति किं ? रागः ।

ग्क्ङिति ॥ २० ॥ गिति किति ङिति च परे ऐबेपौ न स्तः । भूष्णुः । जिष्णुः । मृष्टं । चितं । चिनुतः । मृष्टः ।

ईदूदेद्द्विर्दिः ॥ २१ ॥ ईदूदेदंतो यो द्विः स दिसंज्ञो भवति । मुनी इमौ । साधू एतौ । द्वे अत्र । ईदूदेदिति किं ? वृक्षाविमौ । द्विरिति किं ? बध्वर्थः । दिप्रदेशाः "देः"इत्यादयः ।

मः ॥ २२ ॥ दकारस्य स्थाने यः कृतो मकारस्तस्मात्परौ ईदूतौ दिसंज्ञौ भवतः । अमी आसते । अमू अत्र । द इति किं ? शम्यत्र । म इति किं ? तेऽत्र ।

***न्यजनाङ् ॥ २३ ॥** निसंज्ञोऽच् आङ्वर्जितो दिसंज्ञो भवति । अ अपेहि । इ इंद्रं पश्य । उ उत्तिष्ठ । नीति किं ? चकारात्र । अनाङिति किं ? आ उष्णं ओष्णं । आ इहि-एहि । आ उदकांतात्-ओदकांतात् । आ आर्येभ्यः-आर्येभ्योऽस्य यशो गतं भट्टाकलंकदेवस्य । ङित्करणं किं ? आ एवमनुमन्यसे । आ एवं किल तत् ।

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥

ओत् ॥ २४ ॥ ओदंतो निर्दिसंज्ञो भवति । अहो इदं । उताहो एवं ।

वौ वेतौ ॥ २५ ॥ विनिमित्तः ओकारः इति शब्दे परतः वा दिसंज्ञो भवति । साधो इति । साधविति । काविति । किं ? गविन्त्ययमाह । इतौ इति किं ? पटोऽत्र ।

उञः ॥ २६ ॥ उञो वा दिसंज्ञा भवति इतौ परतः । उ इति विति ।

ऊँ ॥ २७ ॥ उञः ऊँ इत्ययमादेशो भवति इतौ परतः स च दिसंज्ञो भवति । ऊँ इति ।

दाधा भ्वपित् ॥ २८ ॥ दा धा इत्येवं रूपा धवः भुसंज्ञका भवंति पितो मुक्त्वा । प्रणिदाता । प्रणिदयते । प्रणिददाति । प्रणिधाति । प्रणिधयति । विधीयते । अपिदिति किं ? दातं बर्हिः । अवदातं मुखं । भुप्रदेशाः "भुस्थोरिः"इत्येवमादयः ।

क्तक्तवतू तः ॥ २९ ॥ क्तः क्तवतुश्च तसंज्ञौ भवतः । कृतः । कृतवान् । कारितः । कारितवान् । तप्रदेशाः "ते संटि"आदयः ।

संज्ञा खुः ॥ ३० ॥ संज्ञाशब्दवाच्योऽर्थः खु संज्ञो भवति । खुप्रदेशाः "वा खोः"इत्येवमादयः ।

भावकर्म ङिः ॥ ३१ ॥ भावकर्मणी ङिसंज्ञे स्तः । ङिप्रदेशाः "ङौ" इत्येवमादयः ।

*** श्यनपमुट् धं ॥ ३२ ॥** शि अनपमुट् च धसंज्ञं भवति । कुंडानि तिष्ठंति, पश्य वा । राजा । राजानौ । राजानः । राजानं । राजानौ । श्यनपमुडिति किं ? सामनी । राज्ञः पश्य । धप्रदेशाः "धेऽकौ" इत्येवमादयः ।

+ स्यिः संख्या ॥ ३३ ॥ संख्याशब्दः स्यिसंज्ञो भवति । पंचधा । पंचकृत्वः । स्यिप्रदेशाः "स्यैर्विधार्थे धा" इत्येवमादयः ।

+ बहुगणं भेदे ॥ ३४ ॥ बहुगणशब्दौ भेदार्थे स्यिसंज्ञौ भवतः । बहुकः । गणकः । बहुधा ।

गणधा। भेद इति किं? वैपुल्ये संघे च मा भूत्। बहुः सूपः। गवां गणः।

+ कसेऽद्ध्यर्द्धं ॥३५॥ कविधौ सविधौ चाद्ध्यर्द्धशब्दः स्यिसंज्ञो भवति। अद्ध्यर्द्धेन क्रीतं अद्ध्यर्द्धकं। अद्ध्यर्द्धशूर्प्पं। कस इति किं? माभूद् धादौ।

+ डडर्द्धमाक् ॥ ३६ ॥ अर्धपूर्वो डडंतः कसविधौ स्यिसंज्ञो भवति। अर्द्धपंचमैः क्रीतं अर्द्धपंचमकं। अर्द्धपंचमशूर्प्पं।

+ वतुः ॥ ३७ ॥ वतुत्यांतः स्यिसंज्ञो भवति। इयत्कः। कियद्धा। एतावत्कृत्वः। यावत्कः। तावत्कः।

+डतिः ॥ ३८ ॥ डतिन्यांतः स्यिसंज्ञो भवति। कतिकः। यतिधा। ततिकृत्वः।

***ष्णांता चेऌ ॥ ३९ ॥** षकारनकारांता इलंता च संख्या इलसंज्ञा भवति। षट्। पंच। कति संति। अंतग्रहणमुपदेशार्थं। तेनाऽनामिति भवति। न शतानामित्यादौ। इलप्रदेशाः "उबिलः" इत्येवमादयः।

*** स्निः सर्वादिः ॥ ४० ॥** सर्वादयः शब्दाः स्निसंज्ञा भवंति। सर्वे। विश्वे। अन्ये। सर्वेषां। सर्वस्यै। सर्वस्मै। यस्मै। तस्मै। स्निप्रदेशाः "स्नेः स्मै" इत्यादयः।

+ समं सर्वयुक्ते ॥ ४१ ॥ समशब्दः सर्वयुक्तार्थेयाः स्निसंज्ञो भवति। समस्मिन्। सर्वयुक्ते इति किं? समे देशे वसति।

*** पूर्वपरावरदक्षिणोत्तरापराधराण्यखौ व्यवस्थायां ॥ ४२ ॥** पूर्वादीनि अखौ व्यवस्थायां वर्तमानानि स्निसंज्ञानि भवंति। पूर्वस्मै। परस्मै। अवरस्मै। दक्षिणेषां। उत्तरस्मै। अपरेषां। अधरस्मै। अखाविति किं? उत्तराणां कुरूणां। व्यवस्थायामिति किं? दाक्षिणाय गायकाय देहि। प्रावीण्यमत्र प्रतीयते। न तु दिग्देशकालकृतोऽवधिनियमः।

+ स्वमज्ञातिधनाख्यायां ॥ ४३ ॥ स्वमित्येतद्रूपं अज्ञातिधनाख्यायां स्निसंज्ञं भवति। यत् स्वस्मै रोचते तत् स्वस्मै ददाति। यदात्मने रोचते तदात्मीयाय ददातीत्यर्थः। अज्ञातिधनाख्यायामिति किं? स्वाय ददाति। स्वाय क्लिश्यते। ज्ञातये धनाय वेत्यर्थः। आख्याग्रहणं किं? ज्ञातिधनपर्यायस्य स्वशब्दस्य निषेधोऽन्यस्य तु मा भूत्। स्वस्मै पुत्राय। स्वस्मै गवे।

+ बहिर्योगोपसंव्यानेऽपुर्यंतरं ॥४४॥ बहिर्योगे उपसंव्याने चांतरं स्निसंज्ञं भवति पुरं विमुच्य। अंतरस्मै वनाय देहि। बहिष्टेन युक्ताय बाह्याय बाह्येनाभ्यंतरायेत्यर्थः। अंतरस्मै वस्त्राय। उपसंव्यानायोत्तरीयायोपसंवीयमानाय वा परिधानायेत्यर्थः। बहिर्योगोपसंव्याने इति किं? अस्मिन्नंतरे शीतान्युदकानि, मध्य इत्यर्थः। अपुरीति किं? अंतरायां पुरि वसति। प्राकारात् बाह्यायामभ्यंतरायां वेत्यर्थः।

*** पूर्वादिरङ् ङ्यस्योर्वा ॥ ४५ ॥** पूर्वादयो नवाकारांता ङिङस्योः परतः स्निसंज्ञा वा भवंति। पूर्वस्मिन्, पूर्वे। पूर्वस्मात्, पूर्वात्। परस्मिन्, परे। परस्मात्, परात्। अवरस्मिन्, अवरे। अवरस्मात्, अवरात्। दक्षिणस्मिन्, दक्षिणे। दक्षिणस्मात्, दक्षिणात्। उत्तरस्मिन्, उत्तरे। उत्तरस्मात्, उत्तरात्। अपरस्मिन्, अपरे। अपरस्मात्, अपरात्। अधरस्मिन्, अधरे। अधरस्मात्, अधरात्। स्वस्मिन्, स्वे। स्वस्मात्, स्वात्। अंतरस्मिन्, अंतरे। अंतरस्मात्, अंतरात्। अदिति किं? पूर्वस्यां। पूर्वस्याः। ङिङस्योराश्रयं कार्यं विकल्प्यते अक्तु भवत्येव। पूर्वकस्मिन्, पूर्वके।

*** जसि ॥ ४६ ॥** पूर्वादयो जसि स्निसंज्ञा वा भवंति। पूर्वे, पूर्वाः। परे, पराः। अवरे, अवराः। दाक्षिणे, दक्षिणाः। उत्तरे, उत्तराः। अपरे, अपराः। अधरे, अधराः। स्वे, स्वाः। अंतरे, अंतराः।

प्रथमचरमतयाल्पार्द्धकतिपयनेमाः ॥४७॥ प्रथमादयो जसि वा स्निसंज्ञा भवंति। प्रथमे, प्रथमाः। चरमे, चरमाः। द्वितये, द्वितयाः। द्वये, द्वयाः। अल्पे, अल्पाः। अर्द्धे, अर्द्धाः। कतिपये, कतिपयाः। नेमे, नेमाः।

*स्निर्द्वंद्वे ॥ ४८ ॥ द्वंद्वे से सर्वादिर्वा जसि स्निसंज्ञो भवति । कतरकतमे । कतरकतमाः । इतरान्यतरे । इतरान्यतराः ।

*न ॥ ४९ ॥ सर्वादिर्द्वंद्वे से स्निसंज्ञो न भवति । कतरकतमाय । पूर्वपरात् । कतरकतमानां ।

*बसे ॥ ५० ॥ सर्वादिर्बसे स्निसंज्ञो न भवति । प्रियसर्वाय । द्व्यन्याय । त्र्यन्यात् । बग्रहणं किं ? परमसर्वस्मै । सग्रहणं किं ? आतिदेशिके बे निषेधो मा भूत् । एकैकस्मै देहि ।

भासे ॥ ५१ ॥ भालक्षणे से सर्वादिः स्निसंज्ञो न भवति । मासपूर्वाय । संवत्सरावराय । से वर्तमाने पुनः सग्रहण भासार्थे वाक्येऽपि निषेधार्थं । मासेन पूर्वाय ।

*वा दिग्बे ॥ ५२ ॥ दिग्लक्षणे बसे सर्वादिर्वा स्निसंज्ञा भवति । दक्षिणपूर्वस्यै । दक्षिणपूर्वायै । उत्तरपूर्वासां । उत्तरपूर्वाणां ।

*तीयो ङिति ॥ ५३ ॥ तीयत्यांतो ङिति स्निसंज्ञो वा भवति । द्वितीयस्मै । द्वितीयाय । तृतीयस्यै । तृतीयायै । ङितीति किं ? द्वितीयानां ।

*तास्था ऽन्तेऽलः ॥ ५४ ॥ तांतस्य स्थाने विधिरुच्यमानोऽन्ते वर्तमानस्यालः स्थाने भवति । त्यदादेरः–स्यः । स्थानग्रहणं स्वस्वाम्यादिनिरासार्थं । अंत इत्यादिमध्यनिवृत्यर्थं । अल् सर्वादेशनिवृत्यर्थं ।

ङित् ॥ ५५ ॥ ङिदादेशोऽन्ते वर्तमानस्यालः स्थाने भवति । युष्मदस्मदोऽकङ् वाऽञ्खञौ–यौष्माकीणः । आस्माकीनः । नियमोऽयं–ङिदेवानेकाल् अंतस्य स्थानेऽनोऽन्यः तानिर्दिष्टस्य सर्वस्य स्थाने भवति । ब्रूञो वच्-वक्ता ।

*स्वासन्नः ॥ ५६ ॥ इह स्वासन्नस्यास्वासन्नस्य प्रसंगे स्थानार्थगुणप्रमाणैर्यथास्वमासन्न एव विधिर्भवति । स्थानतः– दंडाग्रं । साधूदितं । अर्थतः– वतंडी चासौ युवतिश्च वातंडययुवतिः । गुणतः– पाकः । त्यागः । प्रमाणतः– अमुष्मै । अमूभ्याम् ॥ त्रिना स्तोतेत्यत्र स्थानानुवृत्तेर्न प्रमाणतोऽकारः । सुष्ट्वासन्न इति किं ? वाग्घसति ।

+युजां योगे ॥ ५७ ॥ युजां संबंधिनां यो विधिः स योगे संबंध एव भवति । श्वशुराद्यः—श्वशुर्यः । श्वशुर इति कस्यचिन्नाम तस्मात् श्वशुरस्यापत्यं "अत इञ्" एव । श्वाशुरिः ।

रंतोऽणुः ॥ ५८ ॥ ऋवर्णस्य स्थाने अण् शिष्यमाणः रपरो भवति । किरति । पितुः । अणिति किं ? मातापितरौ । उरिति किं ? गेयं ।

परस्यादेः ॥ ५९ ॥ कानिर्देशेन परस्य कार्यं शिष्यमाणं तस्यादेरलः स्थाने भवति । द्व्यंतर्गेरीदपोनात्–द्वीपः । ईदासः–आसीनोऽधीते ।

शित्सर्वस्य ॥६०॥ शिदादेशः सर्वस्य स्थाने भवति । जसः शी-के । जस्शसोः शिः- धनानि संति ।

टिदादिः ॥ ६१ ॥ टिद्यः आगमः स तानिर्दिष्टस्यादिर्भवति । वल्योर्दीरिट्–भविता ।

किदंतः ॥ ६२ ॥ किद्यः आगमः स तानिर्दिष्टस्यांतो भवति । पिति कृति तुक्–धर्मवित् ।

परोऽचो मित् ॥ ६३ ॥ मिद्यः आगमः स तानिर्दिष्टस्याचोऽत्यात् परो भवति । इदितोर्नुम्- वंदे वृषभश्वरं ।

*स्पर्द्धे ॥ ६४ ॥ द्वयोरन्यार्थयोस्तुल्यबलयोरेकत्र प्राप्तो यः संघर्षः स स्पर्द्धस्तस्मिन् पर कार्यं भवति । सुपि दोः–देवाभ्यां । बहौ झल्येत्–देवेषु । देवेभ्यः–इत्यत्र द्वितयं प्राप्तं परमेत्वमेव ।

*स्थानीवानल्विधौ ॥ ६५ ॥ स्थानीव भवत्यादेशः । धुगुकृद्धृत्सुप्मिङ्पदादेशाः ध्वादिवद्भवंति, अस्तेर्भूः-भविता । तृच् सिद्धः । गुवद् ग्वादेशः । त्रयाणां । गोर्दीत्वं । कृद्वत्कृदादेशः । प्रहत्य । कृत्त्वात्तुक् । हृद्वद् हृदादेशः । आक्षिकः । मृत्संज्ञा । सुब्वत् सुबादेशः । धर्माय । सुपि दीत्वं । मिङ्वन्मिङादेशः । बभूवतुः । मिङ्त्वात्पदं । गवद्गादेशः । अचिनुतं । ङित्वादेप्निषेधः । पदवत्पदादेशः

धर्म्मो वो बर्द्धतां। पदत्वाद्वित्वं। अनाल्विधाविति किं? अलः स्थाने विधौ—पंथाः। सः। पथित्यदादेशौ सुखे कर्तव्ये स्थानीव न भवतः। कः इष्टः।

* **परेऽचः प्राचः ॥ ६६ ॥** परनिमित्तकोऽजादेशः पूर्वविधौ कर्तव्ये स्थानीव भवति। पटुमाचष्टे पटयति। कथयति। अवधीत्। पर इति किं? वैयाघ्रपद्यः। पादस्य खं पद्भावे क्रियमाणे न स्थानीव भवति। अच इति किं? अभिमत्य। ङखं तुकि (तुगागमे) न स्थानीव भवति। प्राच इति किं? नैधेयः। द्व्यज्लक्षणे ढणि क्रियमाणे आत्खं न स्थानीव भवति।

* **न द्विपदांतवरेयखकिञ्यम्कादेः ॥ ६७ ॥** द्वित्व पदांत वर ई यख कि ञि अम् इत्येषां कु आदि-शब्दोक्त-दी-अनुस्वार-चर्त्व-परस्वत्व इत्येषां च विधौ कर्तव्ये अजादेशः स्थानीव न भवति। दध्यत्र। धस्य द्वित्वे कर्तव्ये यणादेशः स्थानिवन्न भवति। नियंति। वियंति। यणि कर्तव्ये श्नसः खं स्थानिवन्न भवति। यायावरः। पश्चात् इटि चात्वमित्यातः खे कर्तव्ये यङोऽतः खमगनिमित्तं वरविधौ न स्थानीव भवति। बदर्याः फलं बदरं। ङ्यामित्यखे खीत्यस्याप् न स्थानीव भवति। कंडूतिः। यखे कर्तव्ये अतःखं क्तिचनिमित्तं न स्थानीव भवति। देवयतेर्द्यूः। ऊठि कर्तव्ये क्विनिमित्तं णिखं न स्थानीव भवति। अशामि। शामं शामं। णिजंतात् ञौ अमि च परतो दीत्वे कर्तव्ये णिग्खं न स्थानीव भवति। पाक्। विच्निमित्तं णिखं कुत्वे कर्तव्ये न स्थानीव भवति। प्रतिदीव्ना। दीत्वे कर्तव्ये अनोखं न स्थानीव भवति। शिषंति। नकारस्यानुस्वारे कर्तव्येऽखं न स्थानीव भवति। जक्षतुः। जक्षुः। उङ्खं चर्त्वे कर्तव्ये न स्थानीव भवति। पिण्ढि। शिण्ढि। अनुस्वारस्य परस्वत्वे कर्तव्येऽत्खं न स्थानीव भवति।

द्वित्वेऽचि ॥ ६८ ॥ द्वित्वनिमित्तेऽच्यजादेशः द्वित्वे कर्तव्ये स्थानिवद्भवति। ण्युङात्खयणयाद्यादेशाः प्रयोजनं। आटिटत्। जग्मतुः। पपुः। ण्युङात्खस्य स्थानिवत्त्वादेकाचो द्वित्वं। चक्रुः। निनयिथ। निनाय। लुलविथ। लुलाव। यणयाद्यादेशानां स्थानिवत्त्वात् क्रुनेलोलौ द्वित्वं। द्वित्वनिमित्त इति किं? सुस्यूषति। नायमूठ् द्वित्वनिमित्तं। अचीति किं? जेघ्रीयते। यङि परत ईखं न स्थानिवत्।

* **ईप्केत्यासन्नप्राक्परयोः ॥ ६९ ॥** इतिरर्थपरः। ईबर्थः कार्यश्च यत्र निर्दिश्यते तत्र यथाक्रमं पूर्वस्य परस्यासन्नस्य कार्यं भवति। अचीको यण्—दध्योदनं। थादत्— दधाति। आसन्नग्रहणं किं? धर्मविदत्र। चिकीर्षति।

नाशः खं ॥ ७० ॥ नाशशब्दवाच्योऽर्थः खसंज्ञो भवति। रूढिः। "ढो ढि खं" इत्यादयः प्रदेशाः।

उबुजुश् ॥ ७१ ॥ तस्यैव नाशस्य उप् उच् उश् इत्येताः संज्ञाः भवंति। स्तौति। जुहोति। पंचालाः। उबुजुश् प्रदेशाः "ह्रुदादेरुजुप्" "जनपद उश्" इत्यादयः।

त्यखे त्याश्रयं ॥ ७२ ॥ त्यखे कृतेऽपि त्याश्रितं कार्यं भवति। सुम्मिङ्णिग्वानि प्रयोजनं। सर्ववित्। सोः खेऽपि पदसंज्ञा। अधोक्।"हल्ङयाब्भ्यः सुसिप्त्यनच्" इति तिपः खेऽपि पदसंज्ञायामेघबन्धभष्टचर्त्वानि स्युः। अग्निचित्। क्विपः खेऽपि तुक्। पापचीति। यङः खेऽपि द्वित्वादि कार्यं। भाव्यते। णेः खेऽप्यैव् भवति।

नोमता गोः ॥ ७३ ॥ उबुजुशामुरस्यास्तीति उमान्। तेन लुप्ते त्ये गोस्त्याश्रयं कार्यं न भवति। मृष्टः। जुहुतः। शवाश्रयावैब्गौ न भवतः। गोरिति किं? परीपृच्छीति। यङाश्रयौ द्वित्वयणिकौ स्तः।

\+ **रेऽहः ॥ ७४ ॥** रेफे कर्तव्येऽह्नः उमता वचनेन त्यखे त्याश्रयं कार्यं न भवति। अहर्ददाति।

\+ **वृत्त्यंतस्य ॥ ७५ ॥** समासांतस्य उमता त्यखे त्याश्रयं कार्यं नास्ति। सुवाचौ। परमगिरौ। त्याश्रये हि पदत्वे कुत्वादिः प्रसज्येत। वृत्तिग्रहणं किं? तव शर्म। अंतग्रहणं किं? वाक्त्वक्स्रुचः।

*** ट्यंत्याद्यचः ॥ ७६ ॥** अचां मध्ये योंऽत्यो-ऽच् तदादि शब्दरूपं टिसंज्ञं भवति । धर्मविद्–अत्रेन्छब्दः । तत्त्वमुद्–अत्रान्छब्दः । आताम्–आम्शब्दः । टिप्रदेशाः "टिद्टेरेः" इत्यादयः ।

उपांत्यालुङ् ॥ ७७ ॥ अलामंतस्य समीपोऽल् उङ्संज्ञो भवति । पच्–इत्यकारः । पाचकः । भिद्–इतीकारः । भेत्ता । व्यवहितांत्यनिवृत्त्यर्थमुपांत्यग्रहणं । उङ्प्रदेशाः "उङोऽतः" इत्यादयः ।

येनाल्विधिस्तदंताद्योः ॥ ७८ ॥ येनाचा हला वा यो विधिर्विधीयते स तदंतस्य अलि च यो विधिः स तदादौ भवति । योऽचोऽय्वास्वुः । सरोर्हलः । जेयं । शिक्षा । हल्स्नुधभ्रुवोऽर्चीयुव्योः । चिक्षियतुः । चिक्षियुः ।

+ न सत्येऽनुगिति ॥ ७९ ॥ सविधौ त्यविधौ च तदंतविधिर्नास्ति उगित्कार्यं विहाय । कष्टं परमश्रितः । इस्रो न भवति । सौत्रनाडि । नडादेः फण न भवति । अनुगितीति किं ? भवती । अतिभवती ।

+ यस्यस्तदादेः ॥ ८० ॥ यस्मात् प्रकृतिविशेषात् यस्त्यो विधीयते स तदादेः समुदायस्य भवति । मातृभोगीणः । समुदायस्य सुबंतत्वेनैकपदत्वात् णत्वं । पुत्रकाम्यति । स्वेपः काम्यो नाधिकारान्न भवति । महांतं पुत्रमिच्छति ।

+ स्त्री न्यङ् ॥ ८१ ॥ यस्मात् स्त्रीत्यस्तदादेर्न्यङ् अप्रधानमेव भवति । अतिकारीषगंध्यबंधुः । बंधौ परे ष्यस्य प्रधानभूत ईङ् न भवति । न्यङिति किं ? परमकारीषगंधीबंधुः ।

+ कृत् सतिकारकस्यापि ॥ ८२ ॥ कृत्संज्ञस्त्यः सतिसंज्ञस्यापि सकारकस्यापि तदादेः समुदायस्य ग्राहको भवति । अपिशब्दात् केवलस्यापि । उदके विशीर्णं । अवतप्तेनकुलस्थितं । भस्मनिहुतं ।

*** यस्याच्वाद्यैब्दुः ॥ ८३ ॥** यस्य शब्दस्याचां मध्ये आद्यच् ऐप् स दुसंज्ञो भवति । शालीयः । एतिकायनीयः । औपगवीयः । अच्विति हलामविवक्षार्थं । आदिग्रहणं किं ? सभासंनयने जातः सभासंनयनः । ऐबिति किं ? दत्तस्यायं दात्तः । दुप्रदेशाः "दोश्छः" इत्यादयः ।

+ देश एवैङ् शैषिके ॥ ८४ ॥ यस्य शब्दस्य देशे एव वर्त्तमानस्य अचामाद्यच् एङ् स दुसंज्ञो भवति शैषिके त्ये कर्तव्ये । सैपुरिकी । सैपुरीका । ठञ्ञिठौ । भोजकटीयः । देशे किं ? दैवनंदिनं ।

*** प्राग्देशे ॥ ८५ ॥** पूर्वदेशे वर्तमानस्य यस्य शब्दस्याचामाद्यच् एङ् स दुसंज्ञो भवति शैषिके त्ये कर्तव्ये । एणीपचनीयः । गोनर्दीयः ।

त्यदादिः ॥ ८६ ॥ त्यदादयो दुसंज्ञकाः भवंति । त्यदीयं । तदीयं । किमीयं ।

*** वा खोः ॥ ८७ ॥** खोर्वा दुसंज्ञा स्यात् । देवनंदीयं । दैवनंदिनं । पद्मनंदीयं । पाद्मनंदिनं ।

*** तत्तस्सात्त्राशस्कृत्वस्सुज्वद्धाम्क्त्वामृतुम्सुम्मिङाभत्यन्यक्स्वारादयो झिः ॥८८॥** तत् तस् सात् त्रा शस् कृत्वस् सुच् वत् धा आम् क्त्वा अम् तुम् इत्येतदंताः सुम्मिङ्प्रतिरूपाः तिसंज्ञाः अन्यंचः प्रधानभूताः स्वरादयश्च झिसंज्ञका भवंति । तदिति प्रत्याहारः । "कायास्तासिः" इत्यारभ्य आ "एधात्" तकारेण । तत्–द्वेधा । तस्–पीलुमूलतः । सात्–भस्मसात् । त्रा–राजत्रा वसति । शस्–बहुशः । कृत्वस्–शतकृत्वः । सुच्–द्विः, त्रिः । वत्–मुनिवत् वृत्तं । धा-बहुधा । आम्-ईहांचक्रे । किंतमां । किंतरां । क्त्वा–कृत्वा । अम्–भोजं भोजं । स्वादुंकारं । तुम्–कर्तुं । सुम्मिङाभ–रात्रौ । मात्रायां । अस्ति । स्वस्ति । ति–अदःकृत्य । अन्यक्स्वरादि–स्वः तिष्ठति । स्वः पश्यति । परमोच्चैः । अन्यगिति किं ? अत्युच्चैसौ । अत्युच्चैसः । झिप्रदेशाः "झेः" इत्यादयः ।

*** गाङ्कुटामञ्णि ङिद्वत् ॥ ८९ ॥** गाङः कुटादीनां च अञ्णिति त्ये परतः ङितीव कार्यं भवति । अध्यगीष्ट । अध्यगीषातां । कुटिता । कुटितुं । कुटितव्यं । कुटित्वा । पुटिता । पुटितुं । पुटितव्यं । पुटित्वा । "अञ्णि" इति किं ? उत्कोटकः । उत्कोटः । उत्कोटयति ।

*** इटि विजः ॥ ९० ॥** विजेरिडादौ त्ये ङिद्वत् भवति । उद्विजिता । उद्विजितव्यं । इटीति किं ? उद्वेगः ।

वोर्णोः ॥ ९१ ॥ ऊर्णोरिडादौ त्ये ङिद्वद् वा स्यात् । प्रोर्णविता । प्रोर्णुविता ।

***गेऽपि** ॥ ९२ ॥ पिद्वर्जिते गे ङिद्वद् भवति । जाग्रति । मृजंति । ग इति किं ? जागरिता । मार्ष्टा । अपीति किं ? जागर्ति । मार्ष्टि ।

***लिटींध्यस्फात् किद्वत्** ॥ ९३ ॥ इंधेरन्यस्माच्च धोरस्फांतात् अपिति लिटि किद्वद् भवति । समीधे । समिधाते । निन्यतुः । निन्युः । ममृजतुः । ममृजुः । लिटीति किं ? इंधिता । नेता । अस्फादिति किं ? दध्वंसे । कित्करणं किं ? ईजतुः । ऊजुः ।

+स्वंजेर्वा ॥ ९४ ॥ स्वंजेर्लिटि किद्वत् कार्यं वा स्यात् । परिषस्वजे । परिषस्वंजे ।

मृड्मृद्गुध्कुष्वद्वसः क्त्वि ॥ ९५ ॥ मृडादीनां क्त्वात्ये परतः किद्वद् कार्यं भवति । मृडित्वा । मृदित्वा । गुधित्वा । कुषित्वा । उदित्वा । उषित्वा । नियमार्थोऽयं योगः । एषामेव सेट्क्त्वात्ये किद्वत् । देवित्वा । सेवित्वा । वर्तित्वा । वर्द्धित्वा ।

क्लिशः ॥ ९६ ॥ क्लिशः क्त्वि किद्वद् भवति । क्लिशित्वा ।

*** रुद्विद्मुषग्रहस्वप्प्रच्छां सनि च** ॥९७॥ रुदादीनां सनि क्त्वि च परे किद्वद् स्यात् । रुरुदिषति । रुदित्वा । विविदिषति । विदित्वा । मुमुषिषति । मुषित्वा । जिघृक्षति । गृहीत्वा । सुषुप्सति । सुप्त्वा । पिपृच्छिषति । पृष्ट्वा ।

***सीकः** ॥ ९८ ॥ इगंतस्य धोः सकारादौ सनि परतः किद्वद् भवति । चिचीषति । रुरूषति । तितीर्षति । सीति किं ? शिशयिषते । इक इति किं ? पिपासति ।

***हलि** ॥ ९९ ॥ सकारादौ सनि यो हल् तस्मिन् परे य इक् तस्य किद्वद् भवति । बिभित्सति । बुभुत्सते । विवृत्सति । इक इति किं ? विवप्सति ।

***सिलौ दे** ॥ १०० ॥ सकारादौ दपरे सित्ये लिङि च यो हल् तस्मिन् परे य इक् तस्य किद्वद् भवति । अभित्त । अबुद्ध । भित्सीष्ट । भुत्सीष्ट । सिलाविति किं ? भेत्स्यते । द इति किं ? अद्राक्षीत् । हलीति किं ? अचेष्ट ।

उः ॥ १०१ ॥ ऋवर्णांतस्य धोः सिलौ दे परे किद्वद् भवति । अहृत । आस्तीर्ष्ट । हृषीष्ट । आस्तीर्षीष्ट ।

गमो वा ॥ १०२ ॥ गमेः सादौ सिलौ दे वा किद्वद् भवति । समगत । समगंस्त । संगसीष्ट । संगंसीष्ट ।

***यमः सौ स्वीकृतौ** ॥ १०३ ॥ यमेः स्वाकृतौ दारपरिग्रहे सादौ सित्ये दे वा किद्वद् स्यात् । उपायंस्त भार्यां । साविति किं ? उपायंसीष्ट । स्वीकृताविति किं ? आयंस्त पादौ ।

***सूचने** ॥ १०४ ॥ यमेः सूचने प्रकाशने सादौ सौ दे किद्वद् कार्यं भवति । उदायत । उदायसातां ।

***घ्नः** ॥१०५॥ हंतेः सादौ दे परे सौ किद्वद् भवति । आहत । आहसातां । आहसत ।

मुस्थोरिः ॥ १०६ ॥ भुसंज्ञकानां तिष्ठतेश्च सादौ सौ दे इत्त्वं भवति किद्वच्च । अदित । अधित । प्रास्थित । मुस्थोरिति कि ? व्यस्यदास्त ।

***सेट्ते पूङ्शीङ्डीङ्स्विन्मिद्क्ष्विद्धृषो न**१०७ पूङादीनां सेटि तसंज्ञे परे किद्वद् कार्यं न भवति । पवितः । पवितवान् । शयितः । शयितवान् । डयितः । डयितवान् । प्रस्वेदितः । प्रस्वेदितवान् । प्रमेदितः । प्रमेदितवान् । प्रक्ष्वेदितः । प्रक्ष्वेदितवान् । प्रधर्षितः । प्रधर्षितवान् । सेड्ग्रहणं किं ? पूतः । पूतवान् । मिन्नः । मिन्नवान् ।

मृषः स्वार्थे ॥ १०८ ॥ मृषः स्वार्थे तितिक्षायां सेट्ते किद्वद् कार्यं न भवति । मर्षितः । स्वार्थे इति किं ? अपमृषितं वाक्यमाह ।

वोदुङो भावारंभे शपः ॥ १०९ ॥ उदुङो धोः शपविकरणात् भावे आरंभे च सेट्ते किद्वद् कार्यं वा न भवति । द्युतितं । द्योतितमनेन प्रद्युतितः । प्रद्योतितः । "उदुङः" इति किं? विदितमनेन । प्रविदितः । भावारंभ इति किं ? रुचितः कार्षापणः । शप इति किं ? गुधितमनेन । प्रगुधितः ।

*** नोड्थफवंचिलुंच्यृतितृषमृषकृशः क्त्वि** ॥ ११० ॥ नकारोङः थकारफकारयोः ध्वोः वंच्या-

दीनां च मेटि क्त्वाल्ये किद्वद् वा भवति । ग्रथित्वा । ग्रंथित्वा । श्रथित्वा । श्रंथित्वा । गुफित्वा । गुंफित्वा । वचित्वा । वंचित्वा । लुचित्वा । लुंचित्वा । ऋतित्वा । अर्तित्वा । तृपित्वा । तर्पित्वा । मृषित्वा । मर्षित्वा । कृशित्वा । कर्शित्वा । नोङ्ग्रहणं किं ? कोथित्वा । गोफित्वा । थफग्रहणं किं? ध्वंसित्वा । क्त्वानि किं? ग्रथितः ।

***व्युङोऽवो हलः सनक्त्वोः ॥ १११ ॥** उकारिकारोङोः धोरवकारांतस्य हलादेः सेटि सनि क्त्वात्ये च किद्वद् वा स्यात् । दिद्युतिषते । दिद्योतिषते । द्युतित्वा । द्योतित्वा । लिलिखिषति । लिलेखिषति । लिखित्वा । लेखित्वा । व्युङ इति किं ? विवर्तिषते । वर्तित्वा । अव इति किं ? सिसेविषते । सेवित्वा । हलादेरिति किं ? एषिषिषति । एषित्वा । सेटीति किं ? बुभुक्षते । भुक्त्वा ।

युक्तवदुशि लिंगसंख्ये ॥ ११२ ॥ उशर्थे युक्त इव लिंगसंख्ये भवतः । प्रत्ययार्थेन युक्तत्वात् प्रकृत्यर्थो युक्त इत्युच्यते । पंचालानां निवासो जनपदः पंचालाः । अंगाः । वंगाः । कलिंगाः । कुरवः । उशीति किं ? आमलक्याः फलं । लिंगसंख्ये इति किं ? बदर्या अदूरभवो बदरी ग्रामः । तस्य वनं बदरीवनं ।

+योरेव बहोः । ११३ । से लुभूतस्यैव बहुविषयस्य युक्तवदुशि लिंगसंख्ये स्तः । मथुराश्च पंचालाश्च मथुरापंचालाः । योरेवेति किं ? पंचालमथुरं । बहोरिति किं ? गोदमथुराः ।

×जंबूखलतिकादिषु ते ॥११४॥ जंब्वादिषु खलतिकादिषु च यथासंख्यं ते लिंगसंख्ये युक्तवदुशि भवतः । जम्ब्वा अवयवो जंबूः । जम्ब्वौ । जंब्वः फलानि । द्राक्षाः फलानि । मल्लिकाः पुष्पाणि । खलतिकस्य पर्वतस्यादूरभवानि खलतिकं वनानि ।

+गुणानामजातेः ॥११५॥ गुणानां विशेषणवाचिनां जातेरन्यस्य विशेष्यस्य लिंगसंख्ये स्तः । गुणश्चतुर्धा । मृदुक्लृत्प्तुत्सभेदात् । शुक्लं वस्त्रं । शुक्लः पटः । शुक्ला शाटी । कृतं वस्त्रं । कृतः पटः । कृता शाटी । माथुरं कुलं । माथुरः पुमान् । माथुरी स्त्री । निर्मथुरं कुलं । निर्मथुरः पुमान् । निर्मथुरी स्त्री । गुणानामिति किं ? बदरी वृक्षः । "अजातेः" इति किं ? पंचालाः जनपदः ।

×न नृशि ॥११६॥ नरि मनुष्येऽर्थे उशि गुणानां लिंगसंख्ये न स्तः । चंचेव मनुष्याः चंचाः अभिरूपाः । नृग्रहणं किं ? पंचालाः रमणीयाः । बहुन्नाः । बह्वध्यापकाः । बहुक्षीरघृताः । बहुमाल्यफलाः । उशीति किं ? पटवी नारी ।

इति जैनेन्द्रव्याकरणे शब्दार्णवचंद्रिकायां प्रथमस्याध्यायस्य प्रथमः पादः ।

प्रथमाध्याये द्वितीयः पादः ।

भूवादयो धुः ॥१॥ भू इत्येवमादयः शब्दाः धुसंज्ञा भवन्ति । भू एधे स्पर्द्धे गाधृ । भवति । एधते । स्पर्द्धते । गाधते । धुप्रदेशाः "धोर्लङ्" इत्येवमादयः ।

अकर्मको धिः ॥ २ ॥ अकर्मको यो धुः स धिसंज्ञो भवति । अविद्यमानकर्मकोऽविवक्षितकर्मकोऽप्यकर्मकः । धिप्रदेशाः "धेः" इत्येवमादयः ।

अप्रयोगीत् ॥ ३ ॥ शास्त्रे कार्यार्थमुपदिश्यमानो वर्णः प्रयोगे न श्रूयते यः स इत्संज्ञो भवति । अण–अञ् हल्–भिदिर्–डु–णचर्–अञ्‌ः । इत्प्रदेशाः "सामिताद्विः" इत्येवमादयः ।

यथासंख्यं समाः ॥ ४ ॥ समाः शिष्यमाणाः यथासंख्यं भवन्ति । मिप्प्रथमसमत्मोऽनंता । प्रथमसंख्यस्य मिपः प्रथमसंख्योऽमित्यादि ।

स्वरितेनाधिकारः ॥ ५ ॥ स्वरितेनाचार्यप्रतिज्ञया अधिकारो वेदितव्यः । "ङ्याः" "परः" इत्यादि ।

***ङेदितो दः ॥ ६ ॥** ङकारित: ऐकारितश्च धोर्दो भवति । शीङ्–शेते । इङ्–अधीते । एधे–एधते । आसि–आस्ते ।

ङौ ॥ ७ ॥ ङावर्थे दो भवति । भूयते भवता । आस्यते भवता । क्रियते कटः । ह्रियते भारः ।

१ भूवादीनां वकारोऽयं लक्षणार्थः प्रयुज्यते ।
व्यवधानमिको यो भवोयुदस्योगिव ॥ १ ॥
भुवो वार्थं वदन्तीति वादयोऽर्थे इति ।
भूवादय इति ज्ञेया भुवोऽर्था वादयोऽथवा ॥ २ ॥

कर्त्तरि ञे ॥ ८ ॥ कर्त्तरि कारके अर्थे दो भवति । व्यतिभवंते । व्यतिलुनते । व्यतिपचंते ।

+हृवहः ॥ ९ ॥ हृवहिभ्यां कर्तरि ञे दो भवति । संप्रहरंते राजानः । व्यतिवहंते नद्यः ।

*** न गतिहिंसाशब्दे** ॥१०॥ गतौ हिंसायां शब्दे चार्थे वर्तमानाद्धोः कर्तरि ञे दो न भवति । व्यतिगच्छंति । व्यतिधावंति । व्यतिहिंसंति । व्यतिघ्नंति । व्यतिशब्दयंति । व्यतिजल्पंति ।

परस्परान्योऽन्येतरेतरे ॥ ११ ॥ एतैर्योगे अर्थे दो न भवति । परस्परस्य व्यतिलुनंति । अन्योऽन्यस्य व्यतिपुनंति । इतरेतरस्य व्यतिभवंति ।

+गेर्वोह्यसोः ॥ १२ ॥ गेः पराभ्यां ऊहसिभ्यां दो वा स्यात् । समूहति । समूहते । निरस्यति । निरस्यते । गेरिति किं ? ऊहते । अस्यति ।

निविशः ॥ १३ ॥ निपूर्वाद्विशेर्दो भवति । निविशते । निविशाते । निविशंते ।

परिव्यवक्रियः ॥ १४ ॥ पर्यादिभ्यः क्रीणातेर्दो भवति । परिक्रीणीते । विक्रीणीते । अवक्रीणीते ।

***विपरो जेः** ॥ १५ ॥ विपराभ्यां जयतेर्दो भवति । विजयते । पराजयते ।

क्रीडोऽनुपर्याङः ॥ १६ ॥ अन्वादेः क्रीडेर्दो भवति । अनुक्रीडते । परिक्रीडते । आक्रीडते ।

समोऽकूजे ॥ १७ ॥ संपूर्वात् क्रीडेर्दो भवत्यकूजेऽर्थे । संक्रीडते । अकूज इति किं ? संक्रीडंति शकटानि ।

***क्ष्णोः** ॥ १८ ॥ क्ष्णोतेर्दो भवति । संक्ष्णुते । संक्ष्णुवाते । संक्ष्णुवते शस्त्रं ।

***गिरादोमि** ॥ १९ ॥ समः गिरतेर्दो भवत्योमि प्रतिज्ञाने । संगिरते सर्वज्ञं । ओमीति किं ? संगिरति ग्रासं ।

***स्थः** ॥ २० ॥ तिष्ठतेरोमि दो भवति । सर्वमनेकांतात्मकमातिष्ठते ।

***संव्यवप्रात्** ॥ २१ ॥ समादिपूर्वात् तिष्ठतेर्दो भवति । संतिष्ठते । वितिष्ठते । अवतिष्ठते । प्रतिष्ठते ।

ज्ञीप्सास्थेयोक्तौ ॥ २२ ॥ ज्ञीप्सायां परपरितोपार्थमात्मरूपादिप्रकाशने स्थेयोक्तौ च संशय्य विवादं कृत्वा वा निश्चयकरणे स्थो दो भवति । तिष्ठते कन्या छात्रेभ्यः । त्वयि तिष्ठते । मयि तिष्ठते निर्णयः ।

उद ईहे ॥ २३ ॥ उत्पूर्वात् स्थो दो भवति ईहेऽर्थे । धर्मे उत्तिष्ठते । ईह इति किं ? आसनादुत्तिष्ठति ।

***मंत्रेणोपात्** ॥२४॥ उपात् स्थो दो भवति मंत्रेण करणभूतेन चेत् सोपस्थितिः । जगत्या उपतिष्ठते । तृष्टुभा उपतिष्ठते । मंत्रेणेति किं ? भर्त्तारमुपतिष्ठति भार्या यौवनेन ।

+देवार्चासंगममैत्रीपथिषु ॥२५॥ उपात् स्थो दो भवति देवार्चादिषु । अजितनाथमुपतिष्ठते । यमुना गंगामुपतिष्ठते । महामात्रानुपतिष्ठते । अयं पंथाः स्रुघ्नमुपतिष्ठते ।

+वा लिप्सौ ॥ २६ ॥ उपात् स्थो लिप्सावर्थे दो वा भवति । भिक्षुर्दातृकुलमुपतिष्ठते,उपतिष्ठति वा ।

धेः ॥ २७ ॥ उपात् स्थो धेर्दो भवति । ज्ञानं ज्ञेयमुपतिष्ठते । धेरिति किं ? स्वामिनमुपतिष्ठति ।

समो गमृच्छिप्रच्छिस्वृच्छिश्रुविदृदृशः॥२८॥ संपूर्वेभ्यो गमादिभ्यो धिभ्यो दो भवति । संगच्छते । संपृच्छते । संस्वरते । समियृते । समरिष्यते । समृच्छते । संश्रृणुते । संवित्ते । संपश्यते । धेरिति किं ? संगच्छति ग्रामं । संपश्यति देवं । संवेत्ति धर्मं ।

निसंव्युपाङ्ध्वः ॥ २९ ॥ न्यादिभ्यो ह्वयतेर्दो भवति । पुत्रं निह्वयते । संह्वयते । विह्वयते । उपह्वयते ।

आङः स्पर्द्धे॥३०॥ आङ्पूर्वाद् ह्वो दो भवति स्पर्द्धेऽर्थे । मल्लो मल्लमाह्वयते । स्पर्द्धे इति किं ? गामाह्वयति गोधुक् ।

+गमेः प्रतीक्षे ॥ ३१ ॥ गमेर्ण्यंतादाङ्पूर्वाद्दो भवति प्रतीक्षे कालहरणे । आगमयस्व तावत् । प्रतीक्ष इति किं ? विद्यामागमयति ।

+नुप्रच्छः ॥ ३२ ॥ आङ्पूर्वाभ्यां नुप्रच्छाभ्यां दो भवति । आनुते श्रृगालः । आपृच्छते गुरून् ।

*दाञः ॥ ३३ ॥ ददातेराङ्पूर्वाद्दो भवति । विद्यामादत्ते । धनमादत्ते ।

*न व्यसने ॥ ३४ ॥ दाञो दो न भवति व्यसने विकसनेऽर्थे । विपादिकां व्याददाति ।

+स्वांगकर्मकात् ॥ ३५ ॥ दाञः स्वांगकर्मकात् व्यसनेऽर्थे दो न भवति । आस्यं व्याददाति । स्वांगकर्मकादिति किं ? व्याददते पिपीलिका पतंगमुखं ।

*यमूह्नो धेश्च ॥ ३६ ॥ यमेर्हतेश्च धिसंज्ञकात् स्वांगकर्मकाच्चाङ्पूर्वाद्दो भवति । आयच्छते । आयच्छेते । आहते । आघ्नाते । आघ्नते । आयच्छते पाणिं । आहते वक्षः । धेरिति किं ? आयच्छति रज्जुं । आहंति पापं ।

*व्युत्तपश्च ॥ ३७ ॥ व्युद्भ्यां तपेर्दो भवति धेः स्वांगकर्मकाच्च । वितपते । उत्तपते राजा । वितपते पृष्ठं । धेरित्येव । उत्तपति सुवर्णं सुवर्णकारः ।

*वेः कुः ॥३८॥ विपूर्वात् कृञो धेर्दो भवति । विकुर्वते सैंधवाः साधुदांताः । अन्नस्य पूर्णाः छात्राः विकुर्वते ।

*शब्दकर्मणः ॥ ३९ ॥ वेः कृञो दो भवति शब्दकर्मकात् । क्रोष्टा विकुरुते स्वरान् । ध्वांक्षो विकुरुते स्वरान् । शब्दकर्मण इति किं? विकरोति कटं ।

*गंधनावक्षेपसेवाऽन्यायप्रतियत्नप्रकथोपयोगे ॥ ४० ॥ एष्वर्थेषु कृञो दो भवति । अयमिममुत्कुरुते । श्येनो वर्त्तिकामुपकुरुते । गणकान् प्रकुरुते । परदारान् प्रकुरुते । कांडं गुणस्योपस्कुरुते । जनापवादान् प्रकुरुते । शतं प्रकुरुते धर्माय । एष्विति किं ? धर्मं करोति ।

प्रसहनेऽधेः ॥ ४१ ॥ अधिपूर्वात् कृञो दो भवति प्रसहने पराभिभवेऽर्थे । वादिनोऽधिकुरुते । शत्रूनधिकुरुते । प्रसहन इति किं ? अधिकरोति ।

*पूजोत्संगोपनीतिज्ञानभृतिगणनव्यये न्यः ॥४२॥ पूजादिष्वर्थेषु नयतेर्दो भवति । नयते चार्वी स्याद्वादे । बालकमुदानयते । माणवकमुपनयते । नयते चार्वी तत्त्वार्थे । कर्मकरानुपनयते । भृतिदानेन स्ववशीकरोति । मद्रकाः कारं विनयंते । राजग्राह्यं भागं निर्यातयंतीत्यर्थः । शतं विनयते । व्ययीकरोति । एष्विति किं ? नयत्यजां ग्रामं ।

*कर्तृस्थे कर्मण्यमूर्तौ शमे ॥ ४३ ॥ कर्तृस्थेऽर्थे कर्मणि मूर्त्तिवर्जिते विवक्षिते नयतेर्दो भवति शमेऽर्थे । क्रोधं विनयते । दर्पं विनयते । कर्तृस्थे इति किं ? मुनिः परस्य क्रोधं विनयति । कर्मणीति किं ? बुद्ध्या विनयति । अमूर्त्ताविति किं ? गडुं विनयति । शम इति किं ? क्रोधमानयति ।

+हृगतिताच्छील्ये ॥ ४४ ॥ हरतेर्दो भवति गतेस्ताच्छील्ये । पैतृकमश्वा अनुहरंते । मातृकं गावोऽनुहरंते । गतिस्वभावमनुकुर्वंति ।

+शिक्षशकनाथेर्जिज्ञासोपलंभनाशिषि ॥४५॥ शिक्षादिभ्यो जिज्ञासादिषु दो भवति । शकेः सन्नंतात् शिक्षा । जिज्ञासायां-विद्यां शिक्षते । तुभ्यं शपते । सर्पिषो नाथते । एष्विति किं ? भोक्तुं शिक्षति ।

वृत्तिसर्गतायने क्रमः ॥ ४६ ॥ वृत्त्यादिष्वर्थेषु क्रमेर्दो भवति । तत्त्वेऽस्य क्रमते बुद्धिर्न प्रतिबध्यत इत्यर्थः । जैनेंद्राध्ययनाय क्रमते उत्सहत इत्यर्थः । क्रमंतेऽस्मिन् शास्त्राणि संतन्यंते पाल्यंते वा ।

परोपात् ॥ ४७ ॥ वृत्यादिषु परोपाभ्यां क्रमेर्दो भवति । पराक्रमते । उपक्रमते ।

ज्योतिरुद्गतावाङः ॥ ४८ ॥ आङ्पूर्वात् क्रमेर्दो भवति ज्योतिषां सूर्यादीनामुद्गमनेऽर्थे । आक्रमते सूर्यः । आक्रमते चंद्रः । ज्योतिरुद्गताविति किं ? शिशुराक्रामति कुतपं ।

वेः स्वार्थे ॥ ४९ ॥ विपूर्वात् क्रमेः स्वार्थे दो भवति । सुष्ठु विक्रमते । साधु विक्रमते । स्वार्थे इति किं ? विक्रामत्यजिनसंधिः ।

*प्रोपात् समर्थात् ॥ ५० ॥ प्रोपाभ्यां समर्थाभ्यां क्रमेर्दो भवति । प्रक्रमते । उपक्रमते भोक्तुं । प्रारभत इत्यर्थः ।

वाऽगेः ॥ ५१ ॥ अगिपूर्वाद् क्रमेर्दो भवति वा । क्रमते, क्रामति । अगेरिति किं ? संक्रामति ।

***संप्रतेर्ज्ञोऽस्मृतौ** ॥ ५२ ॥ संप्रतिभ्यां जानातेर्दो भवत्यस्मृतावर्थे। संजानीते । प्रतिजानीते शतं । अस्मृताविति किं ? मातुः संजानाति ।

***निह्नवे** ॥ ५३ ॥ निह्नवेऽपलापेऽर्थे ज्ञो दो भवति । शतमपजानीते। सहस्रमपजानीते । निह्नव इति किं ? न त्वं किमपि जानासि ।

धेः ॥ ५४ ॥ ज्ञो धिसंज्ञकाद्दो भवति । दध्नो जानीते । सर्पिषो जानीते । धेरिति किं ? स्वरेण पुत्रं जानाति ।

दीप्त्युपोक्तिज्ञानेहविमत्युपमंत्रे वदः ॥५५॥ दीप्त्यादिषु वदेर्दो भवति । वदते चार्वी तत्त्वार्थे । कर्मकरानुपवदते । वदते विद्वान् स्याद्वादे । तपसि वदते । गेहे विवदंते । परदारानुपवदते ।

व्यक्तवाक्समुक्तौ ॥ ५६ ॥ व्यक्तवाचां समुक्तौ सहोक्तौ वदेर्दो भवति । संप्रवदंते ग्राम्याः । संप्रवदंते साधवः । व्यक्तवागिति किं ? संप्रवदंति चटकाः ।

अनोर्धेः ॥ ५७ ॥ धिसंज्ञकादनुपूर्वाद्वदेर्दो भवति । आचार्यस्यानुवदते शिष्यः । धेरिति किं ? प्रागुक्तमनुवदति ।

***वा व्युक्तौ** ॥ ५८ ॥ व्युक्तौ विवादे वदेर्वा दो भवति । विप्रवदंते वादिनः विप्रवदंति वा । व्युक्ताविति किं ? संप्रवदंति साधवः ।

गिरोऽवात् ॥५९॥ अवपूर्वाद्गिरतेर्दो भवति । अवगिरते । अवगिरंते ।

उच्चरोऽधेः ॥ ६० ॥ उत्पूर्वाच्चरतेर्दो भवत्यधेः । गुरुवाचमुच्चरते । अपूपानुच्चरते । अधेरिति किं ? बाष्प उच्चरति ।

समो भया ॥ ६१ ॥ संपूर्वाच्चरतेर्दो भवति भांतेन योगे । अश्वेन संचरते । रथेन संचरते । भयेति किं ? त्रैलोक्यं संचरति जिनधर्मः ।

+दाणोऽसत्कृत्येऽवर्थया ॥ ६२ ॥ दाणः संपूर्वाद्दो भवत्यसत्कृत्येऽशिष्टव्यवहारेऽवर्थया भया योगे । दास्या संप्रयच्छते कामुकः । असत्कृत्य इति किं ? भार्यायै संप्रयच्छति । अवर्थयेति किं ? पाणिना संप्रयच्छति । ज्ञापकमिदमवावर्थेऽशिष्टव्यवहारे भापि भवतीति ।

स्वीकृतावुपाद्यमः ॥ ६३ ॥ उपपूर्वाद् यमेर्दो भवति स्वीकृतौ पाणिग्रहणे। कन्यामुपयच्छते। स्वीकृताविति किं ? देवदत्तस्य भार्यामुपयच्छति यज्ञदत्तः ।

श्रुस्मृदृशः सनः ॥ ६४ ॥ एभ्यः सन्नंतेभ्यो दो भवति। शुश्रूषते। सुस्मूर्षते। दिदृक्षते देवान्।

ज्ञः ॥ ६५ ॥ जानातेः सन्नंताद्दो भवति । जिज्ञासते धर्मं ।

नाऽनोः ॥ ६६ ॥ अनुपूर्वाज्जानातेर्दो न भवति सन्नंतात् । अनुजिज्ञासति ।

प्रत्याङ्श्रोः ॥ ६७ ॥ प्रत्याङ्भ्यां शृणोतेः सन्नंताद्दो न भवति । प्रतिशुश्रूषति । आशुश्रूषति ।

शदेर्गात् ॥ ६८ ॥ शदेर्गविषयाद्दो भवति । शीयते । शीयेते । शीयंते । गादिति किं ? अशत्स्यत् । शशाद ।

***मुर्लुङ्लिङोश्च** ॥ ६९ ॥ म्रियतेर्दो भवति लुङ्लिङोः गपराच्च । अमृत । मृषीष्ट । म्रियते । म्रियतां । अम्रियत । म्रियेत । लुङ्लिङोश्चेति किं ? मरिष्यति । अमरिष्यत् । ममार ।

***प्राग्वत्सनः** ॥७०॥ प्राग्वत् प्राचीनदानिमित्तप्रकृतिवत् सन्नंतात् दो भवति । ङेदितो दः । शेते । शिशयिषते । स्पर्द्धते । पिस्पर्द्धिषते । निविशः । निविशते । निविविक्षते । आक्रमते आदित्यः । आचिक्रंसते । सर्पिषो जानीते । सर्पिषो जिज्ञासते । प्राग्वदिति किं ? शिशत्सति । मुमूर्षति । दनिमित्तताऽत्र नास्ति ।

***आमवत् तत्कृः** ७१ ॥ आमंतस्येव तत्कृञो दो भवति । ईहांचक्रे । ईक्षांचक्रे । तत्कुरिति किं ? ईहांबभूव । ईक्षामास ।

+न ॥ ७२ ॥ आमंतात् तत्कृञो दो न भवति। उब्जांचकार ।

***ग्युद्युजोऽयज्ञपात्रे** ॥ ७३ ॥ ग्युद्भ्यां युजेर्दो

भवत्ययज्ञपात्रे । प्रयुंक्ते । नियुंक्ते । उपयुंक्ते । उद्युंक्ते । अयज्ञपात्र इति किं ? द्वंद्वं यज्ञपात्राणि प्रयुनक्ति । गिना सिद्धे नियमार्थमुद्ग्रहणं । हलंतेपु–उद एव नान्यस्मात् । दुर्युनक्ति । संयुनक्ति ।

***अपस्कृः ॥ ७४ ॥** अपस्किरतेर्दो भवति । अपस्किरते वृषभो हृष्टः । अपस्किरते कुक्कुटो भक्षार्थी । अपस्किरते श्वा आश्रयार्थी । अपग्रहणं किं ? उपस्किरति ।

***भुजोऽत्रे ॥ ७५ ॥** भुजेर्दो भवत्यत्रेऽपालने । भुंक्ते । भुंजाते । भुंजते । अत्र इति किं ? भुनक्ति भरतः क्ष्मां ।

***नाऽणौ धेः प्राणिकर्तृकाण्णेः ॥ ७६ ॥** अण्यंतावस्थायां यो धुर्धिः प्राणिकर्तृकस्तस्माण्ण्यंताद्दो न भवति । आस्ते देवदत्तः । आसयति देवदत्तं । शेते माणवकः । शाययति माणवकं । अणाविति किं ? आरोहयमाणं प्रयोजयति आरोहयते । धेरिति किं ? कटं कुर्वाणं प्रयोजयति कारयते । प्राणिकर्तृकादिति किं ? शुष्यंति व्रीहयः शोषयते व्रीहीनातपः । "णिचः" इति प्राप्तिः प्रतिषिद्ध्यते ।

***यत्कर्म चेत् कर्ताऽनात्माऽस्मृतौ ॥ ७७ ॥** अण्यंताद्यो णिः तदंताद्दो भवत्यस्मृतावनाध्याने । णिप्रकृतेरणौ यत् कर्म स चेत् कर्ता अनात्मा स्यात् । पश्यंति भृत्याः राजानं । दर्शयते भृत्यान् राजा स्वयमेव । यत्कर्मेति किं ? लुनाति दात्रेण लावयति दात्रं स्वयमेव । कर्तेति किं ? आरोहंति हस्तिनं हस्तिपकाः । आरोहयत्येनं महामात्रः । अनात्मेति किं ? हंत्यात्मानं । घातयत्यात्मा । अस्मृताविति किं ? स्मरति वनगुल्मं कोकिलः । स्मारयत्येनं वनगुल्मः ।

***भीस्मेर्हेतुभये ॥ ७८ ॥** ण्यंताभ्यां भीस्मिभ्यां दो भवति हेतुभयेऽर्थे । मुंडो भीषयते । जटिलो भीषयते । मुंडो विस्मापयते । हेतुभय इति किं ? कुंचिकयैनं भाययति ।

वंचने गृधिवंचेः ॥ ७९ ॥ गृधिवंचिभ्यां ण्यंताभ्यां दो भवति वंचने विसंवादनेऽर्थे । गर्द्धयते । वंचयते माणवकं । प्रतारयतीत्यर्थः । वंचन इति किं ? श्वानं गर्द्धयति । अहिं वंचयति ।

***ल्योऽर्चाऽधार्ष्ट्ये च ॥ ८० ॥** लिनातिलीयतिभ्यां ण्यंताभ्यां दो भवत्यर्चायामधार्ष्ट्ये वंचने च । जटाभिरालापयते । श्येनो वर्तिकामपलापयते । कस्त्वामुल्लापयते ।

*** मिथ्याकृञोऽभ्यासे ॥ ८१ ॥** मिथ्याशब्देन योगे कृञो ण्यंताद्दो भवत्यभ्यासेऽर्थे । पदं मिथ्या कारयते । स्तुतिं मिथ्या कारयते । मिथ्येति किं ? सूत्रं साधु कारयति । अभ्यास इति किं ? सकृत्पदं मिथ्या कारयति ।

*** ञितः फलेशे ॥ ८२ ॥** ञितो धोर्दो भवति क्रियायाः फलेशे कर्तरि । पचते । लुनीते । कुरुते । फलेशे इति किं ? पचंति भक्तिकराः । वपंति भृतकाः ।

वदोऽपात् ॥ ८३ ॥ अपाद् वदेर्दो भवति फलेशे । एकांतवादमपवदते । अपवदते ।

समुदाङ्यमोऽग्रंथे ॥ ८४ ॥ समादिभ्यो यमेर्दो भवत्यग्रंथेऽर्थे । व्रीहीन् संयच्छते । भारमुद्यच्छते । पादमायच्छते । अग्रंथे इति किं ? उद्यच्छति चिकित्सां वैद्यः ।

ज्ञोऽगेः ॥ ८५ ॥ जानातेरगेर्दो भवति । गां जानीते । अश्वं जानीते । अगेरिति किं ? स्वर्गं प्रजानाति ।

णिचः ॥ ८६ ॥ णिजंताद्धोर्दो भवति फलेशे । ओदनं पाचयते । कटं कारयते । फलेशे इति किं ? परस्य कटं कारयति ।

पादम्याङ्यमाङ्यस्परिमुहरुचिनृतद्वेद्वसः ॥ ८७ ॥ पादिभ्यो ण्यंतेभ्यो दो भवति । पाययते । आदयते । दमयते । आयामयते । आयासयते । परिमोहयते । रोचयते । नर्तयते । धापयते । वादयते । वासयते ।

वा वागम्ये ॥ ८८ ॥ वाचा पदांतरेण गम्यमाने फलेशे दो वा भवति । स्वं धान्यं पुनीते पुनाति वा । स्वं वाक्यमपवदते, अपवदति वा । स्वान् व्रीहीन् संयछते, संयच्छति वा । स्वां गां जानीते, जानाति वा । स्वमन्नं पाचयते, पाचयति वा । स्वं पुत्रं पाययते, पाययति वा । गतः पद्धभियोगैर्नित्यं दे प्राप्ते वाचा योगेऽनेन विकल्पः ।

मं ॥ ८९ ॥ यस्मान्मं च दश्च प्राप्नोति तस्मान्ममेव भवति । याति । प्रविशति । अधिकरोति ।

***परानुकृः ॥ ९० ॥** परानुभ्यां कृञो मं भवति । पराकरोति । अनुकरोति ।

प्रत्यभ्यतिक्षिपः ॥ ९१ ॥ एभ्यः क्षिपेर्मं भवति । प्रतिक्षिपति । अभिक्षिपति । अतिक्षिपति ।

***प्राद्वहः ॥ ९२ ॥** प्राद्वहेर्मं भवति । प्रवहति । प्रवहतः । प्रवहंति ।

*** परेः ॥ ९३ ॥** परिपूर्वात् वहेर्मं भवति । परिवहति । ञित्वात् फलेशे दे प्राप्ते मं विधीयते । पृथग्वचनमुत्तरार्थं ।

***मृषः ॥ ९४ ॥** परेर्मृषो मं भवति । परिमृष्यति । परिमृष्यतः ।

व्याङश्च रमः ॥ ९५ ॥ व्याङ्भ्यां परेश्च रमेर्मं भवति । विरमति । आरमति । परिरमति । एतेभ्यः किं ? रमते । अभिरमते ।

उपात् ॥ ९६ ॥ उपात् रमेर्मं भवति । उपरमति । उपरमतः । उपरमंति । पृथग् वचनमुत्तरार्थं ।

वा धेः ॥ ९७ ॥ उपपूर्वात् धिसंज्ञकाद्रमेर्वा मं भवति । यावद् भुक्तमुपरमति, उपरमते वा ।

बुध्युधनशजनेङ्प्रुद्रुस्रोर्णेः ॥ ९८ ॥ बुधादिभ्यो ण्यंतेभ्यो मं भवति । बोधयति । योधयति । नाशयति । जनयति । अध्यापयति । प्रावयति । द्रावयति । स्रावयति ।

चलय्यद्यर्थात् ॥ ९९ ॥ चलयर्थेभ्योऽद्यर्थेभ्यश्च धुभ्यो ण्यंतेभ्यो मं भवति । चलयति । चोपयति । कंपयति । वेपयति । आशयति । निगारयति । भोजयति । अभ्यवहारयति ।

क्यषो वा ॥१००॥ क्यषंताद्वा मं भवति । पटपटायति । पटपटायते । लोहितायति । लोहितायते ।

द्युद्भ्यो लुङि ॥१०१॥ द्युतादिभ्यो लुङि परे वा मं भवति । व्यद्युतत् । व्यद्योतिष्ट । अलुटत् । अलोटिष्ट । अशुभत् । अशोभिष्ट । अरुचत् । अरोचिष्ट ।

***सन्स्ये वृद्भ्यः ॥ १०२ ॥** वृतादिभ्यः सनि स्ये च वा मं भवति । विवृत्सति । विवर्तिषते । वर्त्स्यति । वर्तिष्यते । अवर्त्स्यत् । अवर्तिष्यत । विवृत्सति । विवर्द्धिषते । वर्त्स्यति । वर्द्धिष्यते । अवर्त्स्यत् । अवर्द्धिष्यत । चिक्लृप्सति । चिकल्पिषते । कल्प्स्यति । कल्पिष्यते । अकल्प्स्यत् । अकल्पिष्यत ।

***लेः कृपः ॥१०३॥** कृपेर्लुटो वा मं भवति । कल्प्ता । कल्पिता । कल्प्तास्मि । कल्पिताहे ।

नप्बाध्य आसं ॥ १०४ ॥ नपा निर्दिष्टो बाध्यो भवत्यासमासाधिकारानिवृत्तेरित्येषोऽधिकारो ज्ञेयः । वक्ष्यति-प्रोवि च-भिदि । स्फे रुः-शिक्षि । स्फपरस्य प्रस्य विसंज्ञा प्राप्ता रुसंज्ञया बाध्यते ।

य्वौ स्त्र्याख्यौ मुः ॥ १०५ ॥ ईकारोकारौ स्त्र्याख्यौ मुसंज्ञौ भवतः । कुमारी । किशोरी । वामोरूः । वधूः । य्वौ इति किं ? खट्वा । स्त्र्याख्याविति किं ? हे ग्रामणीः । हे खलपूः । मुप्रदेशाः "अण्मोः" इत्यादयः ।

स्त्री ॥ १०६ ॥ स्त्रीशब्दो मुसंज्ञो भवति । हे स्त्रि । स्त्रियै । स्त्रियाः । स्त्रीणां ।

आमीयुवोः ॥ १०७ ॥ आमि परत इयुवोः स्थानिनौ यौ य्वौ स्त्र्याख्यौ तौ मुसंज्ञा भवतः । श्रीणां । भ्रूणां । पृथुश्रीणां स्त्रीणां पुरुषाणां वा । नियमार्थमिदं । आम्येव मुसंज्ञा नान्यत्र । हे श्रीः । हे भ्रूः ।

वा ॥ १०८ ॥ वा मुसंज्ञा भवति आमीयुवोः स्थानिनोः । श्रीणां । श्रियां । भ्रूणां । भ्रुवां ।

ङिति प्रश्च ॥ १०९ ॥ य्वोर्यः प्रः स्त्र्याख्यः इयुवोश्च स्थानिनौ यौ य्वौ तेषां मुसंज्ञा भवति । ङिति परे वा । बुद्ध्यै । बुद्धये । धेन्वै । धेनवे । श्रियै । श्रिये । भ्रुवै । भ्रुवे ।

***स्वसखिपति ॥ ११० ॥** य्वोर्यः प्रः स मुसंज्ञो भवति सखिपतिशब्दौ वर्जयित्वा । मुनये । साधवे । बुद्धये । धेनवे । असखिपतीति किं ? सख्या । सख्ये । सख्युः । पत्या । पत्ये । पत्युः ।

प्रो घि च ॥ १११ ॥ प्रो घि संज्ञो भवति । बोद्धा । भेत्ता । चशब्दः संज्ञांतरसमावेशार्थः । प्रविनय्य गतः । घ्याश्रयो णेरयादेशः स्त्राश्रयपूर्वनिपातश्च सिद्धः । घिप्रदेशाः "घ्युङः" इत्यादयः ।

स्फे रुः ॥ ११२ ॥ स्फपरः प्रः रुसंज्ञो भवति । स्पर्द्धा । कुंडा । हुंडा । रुप्रदेशाः "सरोहलः" इत्यादयः ।

दीः ॥ ११३ ॥ दीश्च रुसंज्ञो भवति । ईहा । ईक्षा । ईक्षांचक्रे ।

यत्त्ये तदादिर्गुः ॥ ११४ ॥ यस्य त्यः यत्त्यः तस्मिन् परतः तदादि शब्दरूपं गुसंज्ञं भवति । जुहोति । करोति । करिष्यति । यत्त्य इति किं ? हे देवदत्त[१] इं पश्येत्यत्र आदैरैप् प्राप्नोति । दध्यधुनेत्यत्र एरित्यादेरिखं च । न चैवं । तदादिरिति किं ? करिष्यामीति । अनेकत्येपि प्रांतस्य दीत्वं । गुप्रदेशाः "गोः" इत्यादयः ।

+**मिङा वाक्यं** ॥ ११५ ॥ मिङंतेन प्रयुज्यमानेनाप्रयुज्यमानेन वा प्रत्यासत्तेस्तस्यैव मिङंतस्य विशेषणं शब्दरूपं वाक्यसंज्ञं भवति । धर्मो वो रक्षतु । देवदत्तेन कर्तव्यं । वाक्यप्रदेशाः "वाक्यटेष्पः" प्रभृतयः ।

सुम्मिङंतं पदं ॥ ११६ ॥ सुबंतं मिङंतं च पदसंज्ञं भवति । धर्मः । अस्ति । पदप्रदेशाः "पदस्य" प्रभृतयः ।

नः क्ये ॥ ११७ ॥ नांतस्य क्ये परतः पदसंज्ञा भवति । राजीयति । राजायते । त्यखे त्याश्रयमिति पदत्वसिद्धौ किमर्थमिदं ? नियमार्थमिदं नांतमेव क्ये पदसंज्ञं भवति नान्यत् । वाच्यति । मुच्यति ।

सिति ॥ ११८ ॥ सिति त्ये परतः पूर्वं पदसंज्ञं भवति । भवतष्ठणछस् । भवदीयः । ऊर्णाहंशुभंभ्यश्च युस् । ऊर्णायुः ।

स्वादावधे ॥ ११९ ॥ अधे स्वादौ परतः पूर्वं पदसंज्ञं भवति । पयोभ्यां । राजभ्यां । राजभिः । राजत्वं । राजता । राजतरः । राजतमः । अध इति किं ? राजानौ । राजानः ।

यचि भः ॥ १२० ॥ यकारादावजादौ च स्वादावधे परतः पूर्वं भसंज्ञं भवति । गार्ग्यः । दाक्षिः । यचीति किं ? राजत्वं । भप्रदेशाः "भस्य" इत्यादयः ।

+**मनुर्नभोऽगिरो वति** ॥ १२१ ॥ एते भसंज्ञका भवंति वति त्ये । मनुष्वत् । नभस्वत् । अंगिरस्वत् ।

×**वृष्णोऽश्ववसौ** ॥ १२२ ॥ वृषन् इत्येतद् भसंज्ञं भवत्यश्वे वसौ च । वृषणश्वः । वृषण्वसुः ।

मत्वर्थे स्तौ ॥ १२३ ॥ सकारांतं तकारांतं च शब्दरूपं भसंज्ञं भवति मत्वर्थे त्ये परतः । तपस्वी । मरुत्वान् । विदुष्मान् । मत्वर्थ इति किं ? यशोभ्यां । विद्वद्भ्यां ।

ध्यपाये ध्रुवमपादानं ॥ १२४ ॥ धियः बुद्धेरपाये प्राप्तिपूर्वकविश्लेषे विभागेऽविचलमवधिभूतं वा यत् ध्रुवं तदपादानसंज्ञं भवति । ग्रामादागच्छति देवदत्तः । अधर्माज्जुगुप्सते । अश्वात् धावतः पतितः । नपा निर्देशः किं ? धनुषा विध्यति । कंसपात्र्यां भुंक्ते । धनुर्विध्यति । अपादानप्रदेशाः "काऽपादाने" इत्येवमादयः ।

+**आख्यातोपयोगे** ॥ १२५ ॥ उपयोगे नियमपूर्वकविद्याग्रहणे आख्याता प्रतिपादयिता अपादान भवति । उपाध्यायादधीते । उपयोग इति किं ? नटस्य शृणोति ।[१]

कर्मणोपेयः संप्रदानं ॥ १२६ ॥ कर्मणा य उपेयोऽर्थः स संप्रदानसंज्ञो भवति । उपाध्यायाय गां ददाति । देवाय बलिं प्रयच्छति । राज्ञे दंडं वितरति ।

+**श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यः** ॥ १२७ ॥ एषां ज्ञीप्सोऽर्थः संप्रदानं स्यात् । देवदत्ताय श्लाघते देवदत्तायापह्नुते । तिष्ठते ब्राह्मणी छात्रेभ्यः । देवदत्ताय शपते ।

+**रुच्यर्थानां प्रेयः** ॥ १२८ ॥ रुच्यर्थानां धूनां प्रयोगे प्रेयः प्रीयमाणोऽर्थः संप्रदानं भवति । तुभ्यं रोचते मोदकः । मह्यं स्वदते दधि ।

धारेरुत्तमर्णः ॥ १२९ ॥ धारयतेरुत्तमर्णो

१ । देवदत्तशब्दस्यन्त्ये परतो दूत्यस्वादेरित्यैप् प्राप्तः परं यत्त्य इति विशेषणान्न भवति ।

१ । पूर्वेण सिद्धे नियमार्थमुपयोग एव यथा स्यात् ।

धनी संप्रदानं भवति । देवाय शतं धारयति । देवदत्ताय गां धारयति ।

+राधीक्ष्योर्यद्दैवं ॥ १३० ॥ दैवं शुभाशुभलक्षणं तत्संबंधि यत्कारकं तत् राधीक्ष्योर्योगे संप्रदानं स्यात् । पुत्राय राध्यति, ईक्षते वा । पुत्रस्य दैवं निरूपयतीत्यर्थः ।

+प्रत्याङ्भ्यां श्रुवोऽभ्यर्थकः ॥ १३१ ॥ प्रत्याङ्भ्यां शृणोतेरभ्यर्थकोऽभ्युपगमकोऽर्थः संप्रदानं भवति । मित्राय प्रतिशृणोति,आशृणोति वा । अभ्युपगच्छतीत्यर्थः ।

×प्रत्यनुगृण आख्याता ॥ १३२ ॥ प्रत्यनुपूर्वगृणातिना योगे आख्याता प्रतिपादयिता संप्रदानं स्यात् । उपाध्यायाय प्रतिगृणाति । अनुगृणाति वा । तमुत्साहयतीत्यर्थः ।

×क्रुधुद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ॥१३३॥ क्रुधाद्यर्थानां धूनां योगे यं प्रति कोपः स संप्रदानं स्यात् । मित्राय क्रुध्यति कुप्यति वा । मित्राय द्रुह्यति । मित्राय ईर्ष्यति । मित्रायासूयति ।

×न गेः क्रुधुद्रुहः ॥ १३४ ॥ गिपूर्वयोः क्रुधिद्रुहोः यं प्रति कोपः स संप्रदानं न स्यात् । मित्रमभिक्रुध्यति, अभिद्रुह्यति वा ।

×स्पृहेर्वेप्सितं ॥ १३५ ॥ स्पृहेर्योगे यदीप्सितं तत्संप्रदानं वा भवति । पुष्पेभ्यः स्पृहयति । पुष्पाणि स्पृहयति ।

परिक्रयणं ॥ १३६ ॥ परिक्रयणं यत् तत्संप्रदानं वा भवति । शताय परिक्रीतः शतेन वा । सहस्राय परिक्रीतः सहस्रेण वा ।

×गल्हादीनां बहुलं ॥१३७॥ एषां योगे बहुलं संप्रदानं भवति । श्राद्धाय निगह्लते । श्वभ्यो वर्षति । पल्ये शेते । क्वचिन्न स्यात् । मनसा निगह्लते श्राद्धं । क्वचिद्द्वयं । मित्राय धर्मं ब्रूते । मित्रं धर्मं ब्रूते ।

साधकतमं करणः ॥ १३८ ॥ अतिशयेन साधकं यत् तत् करणसंज्ञं भवति । दानेन भोगं दयया सुरूपं ध्यानेन मोक्षं तपसेष्टसिद्धिं । सत्येन वाक्यं प्रशमेन पूजां वृत्तेन जन्माग्रमुपैति मर्त्यः । पुल्लिंगानिर्देशात्–अक्षैर्दीव्यति ।

दिवः कर्म ॥ १३९ ॥ दिवेर्यत् साधकतमं तत् कर्मसंज्ञं भवति । अक्षान् दीव्यति ।

आधारोऽधिकरणः॥ १४० ॥ अधिकरणकारकमाधारसंज्ञं भवति । कटे अस्ते । गंगायां घोषः । दध्नि सर्पिः । हृदि तिष्ठति जिनः । विवाहेऽलंकृता कन्या । अंगुल्यग्रेऽश्वसहस्रं । आधारप्रदेशाः "ईबाधारे च" प्रभृतयः ।

कर्मैवाधेः शीङ्स्थासः ॥ १४१ ॥ अधिपूर्वाणां शीङ्स्थासामाधारः कर्मैव भवति । ग्राममधिशेते । पर्वतमधितिष्ठति । वसतिमध्यास्ते । एवकारः आधारनिवृत्त्यर्थः ।

वसोऽनूपाध्याङः ॥ १४२ ॥ अन्वादिभ्यः परस्य वसेराधारः कर्म भवति । ग्राममनुवसति । गिरिमुपवसति । गृहमधिवसति । वनमावसति ।

अभिनिविशश्च ॥ १४३ ॥ अभिनिगिसमुदायपूर्वस्य विशेराधारः कर्म भवति । ग्राममभिनिविशते । चकारात् कल्याणेऽभिनिवेशः ।

×कालाध्वभावदेशं वा ऽकर्मधीनां ॥ १४४॥ धीनां धूनां कालादिराधारः कर्म वा भवति अकर्म च । मासमास्ते । मास आस्यते । क्रोशं स्वपिति । गोदोहमास्ते । कुरून् स्वपिति । पक्षे–रात्रौ सुप्यते । क्रोशेऽधीयते । गोदोहे आस्ते । ग्रामे उष्यते । कालादीति किं ? शय्यायां शेते । अकर्मचेति किं ? मासमास्यते । क्रोशं सुप्यते ।

कर्त्राप्यं ॥ १४५ ॥ कर्त्रा यदाप्यं तत्कारकं कर्म संज्ञं भवति । कटं करोति । ग्रामं गच्छति । हिमवंतं शृणोति । जैनेंद्रमधीते । ओदनं पचति । काष्ठानि दहति ।

×वाऽकर्मणोऽणि कर्ता णौ ॥ १४६ ॥ अकर्मणो धोरण्यंतस्य यः कर्ता स णौ सति कर्मसंज्ञो वा भवति । पचति देवदत्तः, पाचयति देवदत्तं ।

---

१ । अधारस्य–औपश्लेषिकसामीपिकाभिव्यापकवैषयिकनैमित्तिकौपचारिकेति षड्भेदाः ।

देवदत्तेन वा । लिखति सः, लेखयति तं तेन वा । उत्तरत्र धिग्रहणात् इहाविवक्षितकर्मणो ग्रहणं ।

*ज्ञागम्यद्यर्थदृश्धेः ॥ १४७ ॥ ज्ञार्थानां गम्यर्थानामद्यर्थानां दृशेर्ध्रोनां चाण्यंतानां यः कर्ता स णौ सति कर्मसंज्ञो भवति । जानाति धर्मं देवदत्तः । ज्ञापयति धर्मं देवदत्तं । बुध्यते दत्तः । बोधयते(ति)दत्तं । गच्छति माणवको ग्रामं । गमयति माणवकं ग्रामं । याति माणवकः । यापयति माणवकं । भुंक्ते देवदत्तः । भोजयति देवदत्तं । अश्नाति भक्तं देवदत्तः । आशयति देवदत्तमोदनं । पश्यति देवदत्तो रूपं । दर्शयति देवदत्तं रूपं । शेते शिशुः । शाययति शिशुं । आस्ते यज्ञदत्तः । आसयति यज्ञदत्तं । ज्ञादीनामिति किं ? भेदयति काष्ठं भृत्येन ।

*शब्दे ॥ १४८ ॥ शब्दे वर्तमानस्याण्यंतस्य धोः कर्ता णौ सति कर्म भवति । शृणोति दत्तः शब्दं । श्रावयति दत्तं शब्दं । जल्पति देवदत्तः पुत्रं । जल्पयति देवदत्तं पुत्रं ।

+भक्षेर्हिंसायां ॥ १४९ ॥ भक्षेर्हिंसार्थस्याणि कर्ता णौ सति कर्म भवति । भक्षयंति बलीवर्दाः सस्यं । भक्षयंति बलीवर्दान् सस्यं । हिंसायामिति किं ? भक्षयति पिंडीं देवदत्तेन ।

+वहेः प्रवेयः ॥ १५० ॥ वहेरणि कर्ता प्रवेयो णौ सति कर्म भवति । वाहयंति बलीवर्दान् भारं । प्रवेय इति किं ? वाहयति भारं वाहीकेन । नहि बलीवर्दवद् वाहीकं प्राजंति ।

+न खाददिक्रंदशब्दायह्वः ॥ १५१ ॥ एभ्योऽणि कर्ता णौ सति कर्म न भवति । खादयति, आदयति पिंडीं देवदत्तेन । क्रंदयति, शब्दाययति, ह्वाययति देवदत्तेन । खादयोरद्यर्थत्वात् परेषां शब्दक्रियत्वात् प्राप्तिः ।

*हृक्रोर्वा ॥ १५२ ॥ हृक्रोरणि कर्ता णौ सति वा कर्म भवति । हरति भारं दत्तः । हारयति भारं दत्तं, दत्तेन वा । विकुर्वते सैंधवाः । विकारयंति सैंधवान् सैंधवैर्वा ।

+दृश्यभिवाद्योर्दे ॥ १५३ ॥ दृशेरभिवादेश्चाणि कर्ता णौ सति कर्म वा भवति दविषये । पश्यंति राजानं भृत्याः । दर्शयते राजानं भृत्यान् भृत्यैर्वा । अभिवादयति गुरुर्दत्तं । अभिवादयते गुरुं गुरुणा वा दत्तं ।

स्वतंत्रः कर्ता ॥ १५४ ॥ स्वतंत्रः आत्मप्रधानः कर्तृसंज्ञो भवति । गौस्तिष्ठति । देवेन कृतं । देवदत्तेन भुक्तं ।

तद्योजको हेतुः ॥ १५५ ॥ तस्य स्वतंत्रस्य योजकः प्रेरको यः स हेतुसंज्ञो भवति । भुंजानं प्रयोजयति भोजयति । कारयति ।

निः ॥ १५६ ॥ आ"प्राग्धास्ते"ये वक्ष्यंते ते निसंज्ञा भवंति । इत्येषोऽधिकारो ज्ञेयः । निप्रदेशाः "न्यजनाङ्"प्रभृतयः ।

*चादयोऽसत्त्वे ॥ १५७ ॥ चादयो निसंज्ञा भवंत्यसत्त्वे वर्तमानाः । च वा ह अह एवेत्यादिः । असत्त्व इति किं ? अस्यापत्यं इः ।

प्रादिः ॥१५८॥ प्रादयो निसंज्ञा भवंत्यसत्त्वे । प्रपरापसमन्ववनिर्दुर्व्याङ् न्यधयोऽप्यतिसूदभयश्च । प्रतिना सह लक्षयितव्याः पर्युपयोरपि लक्षणमत्र ॥ असत्त्व इति किं ? विं प्रातीति विप्रः ।

क्रियायोगे गिः ॥ १५९ ॥ क्रियया स्वर्थेन योगे प्रादयो गिसंज्ञका भवंति । प्रणमति । परिणमयति । क्रियायोगे इति किं ? प्रगता नायका अस्मादेशात् प्रनायको देशः ।

तिः ॥१६०॥ प्रादयस्तिसंज्ञकाः भवंति क्रियायोगे । प्रकृत्य । उपस्तुत्य । अधिकृत्य ।

*च्विडाजूर्याद्यनुकरणं ॥ १६१ ॥ च्व्यंतं डाजंतं ऊर्याद्यनुकरणं च तिसंज्ञं भवति क्रियायोगे । शुक्लीकृत्य । विमलीभूय । पटपटाकृत्य । ऊरीकृत्य । उररीकृत्य । फट्कृत्य । खाट्कृत्य । ऊर्य्यादीनां च्व्यर्थो न संभवत्यतः पृथग्ग्रहणं ।

*क्षेपादरेऽसत्सत् ॥ १६२ ॥ असत्सतौ तिसंज्ञौ भवतः क्षेपादरयोरर्थयोः । असत्कृत्य । सत्कृत्य । क्षेपादर इति किं ? असत्कृत्वा गतः ।

---

१ । योगग्रहणसामर्थ्यात् यत्क्रियायुक्ताः प्रादयस्तं प्रति गितिसंज्ञास्तेनात्रगमिक्रियायोगे गित्वेऽपि नयतिं प्रति गित्वाभावाण्णत्वं न ।

***भूषाऽस्वीकारेऽलमंतः ॥ १६३ ॥** अलमंतरित्येतौ तिसंज्ञौ स्तो भूषाऽस्वीकारयोः। अलंकृत्य। अंतर्हत्य। भूषाऽस्वीकारे इति किं ? अलं कृत्वा। अंतर्हत्वा मूषिकां श्येनो गतः। मा कारि, स्वीकृत्येत्यर्थः।

***कारिकाऽदः स्थित्याद्यनुपदेशे ॥ १६४ ॥** कारिकाऽदसौ तिसंज्ञौ स्तः स्थित्यादिषु मर्यादादिष्वनुपदेशे च स्वयं परामर्शे। कारिकाकृत्य। अदःकृत्य। स्थित्याद्यनुपदेशे इति किं ? कारिकां कृत्वा। अदः कृत्वा। कर्त्री, एतत्कृत्वा चेत्यर्थः।

***कणेमनस्तृप्तौ ॥ १६५ ॥** कणेमनःशब्दौ तिसंज्ञौ स्तस्तृप्तावभिलाषनिवृत्तौ। कणेहत्य भुंक्ते। मनोहत्य भुंक्ते। तृप्ताविति किं ? कणे हत्वा।

पुरोऽस्तं झिः ॥ १६६ ॥ पुरस् अस्तं शब्दौ झिसंज्ञौ क्रियायोगे तिसंज्ञौ स्तः। पुरस्कृत्य, अस्तंगत्य पुनरुदेति। झिरिति किं ? पूः। पुरौ। पुरः। पुरः कृत्वा। नगरीः कृत्वेत्यर्थः। अस्तं कृत्वा कांडं गतः। क्षिप्त्वा कांडं गत इत्यर्थः।

गत्यर्थवदेऽच्छः ॥ १६७ ॥ अच्छशब्दो गत्यर्थेषु वदतौ च परतः तिसंज्ञो भवति। अच्छगत्य। अच्छव्रज्य। अच्छोद्य। गत्यर्थवद इति किं ? अच्छं कृत्वा।

तिरोऽतर्द्धौ ॥ १६८ ॥ तिरस्शब्दोऽतर्धौ व्यवधाने तिसंज्ञो भवति। तिरोभूय। अंतर्द्धाविति किं ? तिरोभूत्वा स्थितः।

वा कृञि ॥ १६९ ॥ तिरस्शब्दोऽतर्द्धौ कृञि तिसंज्ञो भवति वा। तिरस्कृत्य। तिरस्कृत्वा।

***मनस्युरस्युपाजेऽन्वाजेमध्येपदेनिवचने ॥ १७० ॥** एतानि शब्दरूपाणि झिसंज्ञकानीवंतप्रतिरूपाणि कृञि वा तिसंज्ञानि भवंति। मनसिकृत्य, मनसि कृत्वा। उरसिकृत्य, उरसि कृत्वा। उपाजेकृत्य, उपाजे कृत्वा। अन्वाजेकृत्य। अन्वाजे कृत्वा। मध्येकृत्य, मध्ये कृत्वा। पदेकृत्य, पदे कृत्वा। निवचनेकृत्य, निवचने कृत्वा। झत्येिव—मनसि कृत्वा सुखं गतः। उरसि कृत्वा पाणिं शेते।

***स्वाम्येऽधिः ॥ १७१ ॥** स्वामित्वेऽधिर्वा कृञि तिसंज्ञो भवति। ग्रामे पुत्रमधिकृत्य, अधिकृत्वा च। स्वाम्ये इति किं ? अर्चात्यधिकृत्य।

***साक्षादाद्यच्वि ॥ १७२ ॥** साक्षादादिशब्दरूपमच्वि अच्व्यंतं कृञि तिसंज्ञं वा भवति। साक्षात्कृत्य, साक्षात् कृत्वा। मिथ्याकृत्य, मिथ्या कृत्वा। अच्वीति किं ? उष्णीकृत्य।

हस्तेपाणौ स्वीकृतौ तिः ॥ १७३ ॥ एतौ कृञि तिसंज्ञौ स्तः स्वीकृतावात्मीकरणे। हस्तेकृत्य। पाणौकृत्य। स्वीकृताविति किं ? हस्ते कृत्वा कार्षापणं गतः। पुनस्तिग्रहणं नित्यार्थं।

प्राध्वं बंधे ॥ १७४ ॥ प्राध्वंशब्दो बंधेऽर्थे कृञि तिसंज्ञो भवति। प्राध्वंकृत्य। बंध इति किं ? प्राध्वं कृत्वा शकटं गतः।

जीविकोपनिषदिवे ॥ १७५ ॥ एताविवार्थे कृञि तिसंज्ञौ स्तः। जीविकाकृत्य। उपनिषत्कृत्य। इव इति किं ? जीविकां कृत्वा गतः।

प्राग्धोस्ते ॥ १७६ ॥ ते गितिसंज्ञकाः धोः प्रागेव प्रयोक्तव्याः। तथा चोदाहृतं।

लो मं ॥ १७७ ॥ लादेशो मसंज्ञो भवति। मिप् वस् मस्। सिप् थस् थ। तिप् तस् झि। शतृ च। नपनिर्देशः देन बाधनार्थः। आक्रमते चद्रमाः। संगस्यते वत्सो मात्रा।

इङानं दः ॥ १७८ ॥ इङ् आनश्च दसंज्ञौ भवतः। इट् वहि महि। थास् आथां ध्वम्। त आतां झङ्। शानश्च।

मिङस्त्रिशोऽस्मद्युष्मदन्याः ॥ १७९ ॥ मिङो मदसंज्ञानि त्रीणि त्रीणि वचनानि अस्मद् युष्मद् अन्य इत्येवं संज्ञानि भवंति। मिप् वस् मसित्यस्मद्। सिप् थस् थेति युष्मद्। तिप् तस् झीत्यन्यः। दानामप्येवं।

साधने स्वार्थे ॥ १८० ॥ स्वस्य स्वो वा अर्थः स्वार्थस्तस्मिन् स्वार्थे साधनेऽस्मदादयो ज्ञेयाः। अस्मत्पदस्यार्थे साधनेऽस्मत्त्रिकं। युष्मत्पदस्यार्थे युष्मत्त्रिकं। आभ्यामन्यस्यार्थेऽन्यत्त्रिकं। पचामि, अहं पचामीत्यादि। पचसि, त्वं पचसीत्यादि। पचति, स पचतीत्यादि। एवं देष्वपि योज्यं।

+पूर्वः सहोक्तौ ॥ १८१ ॥ तस्यास्मदादेः सहोक्तौ युगपद्वचने यः पूर्वः स प्रयोक्तव्यः। अहं च

त्वं च आवां पचावः । त्वं च स च युवां पचथः । अहं च त्वं च स च वयं पचामः ।

***हासे मन्योक्तौ युष्मन्मन्येऽ[तेः]स्मस्त्वेकं १८२** मन्योक्तौ मन्यवाचि हासे प्रहासे गम्यमाने युष्मद् भवति मन्ये मन्यतेस्त्वस्मदेकं च । एहि मन्ये रथेन यास्यसि नहि यास्यसि यातस्ते पिता । एहि मन्ये ओदनं भोक्ष्यसे नहि भोक्ष्यसे भुक्तः सोऽतिथिभिः । हास इति किं? एवं मन्यसे भक्तं भोक्ष्ये ।

एको द्विर्बहुश्चैकशः ॥१८३॥ तानि त्रीणि त्रीणि वचनान्येको द्विर्बहुरित्येवं संज्ञानि भवंति प्रत्येकं । मिब्रेकः । वस् द्विः । मस् बहुः । एवं सर्वत्र ।

सुपश्च ॥ १८४ ॥ सुपश्च त्रिकाण्येकद्विबहुसंज्ञान्येकशो भवंति । सुरेकः । औ द्विः । जस् बहुः । एवमन्यत्रापि । उभयत्र चशब्दः साधने स्वार्थे इत्यस्यापकर्षणार्थः । एकार्थे साधने एकः । द्व्यर्थे द्विः । बह्वर्थे बहुः । मिङ्षु सुप्सु च ।

***आप्परा विभक्ती हलचः ॥१८५॥** तेषां सुपां त्रिकाणां विभक्तीशब्दस्य हलः आकारपराः अचश्च पकारपराः संतः संज्ञा भवति । वा । इप् । भा । अप् । का । ता । ईप् ।

+जतिर्वैकाख्यायां बहुवत् ॥१८६॥ जातिरेकाख्यायां वर्तमाना बहुवद्वा भवति । संपन्नो यवः । संपन्नाः यवाः । जातिरिति किं? देवदत्तो यज्ञदत्तः । आख्यायामिति किं? गोत्वं । अश्वत्वं । व्यक्तिविवक्षायां बहुत्वं सिद्धं । जातिविवक्षायां पक्षे बहुवचनाय वचनं ।

+द्वौ चास्मदोऽनुपाधौ ॥ १८७ ॥ द्वौ एकश्चार्थोऽस्मदो वा बहुवद् भवत्यनुपाधौ । आवां ब्रूवः । वयं ब्रूमः । अहं ब्रवीमि । वयं ब्रूमः । अनुपाधाविति किं? पंडितावावां ब्रूवः । संयतोऽहं ब्रवीमि ।

+फल्गुनीप्रोष्ठपदस्य भं ॥ १८८ ॥ फल्गुनीप्रोष्ठपदयोर्द्वावर्थौ भशब्दवाच्यौ वा बहुवद् भवतः । कदा पूर्वे फल्गुन्यौ उदिते । कदा पूर्वाः फल्गुन्यः उदिताः । कदा पूर्वे प्रोष्ठपदे । कदा पूर्वाः प्रोष्ठपदाः । भमिति किं? फल्गुनीषु जाते फल्गुन्यौ माणविके ।

इति जैनेंद्रव्याकरणे शब्दार्णवचंद्रिकायां लघुवृत्तौ प्रथमस्याध्यायस्य द्वितीयः पादः ।

प्रथमाध्याये तृतीयः पादः ।

समर्थः पदविधिः ॥ १ ॥ पदसंबंधी विधिः समर्थो वेदितव्यः । पृथगर्थानामेकार्थीभावः परस्परं व्यपेक्षा च सामर्थ्यं । वक्ष्यति—इप्ताश्रितादिभिः—धर्मं श्रितः धर्मश्रितः । समर्थ इति किं? व्याचष्टे मुनिर्धर्मं श्रितः शिष्यो गुरुकुलं । भा तत्कृतयार्थेनोनैः—मदेन पटुः मदपटुः । समर्थ इति किं? दंती भ्रमति मदेन पटुः शास्त्रेण । अप्प्रकृतितदर्थाऽर्थादिभिः—रथाय दारु रथदारु । समर्थ इति किं? गच्छ त्वं रथाय दारुगृहे । का भ्यादिभिः—संसारात् भयं संसारभयं । समर्थ इति किं? ध्यानी निष्क्रामति संसारात् भयं भवसंकटे । ता—मोक्षस्य मार्गः मोक्षमार्गः । समर्थ इति किं? सुखमनंतं मोक्षस्य मार्गः स्वर्गस्य व्रतं । ईप्शौंडादिभिः । अक्षेषु शौंडः अक्षशौंडः । समर्थ इति किं? मूढः शक्तोऽक्षेषु शौंडः पिबति पानागारे ।

सः ॥ २ ॥ स इत्ययमधिकारो वेदितव्यः आपादपरिसमाप्तेः । वक्ष्यति—ता—मोक्षमार्गः । सप्रदेशाः "सांतः"इत्यादयः ।

सुप्सुपा ॥ ३ ॥ सुबंतं सुबंतेन सह सो भवति । इत्येतदप्यधिकृतं वेदितव्यं । वक्ष्यति—ईप् शौंडादिभिः । लक्षणं चेदं । तेन—काकतालीयं । अंधकवर्तकीयं । खल्वविल्वीयं । अजाकृपाणीयमित्यादि सिद्धं ।

हः ॥ ४ ॥ ह इत्ययमधिकारो ज्ञेयः षमित्यतः प्राग् । वक्ष्यति—प्रतिनाऽल्पे । सूपप्रति । हप्रदेशाः "हात्" प्रभृतयः ।

*** झिः सुब्व्यृद्ध्यृद्ध्यर्थाभावातीत्यसंप्रतिशब्दख्यातिपश्चाद्यथायुगपत्संपत्साकल्यांते॥५॥** सुबित्येवमाद्यर्थेषु यद् झिसंज्ञं वर्तते तत् सुबंतेन सह

हसो भवति । स्त्रीषु कथा वर्तते–अधिस्त्रि । गब्दिकानां ऋद्धेरभावः–दुर्गब्दिकं । मद्राणां ऋद्धिः–सुमद्रं । मक्षिकाणामभावो–निर्मक्षिकं । शीतस्यातीतिः–निःशीतं । तैसृकस्यायमकालः–अतितैसृकं । श्रीदत्तस्य शब्दख्यातिः–इतिश्रीदत्तं । इतिपूज्यपादं । रथानां पश्चात्–अनुरथं पदातिः । रूपस्य योग्यं–अनुरूपं । व्रतस्य सादृश्यं–सव्रतं । अर्थमर्थं प्रति–प्रत्यर्थं । ज्येष्ठानामनतिक्रमेण–अनुज्येष्ठं प्रविशंतु । योग्यसादृश्यवीप्सोत्तरपदार्थानतिवृत्तय इति चत्वारोऽपि यथार्थाः । युगपच्चक्रेण–सचक्रं धेहि । वृत्तस्य संपत् सवृत्तं साधूनां । तृणैः सह–सतृणमभ्यवहरति । कुंभस्य समीपं–उपकुंभं । प्राभृतमंतं कृत्वा–सप्राभृतमधीते । अंतशब्दोऽभ्यासेऽवसाने च वर्तते ।

***यावद्यथैवानिवे** ॥६॥ यावत्यथाशब्दौ एवार्थेऽनिवार्थे च सुबंतेन सह समस्येते स च हसो भवति । यावानोदनः–यावदोदनमतिथीन् भोजय । ये ये वृद्धाः–यथावृद्धं साधूनर्चय । एवानिव इति किं ? यावद् दत्तं तावद्भुक्तं । यथेंद्रदत्तः तथा देवदत्तः ।

***प्रतिनाऽल्पे** ॥ ७ ॥ प्रतिशब्देनाल्पार्थेन सुबंतेन सह सुबंतं हसो भवति । अल्पः शाकः–शाकप्रति । सूपप्रति । अल्प इति किं ? वृक्षं प्रति विद्योतते विद्युत् ।

***परिणा स्य्यक्षशलाकाः** ॥८॥ स्यिसंज्ञोऽक्षशलाकाशब्दौ च परिणा सह हसो भवति । एकेनेदं न तथा वृत्तं यथा पूर्वं जये । एकपरि । द्विपरि । त्रिपरि । चतुःपरि । पंचस्वेकरूपेषु जय एवेत्यजयाभावात् पंचपरीति न भवति । अक्षेणेदं न तथा वृत्तं यथा पूर्वं जये । अक्षपरि । शलाकापरि । स्याद्य इति किं ? पाशकेनेदं न तथावृत्तं ।

वा ॥ ९ ॥ वेत्याधिकारो वेदितव्यः । तत्रैवोदाहरिष्यामः ।

***पर्यपाङ्बहिरंचः** ॥ १० ॥ पर्यादयः सुबंतेन सह समस्यंते वा । परि त्रिगर्तं वृष्टो देवः । परि परित्रिगर्तेभ्यः । अपत्रिगर्तं । अप त्रिगर्तेभ्यः । आकुमारं यशः समंतभद्रस्य । आकुमारेभ्यः । बहिर्ग्रामं । बहिर्ग्रामात् । प्राग्ग्रामं । प्राग्ग्रामात् ।

लक्षणेनाभिमुख्येऽभिप्रती ॥ ११ ॥ आभिमुख्येऽर्थे वर्तमानावभिप्रतिशब्दौ लक्षणवाचिना सह वा हसो भवति । अग्निमभि, अभ्यग्नि शलभाः पतंति । अग्निं प्रति, प्रत्यग्नि शलभाः पतंति । लक्षणेनेति किं ? साधुर्मातरमभि । आभिमुख्य इति किं ? अभिनवोऽको यासां ताः–अभ्यंकाः गावः । अभिप्रतीति किं ? येनाग्निस्तेन गतः ।

***दैर्घ्येऽनुः** ॥ १२ ॥ दैर्घ्ये आयामविषये लक्षणवाचिसुबंतेनानुर्हसो भवति । गंगामन्वायता–अनुगंगं वाराणसी । अनुयमुनं मथुरा ।

***समीपे** ॥ १३ ॥ समीपेऽर्थे वर्तमानः सुबंतेन सहानुर्हसो भवति । वनमनु, अनुवनं गतोऽशनिः । अनूपाध्यायमधीते ।

तिष्ठद्ग्वादीनि च ॥ १४ ॥ एतानि च शब्दरूपाणि हसंज्ञानि भवंति । तिष्ठंति गावोऽस्मिन् काले गर्भग्रहणाय दोहनाय वा तिष्ठद्गु । वहद्गु । कालविशेषः । आयतीगवं । खलेयवं । खलेबुसं । लूनयवं । लूयमानयवं । चकारो नियमार्थः । तिष्ठद्ग्वादीन्येव समस्यंते । नान्यैः सह । परमं तिष्ठद्गु ।

***पारेमध्येऽतस्तया** ॥ १५ ॥ पारे मध्येऽतः शब्दाः तांतेन सह, हसो भवति वा । हसंनियोगे चायोरेत्वं निपात्यते । पारं गंगायाः–पारेगंगं । मध्यं समुद्रस्य–मध्येसमुद्रं । गिरेरंतः–अंतर्गिरं, अंतर्गिरि ।

***स्यिर्वंश्यैः** ॥ १६ ॥ वंश्यवाचिभिः सह स्यिः संख्यावाची समस्यते हसो भवति । एको मुनिर्वंश्योऽस्य एकमुनि । द्विमुनि । त्रिमुनि व्याकरणस्य ।

नदीभिश्च ॥ १७ ॥ नदीवाचिभिः स्यिर्हसो भवति । सप्त सिंधवः–सप्तसिंधु । एकनदं । द्वियमुनं । त्रिगोदावरं । चकारो नियमाय । नदीभिरेवान्यपदार्थनिराकांक्षाभिर्हो नान्यत्र । द्वे ईरावत्यौ यस्मिन् देशे स द्वीरावतीको देशः ।

***खौ** ॥ १८ ॥ नदीवाचिभिः सह हसो भवति खुविषये । उन्मत्ता गंगा अस्मिन्–उन्मत्तगंगं देशः । लोहितगंगं देशः । शनैर्गंगं । खाविति किं ? शीघ्रगंगो देशः ।

***ऽे ग्रहणे प्रहरणे च सरूपं युद्धे ॥ १९ ॥** आर्थे कर्मव्यतिहारे ग्रहणे प्रहरणे च वर्तमानं समानं रूपं तत्रैव वर्तमानेन सुबंतेन सह हसो भवति युद्धे वाच्ये । केशाश्च केशाश्च मिथो ग्रहणं यस्मिन् युद्धे तत्केशाकेशि । दंडाश्च दंडाश्चान्योन्यस्य प्रहरणं यस्मिन् तद्दंडादंडि युद्धं । सरूपमिति किं ? केशाश्च कचाश्च मिथो ग्रहणं यस्मिन् ।

षं ॥ २० ॥ षमिति प्राग् बसादधिकारो ज्ञेयः । इतः पर षसा भवतीति निश्चेयं ।

इपाऽच्च प्राप्तापन्ने ॥ २१ ॥ प्राप्त आपन्न इत्येतौ शब्दौ इबंतेन सह षसो भवत्यकारश्चैतयोः । प्राप्तो जीविकां प्राप्तजीविकः । आपन्नजीविकः । प्राप्ता जीविकां प्राप्तजीविका । आपन्नजीविका ।

***इप्तच्छ्रितादिभिः ॥ २२ ॥** ताभ्यां श्रितादिभिश्च सह षसो भवति इबंतं पूर्वपदं । जीविकां प्राप्तः जीविकाप्राप्तः । सुखापन्नः । श्रीश्रितः । दुःखातीतः । मोक्षगतः । बहुवचनादाकृतिगणोऽयं । तेन तत्त्वबुभुत्सुः । व्यसनपतितः । ओदनबुभुक्षुरित्यादि सिद्धं ।

***सामिस्वयं क्तेन ॥ २३ ॥** सामिस्वयंशब्दौ झिसंज्ञकौ क्तांतेन सह षसो भवति । सामिकृतं । सामिभुक्तं । स्वयंधौतौ पादौ । स्वयंविलीनमाज्यं । ऐकपद्यं संघाताद् हृदुत्पत्तिश्च प्रयोजनं । सामिभुक्तस्यापत्यं सामिभुक्तिः ।

खट्वाऽक्रमे ॥ २४ ॥ खट्वा इबंता अक्रमे गम्यमाने क्तांतेन सह षसो भवति । खट्वारूढो जाल्मः । खट्वाप्लुतः । अक्रम इति किं ? खट्वारूढोऽध्यापकोऽध्यापयति ।

कालाः ॥ २५ ॥ कालवाचिनः शब्दाः इबंताः क्तांतेन सह षसो भवति । अहरतिश्रिताः । रात्रिसंक्रांताः मुहूर्ताः । काला इति किं ? क्रोशं कुटिला नदी ।

***व्याप्तौ ॥ २६ ॥** व्याप्तावविच्छेदेऽर्थे इबंताः कालाः सुपा सह षसो भवति । अत्यंतरमणीयं । अत्यंतसुखं । सर्वरात्रकल्याणी ।

गुणोक्त्येषत् ॥ २७ ॥ ईषदित्येतत् गुणवचनेन सह षसो भवति । ईषदपत्यं पिंगलः ईषदुपिंगलः । ईषद्विकटः । गुणोक्त्येति किं ? ईषद्भुक्तः । ईषद्गार्ग्यः ।

***भा तत्कृतयार्थेनोनैः ॥ २८ ॥** भांतं पूर्वपदं भांतार्थकृतार्थया गुणोक्त्या अर्थेन ऊनवाचिभिश्च सह षसो भवति । शंकुलया कृतः खंडः शंकुलाखंडः । मदपटुः । गिरिणा कृतः काणः गिरिकाणः । कुसुमसुरभिः । पुण्येनार्थः पुण्यार्थः । माषोनं । तत्कृतयेति किं ? अक्ष्णा काणः ।

***पूर्वादिभिः ॥ २९ ॥** भांतं पूर्वादिभिः सह समस्यते । मासेन पूर्वः मासपूर्वः । संवत्सरावरः । पितृसदृशः । असिकलहः । वाङ्निपुणः । गुणमिश्राः धानाः । जिह्वाश्लक्ष्णः । कुलसमः ।

साधनं कृता बहुलं ॥ ३० ॥ साधनं कारकं भांतं कृदंतेन सह बहुलं षसो भवति । आत्मना कृतं आत्मकृतं । विषहतः । नखनिर्भिन्नः । काकपेया नदी । श्वलेह्यः कूपः । कुक्कुटसंपात्याः ग्रामाः । कंटकसंचेय ओदनः । कचिन्न स्यात् । श्वभिर्लेढव्यः । दात्रेण लूनवान् । साधनमिति किं ? पुत्रेणागतः । कृतेति किं ? धान्येन धनवान् ।

***अप्प्रकृतितदर्थाऽर्थादिभिः ॥ ३१ ॥** अबंतं पूर्वपदं प्रकृत्या तदर्थार्थशब्देन तदादिभिश्चान्यैः सह षसो भवति । रथाय दारु—रथदारु । कुंडलहिरण्यं । पित्रे इदं पित्रर्थं । मात्रर्थं । देवबलिः । गोहितं । गोरक्षितं । प्रजासुखं । प्रकृत्यादिभिरिति किं ? रंधनाय स्थाली । समर्थ इति किं ? गच्छ त्वं रथाय दारु देवदत्तस्य गृहे ।

+अपाऽलं ॥ ३२ ॥ अलमबंतेन सह षसो भवति । अलं जीविकायै—अलंजीविकः । अपेति किं ? अलमतिप्रसंगेन ।

***का भ्यादिभिः ॥ ३३ ॥** कांतं पूर्वपदं भीप्रकृतिभिः सह षसो भवति । वृकेभ्यो भीः वृकभीः । वृकभयं । वृकभीतः । संसारभीतिः । पापापेतः । सुखापोढः । रथापत्रस्तः । भवमुक्तः ।

***स्तोकारादर्थकृच्छ्रं क्तेन ॥ ३४ ॥** स्तोकार्था आरादर्थाः कृच्छ्रशब्दश्च क्तांतेन सह षसो भवति । स्तोकान्मुक्तः । अल्पान्मुक्तः । कतिपयान्मुक्तः ।

दूरादागतः । विप्रकृष्टादागतः । समीपादागतः । अंतिकादागतः । कृच्छ्राल्लब्धः ।

***ईप् शौंडादिभिः ॥ ३५ ॥** ईबंतं पूर्वपदं शौंडादिभिः सह पसो भवति । अक्षेषु शौंडः—अक्षशौंडः । पानशौंडः । अक्षधूर्तः । पानधूर्तः । अक्षाकितवः । पानकितवः ।

ऋणे य्व्यैः ॥ ३६ ॥ यादिव्यांतैः सह ईबंतं ऋणे गम्यमाने पसो भवति । मासे देयं ऋणं मासदेयं । संवत्सरदेयं । त्र्यहदेयं । ऋण इति किं ? मासे देया भिक्षा । य्व्यैरिति किं ? मासे दातव्यं ।

खौ ॥ ३७ ॥ खुविषये ईबंतं सुबंतेन सह षं स्यात् । अरण्येतिलकाः । वनेहरितक्यः । कूपेपिशाचकाः । पूर्वाह्णेस्फोटकाः । "ईपोऽद्व्लः" इत्यनुप् ।

***तत्राहोरात्रांशाः क्तेन ॥ ३८ ॥** तत्र अहरवयववाचि रात्र्यवयववाचि च ईबंतं क्तांतेन सह षं स्यात् । तत्रभुक्तं । तत्रपीतं । पूर्वाह्णकृतं । अपराह्णकृतं । पूर्वरात्रकृतं । अपररात्रकृतं । तत्राहोरात्रांशा इति किं ? शुक्लपक्षे कृतं । क्तेनेति किं ? मध्याह्ने भोक्ता ।

क्षेपे ॥ ३९ ॥ क्षेपे गम्ये ईबंतं क्तांतेन सह पं भवति । अवतप्तेनकुलस्थितं । भस्मनिहुतं । प्रवाहेमूत्रितं । पे कृति बहुलमित्यनुप् ।

***ध्वांक्षादिभिः ॥ ४० ॥** ध्वांक्षप्रकारैः क्षेपे कुत्सायां ईबंतं पसो भवति । तीर्थे ध्वांक्ष इव तीर्थध्वांक्षः । तीर्थकाकः । तीर्थश्वा । श्मशानसारमेयः ।

पात्रेसमितादयः ॥ ४१ ॥ पात्रेसमितादयः शब्दाः गणपाठादेव पसंज्ञाः निपात्यंते क्षेपे कुत्सायां गम्यमाने । पात्र एव समिताः—पात्रेसमिताः । उदंबरे मशक इव—उदम्बरमशकः । उदंबरकृमिः । कूपमंडूकः । अवटकच्छपः । नगरकाकः । मातरिपुरुषः । पिंडीशूरः । गेहेनर्दी । गोष्ठेपंडितः । गर्भेतृप्तः ।

पूर्वकालैकसर्वजरत्पुराणनवकेवलं यश्चैकाश्रये ॥ ४२ ॥ पूर्वकालवाचि एकादीनि च एकाश्रये समानाधिकरणे सति सुपा सह यसो भवति पसश्च । पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः । दग्धप्ररूढः । कृष्टमथीकृतं । एकचर्या । सर्वपदार्थाः । जरत्तार्किकः । पुराणान्नं । नवान्नं । केवलज्ञानं । चकारः पसंज्ञासमावेशार्थः । मोषिका चासौ गौश्च मोषिकगवी । यपाश्रयौ पुंवद्भावौ सिद्धौ । एकाश्रये इति किं ? एकस्याः शाटी ।

***दिगधिकं खुहृद्यौ ॥ ४३ ॥** दिग्वाची अधिकशब्दश्चैकाश्रये सुपा पसो भवति यसश्च खौ हृति च विषये यौ च परतः । खुविषये—दिक् । दक्षिणाः कोशलाः दक्षिणकोशलाः । उत्तरकोशलाः । हृद्विषये—दक्षिणस्यां शालायां भवः दाक्षिणशालः । औत्तरशालः । अधिकया षष्ट्या क्रीतोऽधिकषाष्टिकः । युविषये—दक्षिणा शाला प्रिया यस्य दक्षिणशालप्रियः । अधिको गौर्धनमस्य अधिकगवधनः । खुहृद्याविति किं ? उत्तरो ग्रामः ।

***स्यिः समाहारे रश्चाखौ ॥ ४४ ॥** स्यिः संख्यावाची सुबंतेनोत्तरपदेन सह षसो भवति यश्च समाहारे वाच्ये खुहृद्यौ च रसंज्ञश्चाखौ । स्यिः—पंचपूली । पण्णगरी । खौ—पंचाम्राः । दशवटाः । हृद्विषये—पचानां नापितानामपत्यं पांचनापितिः । यौ—पंच गावो धनमस्य पंचगवधनः । दशगवधनः । रश्चेति चकारः पसंज्ञासमावेशार्थः । द्वे अंगुली समाहृते द्व्यंगुली । पाश्रयः अः सांतः । राद् ङीश्च । अखाविति किं ? पंचपर्णानामिदं पांचर्पं । रश्चेत् "रादुवनपत्ये" अणः उप् स्यात् ।

***कुत्स्योऽपापाणकैः ॥ ४५ ॥** पापाणकमुक्तैरर्थात् कुत्सनैः सह कुत्स्यवाची शब्दः पसो भवति । वैयाकरणखसूची । क्षत्रियभीरुः । श्रोत्रियकितवः । भिक्षुविटः । कुत्स्य इति किं ? वैयाकरणश्चौरः । अपापाणकैरिति किं ? पापकुलालः । अणकनापितः । विशेष्यपूर्वनिपातार्थं वचनं ।

सामान्येनोपमानं ॥ ४६ ॥ सामान्यवाचिना सहोपमानं सुबंतं पसो भवति । शस्त्रीव श्यामा शस्त्रीश्यामा । मृगीव चपला मृगचपला । हंसगद्गदा । न्यग्रोधपरिमंडला । शरकांडगौरी । दूर्वाकांडश्यामा । सामान्येनेति किं ? पर्वता इव वलाहकाः । फाला इव तंडुलाः । उपमानमिति किं ? रामा श्यामा ।

***व्याघ्रादिभिरुपमेयोऽतद्योगे ॥ ४७ ॥** एतैः सहोपमेयः षसो भवति तस्य सामान्यस्यायोगे। पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः । पुरुषसिंहः । पुरुषर्षभः। अतद्योग इति किं ? पुरुषोऽयं व्याघ्र इव शूरः ।

विशेषणं विशेष्येणेति ॥ ४८ ॥ विशेषणवाचि सुबंतं विशेष्येण सह षसो भवत्येकाश्रये यश्च । नीलोत्पलं । लोहितशाटी। कृष्णसर्पः । लोहिताहिः । गौरसर्षपः । कृष्णकंबलः । विशेषणमिति किं ? तक्षकः सर्पः । विशेष्येणेति किं ? लोहितस्तक्षकः । इतिशब्दो लौकिकविवक्षार्थः । रामो जामदग्न्यः । अर्जुनः कार्तवीर्यः । वाक्यमेव ।

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराः ॥ ४९ ॥ पूर्वादयः समस्यंते सुबंतैः षसो भवति यश्च सहैकाश्रये । पूर्वपुरुषः । अपरपुरुषः । अपरकायः । प्रथमपुरुषः । चरमपुरुषः । जघन्यपुरुषः । समानपुरुषः । मध्यपुरुषः । मध्यमपुरुषः । वीरपुरुषः ।

***श्रेण्यादिः कृतादिभिः च्वौ ॥ ५० ॥** श्रेणिप्रभृतयः समस्यंते कृतादिभिः सह च्व्यर्थे गम्यमाने । अश्रेणयः श्रेणयः कृताः श्रेणिकृताः । श्रेणिमताः । पूगकृताः । पूगमताः । ऊककृताः । ऊकमताः । च्वाविति किं ? श्रेणयः कृताः ।

***विसमाप्तौ क्तः ॥ ५१ ॥** विसमाप्तौ ईषदनिष्पत्तौ क्तांतं समस्यते अर्थात्क्तांतेन । कृतं चाकृतं च कृताकृतं । भुक्ताभुक्तं। पीतापीतं । पीतविपीतं । कृतापकृतं । क्लिष्टाक्लिशितं । पूतापवितं । विसमाप्ताविति किं ? सिद्धं चाभुक्तं च ।

+नानिटेट् ॥५२॥ सेट् क्तांतमनिटा क्तांतेन सह षसो न भवति । क्लिशिताक्लिष्टं । पवितापूतमिति न भवति ।

सन्महत्परमोत्तमोत्कृष्टं पूज्येन ॥ ५३ ॥ एते पूज्येन सह समस्यंते एकाश्रये । संश्चासौ पुरुषश्च सत्पुरुषः । महापुरुषः । परमपुरुषः । उत्तमपुरुषः । उत्कृष्टपुरुषः। पूज्येनेति किं ? उत्कृष्टा गौ कर्दमात् ।

तद् वृंदारकनागकुंजरैः ॥ ५४ ॥ तत् पूज्यं वृंदारकादिभिः सह षसो भवति । गौ श्चासौ वृंदारकश्च गोवृंदारकः । गोनागः । अश्वनागः । गोकुंजरः । मुनिकुंजरः । तदिति किं ? सुसीमो नागः।

***कतरकतमौ जातिप्रश्ने ॥ ५५ ॥** कतरकतमौ एकार्थौ जातिप्रश्ने गम्यमाने षसो भवति। कतरगार्ग्यः । कतमगार्ग्यः । जातिप्रश्ने इति किं ? कतरो भवतोर्देवदत्तः ।

क्षेपे किं ॥ ५६ ॥ किमेतत् सुबंतेन सह समस्यते क्षेपेऽर्थे । स किंराजा यो न रक्षति प्रजाः। स किंसखा यो मित्रं द्रुह्यति । स किंवैयाकरणो यः शब्दं न ब्रूयात् । क्षेपे इति किं ? को राजा मान्यखेटे ।

पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ॥ ५७ ॥ पोटादिभिः सह जातिवाची शब्दः समस्यते । इभ्या चासौ पोटा च इभ्यपोटा । क्षत्रिययुवतिः । अग्निस्तोकं । घृतकतिपयं । गोगृष्टिः । गोधेनुः । महिषवशा । गोवेहत् । गोवष्कयणी । कठप्रवक्ता । कठश्रोत्रियः । कलापाध्यापकः । कठधूर्तः । जातिरिति किं ? देवदत्ता पोटा ।

चतुष्पाद्गर्भिण्या ॥ ५८ ॥ चतुष्पाद् जातिः गर्भिणीशब्देन सह षसो भवति । गोगर्भिणी । अजगर्भिणी । चतुष्पादिति किं ? ब्राह्मणी गर्भिणी । जातिरित्येव–स्वस्तिमती गर्भिणी ।

प्रशंसोक्त्या ॥ ५९ ॥ प्रशंसावचनेन सह जातिः समस्यते। गोप्रकांडं। गोमतल्लिका। अश्वप्रकांडं। अश्वमतल्लिका। गोमचर्चिका। अश्वमचर्चिका।

युवा खलतिपलितजरद्वलिनैः ॥ ६० ॥ खलत्यादिभिः सह युवा समस्यते। युवखलतिः । युवपलितः । युवजरन् । युववलिनः । युवतिः खलतिः युवखलतिः। युवपलिता। युवजरती। युववलिना।

व्यतुल्याख्या अजात्या ॥ ६१ ॥ व्यांतास्तुल्याख्याश्च अजात्या सह षसो भवति । भोज्यं च तदुष्णं च भोज्योष्णं । पानीयशीतं । हरणीयपूर्णो घटः। तुल्यश्वेतः। तुल्यरोहितः। तुल्यमहान्। सदृक्श्वेतः । सदृशश्वेतः । अजात्येति किं ? भोज्य ओदनः । तुल्यो वैश्यः ।

***कुमारः श्रमणादिना ॥ ६२ ॥** कुमारः शब्दः श्रमणादिभिः सह षसो भवत्येकाश्रये । कुमारी चासौ श्रमणा च कुमारश्रमणा । कुमारप्रव्रजिता । कुमारतापसी । कुमाराध्यापकः । कुमाराध्यापिका ।

मयूरव्यंसकादयश्च ॥ ६३ ॥ मयूरव्यंसकादयः शब्दाः षसंज्ञाः गणपाठादेव निपात्यंते । विगतौ विसृतावंसावस्य व्यंसो व्यंस इव व्यंसकः । व्यंसको मयूरः मयूरव्यंसकः । छात्रव्यंसकः । कंबोजमुंडः । यवनमुंडः । चकारोऽवधारणार्थस्तेन मयूरव्यंसकादय एव समस्यंते । अन्यैः सह वृत्त्यंतरं न लभंते । परमो मयूरव्यंसकः ।

कालाः मेयैः ॥ ६४ ॥ कालवाचिनः शब्दाः मेयैः परिच्छेद्यैः सह षसो भवति । मासो जातस्य मासजातः । संवत्सरजातः । द्व्यहजातः ।

नञ् ॥ ६५ ॥ नञ् सुपा सह समस्यते । अगौः । अनेकः । अधर्मः ।

+वर्णो वर्णैः ॥ ६६ ॥ वर्णवाचि वर्णवाचिभिः सह षसो भवति । शुक्लश्चासौ कृष्णश्च शुक्लकृष्णः । रोहितपांडुः । कृष्णसारंगः । विशेषणविशेष्यभावो नास्तीति वचनं । शुक्लकृष्णाद्यर्थानामन्योन्यस्य विशेषणसमुदाये वर्तमानस्य शुक्लादेरंशद्वारेण विशेषणत्वमित्यनियमेन पूर्वनिपातः प्रयोजनं ।

+पूर्वापराधरोत्तरमभिन्नेनांशिना ॥ ६७ ॥ पूर्वादीन्यंशवाचीन्यंशवाचिना अभिन्नेन षं भवति । पूर्वं कायस्य पूर्वकायः । अपरकायः । अधरकायः । उत्तरकायः । पूर्वादीति किं ? दक्षिणं कायस्य । अभिन्नेनेति किं ? पूर्वः छात्राणां । अंशिनेति किं ? पूर्वं नाभेः कायस्य ।

+अर्द्धं नप् ॥ ६८ ॥ अर्द्धं नपुंसकं समस्यते अंशिना सह । अर्द्धं पिप्पल्याः—अर्द्धपिप्पली । अर्द्धखट्वा । नबिति किं ? ग्रामोऽर्द्धो देशः ।

+द्वित्रिचतुर्डड् वा ॥ ६९ ॥ एभ्यो डट् तदंतं अंशिना वा षसो भवत्यभिन्नेन । द्वितीयं भिक्षायाः द्वितीयभिक्षा । भिक्षाद्वितीयं । तृतीयभिक्षा । भिक्षातृतीयं । चतुर्थभिक्षा । भिक्षाचतुर्थः । द्व्यादीति किं ? पंचमं भिक्षायाः ।

ता ॥ ७० ॥ तांतेन सुबंतेन सह षसो भवति । स्वर्गसुखं । मोक्षमार्गः । राजपुरुषः ।

कृति ॥ ७१ ॥ कृत्प्रयोगे या ता तदंतं सुपा समस्यते । इध्मानां व्रश्चनः इध्मव्रश्चनः । पलाशशातनः । अविलवनः । श्मश्रुकर्तनः ।

याजकादिभिः ॥ ७२ ॥ एतैः सह तांतं षसो भवति । देवानां याजकः देवयाजकः । शंभवनाथपूजकः । गुरुपरिचारकः । गुरुपरिवेषकः । तद्योजकः । अर्थवाचकः ।

+पत्तिरथं गणके ॥ ७३ ॥ पत्तिरथशब्दौ तांतौ गणकेन सह समस्येते । पत्तीनां गणकः पत्तिगणकः । रथगणकः । पत्तिरथमिति किं ? कार्षापणानां गणकः ।

न प्रतिपदं ॥ ७४ ॥ प्रतिपदं या ता तदंतं न समस्यते । फलानां तृप्तः । सर्पिषो ज्ञानं । शतस्य द्यूतं ।

निर्द्धारणे ॥ ७५ ॥ निर्द्धारणे जातिगुणक्रियाभिः समुदायादेकदेशस्य निष्कृष्य धारणे या ता तदंतं न समस्यते । मनुष्याणां क्षत्रियः शूरतमः । नारीणां श्यामा दर्शनीयतमा । अध्वगानां धावंतः शीघ्रतमाः । गवां कृष्णाः संपन्नक्षीरतमाः ।

***डड्क्षिसत्तव्यैकद्रव्यैः॥७६॥** एतैः सह तांतं षसो न भवति । चक्रधराणां पंचमः । तीर्थकृतां षोडशः । बलदेवानां नवमः । ग्रामस्य पुरस्तात् । वृक्षस्योपरि । देवदत्तस्य कुर्वन् । देवदत्तस्य कुर्वाणः । देवदत्तस्य कर्तव्यं । आचार्यस्य श्रीदत्तस्य । शुकस्य माराविदस्य ।

***गुणैरस्वस्थैरविंशत्यादिभिः ॥ ७७ ॥** अस्वस्थैर्गुणैस्तांतं न समस्यते विंशत्यादिवर्जितैः । काकस्य कार्ष्ण्यं । वलाकायाः शौक्ल्यं । कंटकस्य तैक्ष्ण्यं । नात्र कार्ष्ण्यादेर्गुणस्य स्वास्थ्यं प्रतीयते । कृष्णः काक इति यथा । गुणैरिति किं ? राजपुरुषः । अस्वस्थैरिति किं ? कन्यारूपं । कपित्थरसः । चंदनगंधः । स्तनस्पर्शः । अविंशत्यादिभिरिति किं ? गोविंशतिः । गोशतं । सूत्रलाघवं । वचनप्रामाण्यं ।

कर्तरि क्तेन ॥ ७८ ॥ कर्तरि या ता तदंतं क्तेन सह षसो न स्यात् । इदमेषामासितं । इदमेषां यातं । इदमेषां भुक्तं । राज्ञां मतः । राज्ञां पूजितः । राज्ञामर्चितः । राज्ञामिष्टः ।

***द्विप्राप्तौ भायां ॥ ७९ ॥** कर्तरि भायां सत्यां द्विप्राप्तौ कृति कर्मणि या ता तदंतं षं न स्यात् । आश्चर्यो गवां दोहोऽगोपालकेन । रोचते मे ओदनस्य भोजनं देवदत्तेन । साधु खलु पयसः पानं विष्णुमित्रेण । द्विप्राप्ताविति किं ? देवदत्तः कृतो जिनदत्तेन । भायामिति किं ? साध्विदं शब्दानुशासनमाचार्यस्य ।

***ण्वुतृज्भ्यां ॥ ८० ॥** आभ्यां योगे कर्तरि या ता तदंतं सो न भवति । भवतः शायिका । भवतः आसिका । भवतोऽग्रगामिका । तृजुत्तरार्थं ।

कर्त्तरि ॥ ८१ ॥ कर्त्तरि यौ ण्वुतृचौ ताभ्यां योगे कर्मणि या ता तदंतं न समस्यते । ओदनस्य भोजकः । सक्तूनां पायकः । अपां स्रष्टा । पुरां भेत्ता । कर्तरीति किं ? इक्षुभक्षिकां मे धारयसि ।

क्रीडाजीविकयोर्नित्यं ॥ ८२ ॥ क्रीडायां जीविकायां च ण्वुना सह तांतं नित्यं षसो भवति । उद्दालकपुष्पभंजिका । वारणपुष्पप्रचायिका । तालभंजिका । अवोपखादिका । नखलेखकः । अवस्करसूदकः । रमणीयकारकः । क्रीडाजीविकयोरिति किं ? पयसः पायसः ।

***तिकाङ्दुः ॥ ८३ ॥** अमी सुबंतेन सह समस्यंते । प्रगत्य । शुक्लीभूय । पटपटाकृत्य । खात्कृत्य । शोभनः पुरुषः सुपुरुषः । अतिपुरुषः । कुत्सितः पुरुषः कुपुरुषः । ईषत् पिंगलः—आपिंगलः । पापः पुरुषो दुष्पुरुषः ।

+प्रात्यवपरिनिःप्रत्यादयो गतक्रांतकुष्टग्लानक्रांतस्थितादिषु वेभ्यापूकेभिः ॥ ८४ ॥ प्रादयो गतादिष्वर्थेषु वांतादिभिः सह षसो भवति । तद्यथा-प्रादयो गतादिष्वर्थेषु वया । प्रगतः आचार्यः प्राचार्यः । संगतोऽर्थः समर्थः । अत्यादयः क्रांताद्यर्थेष्वेपा । अतिक्रांतः खट्वां—अतिखट्वः । उद्गतो वेलां उद्वेलः समुद्रः । अवादयः कुष्टादिषु भया । अवकुष्टं कोकिलया-अवकोकिलं वनं । अनुगतमर्थेन—अन्वर्थं वचः । पर्यादयो ग्लानादिष्वपा । परिग्लानोऽध्ययनाय पर्यध्ययनः । उद्युक्तः संग्रामाय-उत्संग्रामः । निरादयः क्रांतादिषु कया । निःक्रांतः कौशांब्याः—निःकौशांबिः । अपगतः शालायाः—अपशालः । प्रत्यादयः स्थितादिष्वीपा । प्रतिष्ठितमुरसि प्रत्युरसं ।

वागमिङ् ॥ ८५ ॥ अमिङंतं वाक्संज्ञं समर्थेन नित्यं षसो भवति । कुंभकारः । भारहारः । शरलावः । अमिङिति किं ? एधानाहारको व्रजति ।

ञिनामैव ॥ ८६ ॥ ञिसंज्ञकेन अमंतेनैव वागामिङ् षसो भवति । स्वादुंकारं भुंक्ते । लवणंकारं भुंक्ते । संपन्नंकारं भुंक्ते । अमेति किं ? कालो भोक्तुं । एवेति किं ? प्रथमं भोजं । प्रथमं भुक्त्वा गच्छति ।

वा भादि ॥ ८७ ॥ भादीनि वाक्संज्ञानि अमा सह वा समस्यंते । मूलकोपदंशं भुंक्ते । मूलकेनोपदंशं भुंक्ते । पार्श्वोपपीडं शेते । पार्श्वाभ्यामुपपीडं शेते । पार्श्वे उपपीडं शेते ।

क्त्वा ॥ ८८ ॥ क्त्वांतेन सह वा भादि षसो भवति । उच्चैःकृत्य, उच्चैः कृत्वा आचष्टे । नीचैःकृत्य, नीचैः कृत्वाचष्टे । भादीति किं ? अलं कृत्वा ।

***अवाऽन्यार्थेऽनेकं बं ॥ ८९ ॥** वांतवर्जितस्यान्यस्य पदस्यार्थेऽभिधेयेऽनेकं सुबंतं बसंज्ञः सो भवति । कंठे कृतं येन स कृतकंठः । उदरेमणिः । कंठेकालः । उरसिलोमा । उष्ट्रस्येव मुखमस्य-उष्ट्रमुखः । गुरुस्थानः । अवान्यार्थे इति किं ? वृष्टे देवे गतः । नपनिर्देशः किं ? लोहितगंगं देशः ।

+एकार्थं ॥ ९० ॥ एकार्थं समानाधिकरणमनेकं सुबंतं बसोऽवाऽन्यार्थे भवति । प्राप्तमुदकं यं स प्राप्तोदको ग्रामः । चित्रगुः । अप्रतिहतशासनः । अनंतगुणः । परमवाणीकः । अष्टगवधनः । अविद्यमानपुत्रः । मत्तबहुमातंगं वनं । अर्द्धतृतीयाः । एकार्थमिति किं ? पंचभिर्भुक्तमस्य ।

+ञिः ॥ ९१ ॥ ञिसंज्ञं बसो भवत्यवाऽन्यार्थे । उच्चैर्मुखं यस्य स उच्चैर्मुखः । अपुत्रः । अभार्यः । अस्तिक्षीरा गौः । सुमुखी कन्या ।

***सुर्ध्येऽ... स्यिनासन्नादूराधिकाध्यर्द्धार्द्धा-**

दिङ्ट् च ॥ ९२ ॥ आसन्नादीन्यर्धपूर्व डडंन्तानि क्षिसंज्ञानि च संख्येये वर्तमानेन स्यिसंज्ञावाचिना सह समस्यंते । आसन्ना दशानामिमे आसन्नदशाः । आसन्नविंशाः । अदूरदशाः । अदूराविंशाः । अधिकदशाः । अर्द्धेनाधिका विंशतिरिमे अध्यर्द्धविंशाः । अर्धं पंचमं यासां ताः अर्द्धपंचमाः विंशतयः इमे अर्द्धपंचमविंशाः नवतिरित्यर्थः । अर्द्धपंचमत्रिंशाः । समीपे दशानामिमे उपदशाः । उपविंशाः । उपत्रिंशाः । स्यिनेति किं ? आसन्नाः पुरुषाणामिमे । संख्येये इति किं ? अधिका विंशतिर्गवां । आसन्नादीति किं? संनिकृष्टा दशानामिमे ।

***स्यिः सुज्वाऽर्थे ॥ ९३ ॥** सुजर्थे वारे वाऽर्थे विकल्पे संशये वा स्यिसंज्ञावाचि बसो भवति संख्येये वर्तमानेन स्यिना । द्वौ वारौ दश इमे द्विदशाः । त्रिदशाः । चतुर्दशाः । द्वौ वा त्रयो वा द्वित्राः । त्रिचतुराः । पंचषाः । सप्तदशाः । सुज्वाऽर्थे इति किं ? द्वावेव न त्रयः ।

दिशोंऽतराले ॥ ९४ ॥ दिक्शब्दाः समस्यंतेंऽतरालेऽर्थे । दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदंतरालं सा दिक् दक्षिणपूर्वा । पूर्वदक्षिणा । दक्षिणापरा । उत्तरपूर्वा ।

***तेन सहेति तुल्ययोगे ॥ ९५ ॥** सहशब्दः तेनेति भांतेन सह तुल्ययोगे समानक्रियादियोगे बसो भवति । सह छात्रेणागतः सछात्रः । सपुत्रः आगतः । सशिष्यः । सरूपः । सकर्मकरः । तुल्ययोगे इति किं ? सहैव दशभिः पुत्रैर्भारं वहति रासभी । इतिशब्दादतुल्ययोगेऽपि सः । सपक्षको वादी ब्रूते इत्यादि सिद्धं ।

चार्थे द्वंद्वः ॥ ९६ ॥ चकृतोऽर्थश्चाऽर्थः । तस्मिन्नर्थेऽनेकं सुबंतं द्वंद्वसंज्ञः सो भवति । चकृतौ द्वावर्थौ । इतरेतरयोगसमाहारौ । प्लक्षन्यग्रोधौ । खदिरपलाशौ । छत्रोपानहं । वाग्दृषदं । वाक्त्वचं ।

+समानामेकः ॥ ९७ ॥ समानां तुल्यार्थानां शब्दानां चाऽर्थे एक एव प्रयोक्तव्यः । वक्रश्च कुटिलश्च वक्रौ कुटिलौ वा । सितश्च श्वेतश्च शुक्लश्च सिताः श्वेताः शुक्लाः वा । समानामिति किं ? धवखदिरपलाशाः ।

+सुप्यसंख्येयः ॥ ९८ ॥ सुपि सर्वत्र समानानां एकरूपाणां युगपत्प्रयोगे एक एव प्रयोक्तव्यः संख्येयं वर्जयित्वा । वृक्षश्च वृक्षश्च वृक्षौ । वृक्षश्च । वृक्षश्च वृक्षश्च वृक्षाः । हरिणी च हरिणी च हरिण्यौ । सुपीति किं ? मातृमातारौ । मातरौ । मातारौविति भेदः । असंख्येय इति किं ? । एकश्च एकश्च । द्वौ च द्वौ च । पूर्वं समानार्थाऽर्थं । इदं तु सरूपाऽर्थं ।

+त्यदादि च ॥ ९९ ॥ त्यदादिना अन्यदादिना च सह त्यदादेर्द्वंद्वे प्राप्ते त्यदादिरेक एव प्रयुज्यते । स च देवदत्तश्च तौ । कश्च देवदत्तश्च कौ । स च त्वं च युवां । त्वं च भवांश्च भवंतौ । स च स्थाली च ते । सा च देवदत्तश्च तौ । स च देवदत्ता च ते । स च कुंडं च ते । सा च कुंडं च ते । तच्च देवदत्तश्च तौ ।

+भ्रातृपुत्राः स्वसृदुहितृभिः ॥ १०० ॥ भ्रात्रर्थपुत्रार्थयोः स्वस्रर्थदुहित्रर्थाभ्यां प्रयोगे भ्रात्रर्थ पुत्रार्थावेव प्रयुज्येते । भ्राता च स्वसा च भ्रातरौ । सोदर्यश्च स्वसा च सोदर्यौ । भ्राता च भगिनी च भ्रातरौ । पुत्रश्च दुहिता च पुत्रौ । सुतश्च दुहिता च सुतौ । पुत्रश्च सुता च पुत्रौ । बहुवचनं पर्यायार्थं ।

+पिता मात्रा वा ॥ १०१ ॥ पितुः मात्रा प्रयोगे पिता वा प्रयोक्तव्यः । पिता च माता च पितरौ । मातापितरौ ।

+श्वशुरश्वश्रूभ्यां ॥ १०२ ॥ श्वशुरस्य श्वश्रूशब्देन प्रयोगे श्वशुरो वा प्रयोक्तव्यः । श्वशुरश्च श्वश्रूश्च श्वशुरौ ।

+वृद्धो यूनाऽनन्यार्थप्रकृतौ ॥ १०३ ॥ वृद्धस्य यूना सह प्रयोगे वृद्ध एव प्रयोक्तव्योऽनन्यार्थप्रकृतावभिन्नार्थप्रकृतौ । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । दाक्षिश्च दाक्षायणश्च दाक्षी । वृद्ध इति किं ? गर्गगार्ग्यायणौ । यूनेति किं ? गर्गगार्ग्यौ । अनन्यार्थप्रकृताविति किं ? भागवित्तिभागवित्तिकौ । वात्स्यायनशौनकायनौ । पूर्वत्र गर्हः सौवीरत्वं चान्योऽर्थोऽन्यत्राप्रकृतिः ।

+पुरुषः ॥ १०४ ॥ वृद्धाया यूना सह प्रयोगे

वृद्धवाची प्रयोक्तव्यः सा च वृद्धा स्त्री पुरुषः स्यात् । गार्गी गार्ग्यायणश्च गार्ग्यौ । औपगवी च औपगविश्च औपगव्यौ ।

+स्त्रिया ॥ १०५ ॥ पुरुषस्य प्राणिनः स्त्रिया सह प्रयोगे पुरुष एव प्रयोक्तव्यः । ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ । कठौ । मयूरौ । कुक्कुटौ । पटू ।

+ग्राम्यद्विखुरसंघेऽशिशौ स्त्री प्रायः॥१०६॥ ग्राम्यद्विखुराणां संघेऽशिशा स्त्रीपुरुषाणां युगपत् प्रयोगे स्त्री प्रयुज्यते प्रायः । गावश्चेमे गावश्चेमाः इमाः गावः । अजा इमाः । महिष्य इमाः । ग्राम्यग्रहणं किं ? रुरवश्चेमे रुरवश्चेमाः इमे रुरवः । द्विखुरेति किं ? अश्वाश्चेमे अश्वाश्चेमाः इमेऽश्वाः । संघ इति किं ? गौश्चायं गौश्चेयं इमौ गावौ । अशिशाविति किं ? वत्साश्चेमे वत्साश्चेमाः इमे वत्साः । प्राय इति किं ? उष्ट्राश्चेमे उष्ट्र्यश्चेमाः उष्ट्रा इमे ।

+नबनपैकं च वा ॥ १०७ ॥ नपुंसकमनपुंसकेन सह प्रयोगे नपुंसकं प्रयोक्तव्यमेकत्वं च वा स्यादनन्यार्थप्रकृतौ । शुक्लं च वस्त्रं शुक्लश्च कंबलः ते इमे शुक्ले । तदिदं शुक्लं वा । शुक्लं शुक्लश्च शुक्ला च बृहतिका तानीमानि शुक्लानि । तदिदं शुक्लं वा । अनपेति किं ? शुक्लं च शुक्लं च शुक्ले । अनन्यार्थप्रकृताविति किं ? शुक्लं च वस्त्रं कृष्णश्च कंबलः तौ शुक्लकृष्णौ ।

+सिद्ध्यार्थात् पुनर्वसुर्भे ॥१०८॥ सिद्ध्यार्थशब्दाद्द्वे वर्तमानात् परः पुनर्वसुशब्दः भे वर्तमानो द्वंद्वविषयो ह्यर्थः सान्नित्यमेकार्थो भवति । उदितौ सिद्ध्यपुनर्वसू । पुष्यपुनर्वसू । तिष्यपुनर्वसू । सिध्यार्थादिति किं ? आर्द्रापुनर्वसवः । भ इति किं ? तिष्यपुनर्वसवो माणवकाः ।

*वोक्तं पूर्वं ॥ १०९ ॥ सविभिसूत्रेषु वया निर्दिष्टं पूर्वं प्रयोक्तव्यं । अधिस्त्रि । धर्मश्रितः । भवभीः ।

राजदंतादौ ॥ ११० ॥ राजदंतादिषु पूर्वनिपातेऽप्राप्तं यत्पदं तत्पूर्वं प्रयोक्तव्यं । दंतानां राजा राजदंतः । वनस्याग्रे अग्रेवणं । पूर्वं वासितं पश्चाल्लिप्तं लिप्तवासितं । नग्नमुषितः । उलूखलमुसले । विश्वक्सेनार्जुनौ । दारजारौ । भार्यापती । जंपती । दंपती । श्वश्रूपती ।

+संख्याल्पा ॥ १११ ॥ से अल्पा संख्या पूर्वं प्रयोक्तव्या । द्विशती । त्रिशती । चतुर्दश । पंचषाः ।

*द्वंद्वे घिस्वेकं ॥ ११२ ॥ द्वंद्वे घिसंज्ञं सुसंज्ञं चैकं पूर्वं प्रयोक्तव्यं । कुशकाशं । तृणकाष्ठं । अग्निधूमं । वायुतोयं । मुनिगुप्तौ । घिस्विति किं ? कुक्कुटमयूरौ । एकमिति किं ? गुरुरविभास्करतनयाः । रविभास्करतनयगुरवः ।

अजाद्यत् ॥ ११३ ॥ अजाद्यकारांतमेकं पूर्वं प्रयोक्तव्यं द्वंद्वे । इंद्रचंद्रौ । उष्ट्रखरं ।

अल्पाच्तरं ॥ ११४ ॥ द्वंद्वे सेऽल्पाच्तरमेकं पूर्वं प्रयुज्यते । धवखदिरौ । वाग्वायू । प्लक्षन्यग्रोधं ।

+अर्च्यं ॥ ११५ ॥ द्वंद्वेऽर्च्यमभ्यर्हितं पूर्वं प्रयुज्यते । कामक्रोधौ । वधूवरौ । दीक्षातपसी । वासुदेवार्जुनौ ।

+वर्णभ्रात्रनुपूर्वं ॥ ११६ ॥ वर्णो भ्राता च द्वंद्वेऽनुपूर्वं क्रमेण पूर्वं प्रयोक्तव्यः । ब्राह्मणक्षत्रियौ । ब्राह्मणक्षत्रियविट्शूद्राः । भीमसेनार्जुनौ । रामलक्ष्मणौ । बलदेववासुदेवौ । युधिष्ठिरभीमसेनार्जुनाः ।

+समाज्भर्तु ॥ ११७ ॥ भं नक्षत्रं ऋतुश्च समाच् समानाक्षरमनुपूर्वं पूर्वं प्रयोक्तव्यं । अश्विनीभरण्यौ । भरणीकृत्तिकारोहिण्यः । हेमंतशिशिरौ । हेमंतशिशिरवसंताः । समाजिति किं ? पुष्यपुनर्वसू । ग्रीष्मवसंता ।

+धर्मार्थादिषु वा ॥ ११८ ॥ धर्मार्थादिकृतद्वंद्वेष्वप्राप्तः पूर्वनिपातो वा पूर्वं निपतति । धर्मार्थौ । अर्थधर्मौ । शब्दार्थौ । अर्थशब्दौ । कामार्थौ । अर्थकामौ । आद्यंतौ । अंतादी । गुणवृद्धी । वृद्धिगुणौ ।

*गुणस्त्यिस्त्रि बे ॥ ११९ ॥ गुणः स्त्रिसंज्ञं स्यिसंज्ञं च बसे पूर्वं प्रयोक्तव्यं । चित्रगुः । लंबकर्णः । सर्वकर्णः । विश्वदेवः । षडुन्नतः । पंचरक्तः ।

आहिताग्न्यादिषु ॥ १२० ॥ आहिताग्न्यादिषु बसेऽप्राप्तं पूर्वनिपातनं वा पूर्वं निपात्यते । आहिताग्निः । अग्न्याहितः । पुत्रजातः । जातपुत्रः ।

एवं–दंतजातः । श्मश्रुजातः । घृतपीतः । भार्योढः । अर्धगतः । शीर्षछिन्नः ।

+प्रियः ॥ १२१ ॥ प्रियो वा बसे पूर्वं प्रयोक्तव्यः । प्रियगुडः । गुडप्रियः ।

+गड्वादय ईपः ॥ १२२ ॥ ईबंतात् गड्डुप्रभृतयो बसे वा पूर्वं प्रयोक्तव्याः । गड्डुकंठः । कंठगड्डुः । गड्डुशिराः । शिरोगड्डुः ।

+क्तःचास्त्रे ॥ १२३ ॥ बसे क्तादीबंतावास्त्रवाचि पूर्वं वा प्रयोक्तव्यं । उद्यतोऽसिरनेन–अस्युद्यतः । उद्यतासिः । खड्गोद्गीर्णः । उद्गीर्णखड्गः । वज्रहस्तः । हस्तवज्रः । चक्रपाणिः । पाणिचक्रः । करवालकरः । करकरवालः । ईबाकर्षणार्थः चशब्दः ।

+कालाकृतिसुखादयः ॥ १२४ ॥ कालवाचिनः आकृतिर्जातिस्तद्वाचिनः सुखादयश्च बसे क्तांताद् वा पूर्वं प्रयोक्तव्याः । मासयाताः । यातमासाः । सांगरजग्धी । जग्धसांगरा । सुखयाता । यातसुखा । दुःखयाता । यातदुःखा ।

क्तः ॥ १२५ ॥ क्तांतं बसे पूर्वं प्रयोक्तव्यं । ज्ञातविश्वः । व्याख्यातशास्त्रः । भिक्षितभिक्षः । अवमुक्तोपानत्कः । विश्रुतकीर्तिः ।

*ये कडारादयः ॥१२६॥ यसे कडारादयो वा पूर्वं प्रयोक्तव्याः । कडारभद्रः, भद्रकडारः । गडुलशांडिल्यः, शांडिल्यगडुलः । बधिरांधः, अंधबधिरः । नटधूर्तः, धूर्तनटः । कूटदाक्षिः, दाक्षिकूटः ।

उत्तरपदं द्यु ॥ १२७ ॥ से यदुत्तरपदं तत् द्युसंज्ञं भवति । दशगवधनः । त्र्यह्नजातः द्युप्रदेशाः "दिगधिकं खुहृद्द्यौ" इत्यादयः ।

इति जैनेंद्रव्याकरणे शब्दार्णवचंद्रिकानाम्नि
लघुवृत्तौ प्रथमस्याध्यायस्य
तृतीयः पादः ।

अथ प्रथमाध्याये चतुर्थः पादः ।

कर्मणीप् ॥ १ ॥ कर्मणि कारके इब् विभक्ती भवति । कटं करोति । जैनेंद्रं पठति । पायसं भुंक्ते । आदित्यं पश्यति । अर्हिं लंघयति ।

+हांतरांतरेणातिधिक्निकषासमयाभिश्चोपाधौ ॥ २ ॥ हादिभिर्योगे इब् भवत्युपाधौ विशेषणे । हा देवदत्तं बर्द्धते व्याधिः । अंतरा गंधमादनं मालावंतं चोत्तराः कुरवः । अंतरा निषधं नीलं च विदेहाः । अंतरेण सौमनसं विद्युत्प्रभं च देवकुरवः । अंतरेण जलधिं हिमवंतं च भरतः । मोक्षमंतरेण नात्यंतिकं सुखं । अतिवृद्धं कुरून्महद्बलं । धिग्देवदत्तमयशः प्रवृद्धं । निकषा ग्रामं नदी । समया ग्रामं वनं । उपाधाविति किं ? प्रधाने व्याध्यादौ मा भूत् । चकारोऽनुक्तसमुच्चयार्थः । तेन— बुभुक्षितं न प्रतिभाति किंचित् । वृणीष्व भद्रे प्रतिभाति यत्त्वां ।

+पर्यभिसर्वोभयैस्तस्त्यैः ॥ ३ ॥ पर्यादिभिस्तस्यांतैर्योगे इब् भवति । परितो ग्रामं वनानि । अभितो ग्रामं । सर्वतो ग्रामं । उभयतो ग्रामं वनानि ।

+द्विरुक्तैरधोभिः ॥ ४ ॥ द्विरुक्तैरधोऽध्युपरिभिर्योगे इब् भवति । अधोऽधो ग्रामं । अध्यधि ग्रामं । उपर्युपरि ग्रामं ग्रामाः । द्विरुक्तैरिति किं ? अधो ग्रामस्य ।

*कालाध्वन्यभेदे ॥ ५ ॥ कालेऽध्वनि चोपाधौ इब् भवत्यभेदेऽत्यंतसंयोगे द्रव्यादिना । संवत्सरं क्षीरौदनं । शरदं मधुरा रमणीया । संवत्सरमधीते । क्रोशं शिकता । योजनं दीर्घो गिरिः । क्रोशमधीते । कालाध्वनीति किं ? स्थाल्यां पचति । अभेदे इति किं ? मासे मासस्य वा द्विरधीते ।

सिद्धौ भा ॥ ६ ॥ सिद्धौ क्रियाफलनिष्पत्तौ गम्यमानायां कालाध्वभ्यां भा भवत्यभेदे । मासेन प्राभृतमधीतं । क्रोशेन तर्कमधीतं । सिद्धाविति किं ? मासं काव्यमधीतं न च ज्ञातं ।

क्रियामध्ये केपौ ॥ ७ ॥ क्रिययोर्मध्ये कालाध्वभ्यां केपौ विभक्त्यौ स्तः । अद्य भुक्त्वा मुनिः द्व्यहाद् भोक्ता, द्व्यहे भोक्ता । इहस्थोऽयमिष्व.सः क्रोशात् क्रोशे वा विध्यति लक्ष्यं ।

*स्वती पूजायां तिः ॥ ८ ॥ पूजार्थे स्वतीशब्दौ तिसंज्ञौ स्तः । सुस्थाप्य गतः । अतिसिच्य गतः । पूजायामिति किं ? सुस्थित्वा गतः । काकुरियं ।

***न गिः ॥ ९ ॥** पूजार्थे स्वतीशब्दौ गिसंज्ञौ न स्तः । सुस्थितं भवता । अतिस्तुतं त्वया । गिनिमित्तं षत्वं नास्ति । पूजायामिति किं ? अतिषिक्तं किं तवात्र । कुत्सार्थोऽत्र ।

***अतिक्रमेऽतिर्गिर्गितिः ॥ १० ॥** अतिक्रमे आधिक्येऽतिर्गिर्गितिसंज्ञो न भवति । अतिसिक्तमेव भवता । अतिस्तुतमेव त्वया । अतिस्थित्वैव गतः । गिसंज्ञाश्रयं षत्वं तिसंज्ञाश्रयः सविधिश्च नास्ति । अतिक्रमे इति किं ? अतिशय्य गतः ।

पदार्थसंभावनाऽनुज्ञागर्हासमुच्चयेऽपिः॥११॥ एतेष्वर्थेष्वपिर्गिर्गितिसंज्ञो न भवति । सर्पिषोऽपि स्यात् । बिंदुः स्तोकं मात्रा अपिशब्दार्थः । अपिस्तुयाद् राजानं । अपिस्तुहि । धिग्ब्राह्मणमपि स्तुयात् वृषलं । धिग्ब्राह्मणमपि सिंचेत् पलांडुं । अपि सिंच । अपि स्तुहि ।

***व्यर्थौ पर्यधी ॥ १२ ॥** व्यर्थावनर्थांतरवाचिनौ पर्यधी गितिसंज्ञौ न भवतः । कुतः पर्यागतः । कुतोऽधिगत्वा । पर्यानतं । गितिसज्ञाश्रयः "प्राग्धोस्ते" इति प्रयोगनियमः सविधिर्णत्वं च न भवति ।

वीप्सेत्थंभूतलक्षणेऽभिनेप् ॥ १३ ॥ एष्वर्थेष्वभिना योगे इब् भवति गितिनिषेधश्च । वृक्षं वृक्षमभिसिंचति । साधुस्त्वं मातरमभिस्थितः । वृक्षमभिसजति ।

भागे चानुप्रतिपरिणा ॥ १४ ॥ भागेऽर्थे वीप्सादिष्वन्वादिभिर्योगे इब् भवति गितिसंज्ञानिषेधश्च । यदत्र मामनुस्यात् । मां प्रति स्यात् । मां परि स्यात् तदीयतां । वृक्षं वृक्षमनुसिंचति, प्रतिसिंचति, परिसिंचति । साधु त्वं मातरमनुस्थितः, प्रतिस्थितः । वृक्षमनुसजति, प्रतिसजति, परिसजति । भागे चेति किं ? परिषिंचत्योदनं ।

***भार्थेऽनुना ॥ १५ ॥** भार्थे हेत्वादावनुना योगे इब् भवति । ऋषभस्य प्रव्रज्यामनुप्राव्रजन् राजसहस्राणि । ज्ञानोत्पत्तिमन्वागमन् सुराः । शांतिनाथचरितपट्टकप्रसारणमनुप्रावर्षत् पर्जन्यः । तेन हेतुनेत्यर्थः । नदीमन्वसिता सेना । नद्या सहावस्थितेत्यर्थः ।

***उत्कृष्टे ॥ १६ ॥** अनुना योगे उत्कृष्टेऽर्थे इब् भवति । अनुपूज्यपादं वैयाकरणाः । अनुसमंतभद्रं तार्किकाः । अन्वकलंकदेवं शास्तारः ।

उपेन ॥ १७ ॥ उपेन योगे उत्कृष्टेऽर्थे इब् भवति । उपसिंहनंदिनं कवयः । उपाकलंकदेवं वादिनः । उपशालिभद्रमाढ्याः । उपार्जुनं योद्धारः ।

***ईप साधिके ॥ १८ ॥** उपेन योगे साधिकेऽर्थे ईब् भवति । उपखार्यां द्रोणः ।

***स्वेशेऽधिना ॥ १९ ॥** स्वे ईशितव्ये ईश्वरे च ईब् भवत्यधिना योगे । स्वे–अधिकुरुषु मेघेश्वरः । अधिमगधेषु श्रेणिकः । अधिमेघेश्वरे कुरवः । अधिश्रेणिके मगधाः ।

***काङाभिविधिमर्यादे ॥ २० ॥** आङा योगे का विभक्ती भवत्यभिविधिमर्यादयोः । आकुमारेभ्यो यशः समंतभद्रस्य । आपाटलिपुत्राद् वृष्टो देवः ।

वर्ज्येऽपपरिभ्यां ॥ २१ ॥ वर्ज्येऽर्थेऽपपरिभ्यां योगे का भवति । अपत्रिगर्तेभ्यो वृष्टो देवः । परित्रिगर्तेभ्यो वृष्टो देवः । परिपरित्रिगर्तेभ्यो वृष्टो देवः । वर्ज्ये इति किं ? अपशब्दो देवदत्तस्य ।

***यत्प्रतिमे प्रतिना ॥ २२ ॥** यतः प्रतिमा प्रतिदानं यतश्च प्रतिमा प्रतिनिधिः सादृश्यं ततः प्रतिना योगे का भवति न गितिसंज्ञा च । माषानस्मै तिलेभ्यः प्रतियच्छति । अर्ककीर्तिर्भरततः प्रति ।

***चेष्टागतिकर्मण्यप्राप्तेऽविपौ ॥ २३ ॥** चेष्टात्मिकायाः गतेः कर्मण्यसंप्राप्तेऽर्थेऽविपौ विभक्त्यौ स्तः । ग्रामाय गच्छति । ग्रामं गच्छति । नगराय व्रजति । नगरं व्रजति । चेष्टागतिकर्मणीति किं ? ग्रामादागच्छति । चेष्टाग्रहणं किं ? मनसा मेरुं गच्छति । गतिग्रहणं किं ? पचत्योदनं । अप्राप्त इति किं ? स्त्रियं गच्छति ।

संप्रदानेऽप् ॥ २४ ॥ संप्रदाने कारके अप् विभक्ती भवति । वज्रजघाय श्रीमतीमदात् । त्रिपृष्ठाय स्वयंप्रभामदात् । श्रीविजयाय सुतारामदात् अमोघजिह्वाय ग्रामशतमदात् । देवाय बलिं प्रयच्छति ।

+तादर्थ्ये ॥ २५ ॥ तादर्थ्ये अप् भवति । अवहननायोदूखलं । रंधनाय स्थाली ।

+क्लृप्यर्थैर्विकारे ॥ २६ ॥ क्लृप्यर्थैर्धुभिर्योगे विकारेऽर्थेऽप् भवति । मूत्राय प्रकल्पते यवागूः। श्लेष्मणे जायते दधि । तद्यवाग्वादिविकाररूपमापद्यते इत्यर्थः । विकार इति किं? सुकृतिनः संपद्यंते शालयः।

+ज्ञाप्येऽरिष्टेन ॥ २७॥ अरिष्टेन उत्पातेन ज्ञाप्येऽर्थे ज्ञाप्यमाने अप् भवति ।

वाताय कपिला विद्युदातपायातिलोहिनी ।
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत्॥

अरिष्टेनेति किं? मित्रस्येदं छत्रं ।

*ध्वर्थवाचोऽर्थात् कर्मणि ॥ २८ ॥ ध्वर्थो वाग् यस्य तस्य धोः कर्मण्यप् भवति तच्च ध्वर्थवागर्थात् न साक्षात् प्रयुक्तः । एधेभ्यो व्रजति। पुष्पेभ्यो व्रजति । पाकाय व्रजति । पक्तये व्रजति । ध्वर्थवाच इति किं? प्रविश पिंडीं । अर्थादिति किं ? एधानाहर्तुं व्रजति ।

*शक्तार्थनमःस्वस्तिस्वाहावषट्स्वधाहितैः ॥२९॥ शक्तार्थैर्नमःप्रभृतिभिश्च योगे अप् भवति। शक्तो जिनदत्तो देवदत्ताय । अलं मल्लो मल्लाय । नमोऽभिनंदनदेवाय। स्वस्ति प्रजाभ्यः। इंद्राय स्वाहा। वषडग्नये । स्वधा पितृभ्यः । आमयाविने हितं ।

प्रगर्हे मन्यकर्मण्यजीवे वा ॥ ३० ॥ प्रकर्षेण गर्हे गम्यमाने मन्यतेः कर्मणि जीववर्जिते वा अप् भवति । न त्वा तृणाय मन्ये। न त्वा तृणं मन्ये । न त्वा लोष्टाय मन्ये । न त्वा लोष्टं मन्ये । प्रग्रहणं किं? काष्ठं त्वां मन्ये। गर्हे इति किं? इंद्रनीलात् पद्मरागमधिकगुणं मन्ये। मन्ये ग्रहणं किं? न त्वा तृणं चिंतयामि। अजीव इति किं? न त्वा श्वानं मन्ये।

संज्ञो भा दे ॥ ३१ ॥ संपूर्वस्य जानातेः कर्मणि वा भा विभक्ती भवति दे । मात्रा संजानीते। मातरं संजानीते ।

*कर्तृकरणे ॥ ३२ ॥ कर्तरि करणे च कारके भा भवति। देवदत्तेन कृतं। जिनदत्तेन भुक्तं। विष्णुमित्रेण पीतं। दात्रेण लुनाति। परशुना छिनत्ति। ध्यानेन कर्माणि हंति।

+प्रकृत्यादिभ्यः ॥ ३३ ॥ एभ्यो भा भवति। प्रकृत्या अभिरूपः । प्रायेण वैयाकरणः । गौतमोऽस्मि गोत्रेण। समेन धावति। विषमेण धावति । द्विद्रोणेन धान्यं क्रीणाति । सहस्रेण अश्वान् क्रीणाति ।

सहार्थेन ॥ ३४ ॥ सहार्थेन योगे भा भवत्युपाधौ । वत्सेन सह गौः । पुत्रेण सहागतः । पुत्रेण सह खलः । पुत्रेण सह धनवान् । अर्थग्रहणं पर्यायार्थं । पुत्रेण सार्द्धं साकं सत्रा अमा युगपत् समं । पुत्रेण भुक्त–करणनिर्देशाः ।

येनांगिविकारेत्थंभावौ ॥ ३५ ॥ येनांगिनो विकारो विकृतत्वमित्थंभावोऽनेन प्रकारेण भवनं च लक्ष्यते ततो भा भवति। पाणिना कुणिः। पादेन खंजः । अक्ष्णा काणः ।

शिखया बटुमद्राक्षीत् श्वेतच्छत्रेण भूपतिं ।
केशवं शंखचक्राभ्यां त्रिभिर्नेत्रैः पिनाकिनं ॥

अपि भवान् कमंडलुना छात्रमद्राक्षीत् । अपि भवान् चूलया परिव्राजकमदर्शत् । छात्रत्वादिप्रकारमापन्नो मनुष्यः कमंडल्वादिना लक्ष्यते । अंगिविकारेत्थंभावौ" इति किं? अक्षि काणमस्य ।

हेतौ[1] ॥ ३६ ॥ हेत्वर्थे भा भवति । धनेन कुलं । विद्यया यशः । अन्नेन वसति । अध्ययनेन वसति ।

+का ॥ ३७ ॥ हेतौ[2] का भवति । सिद्धिरनेकांतात् । पर्वतोऽग्निमान् धूमवत्त्वात् ।

*ऋणे ॥ ३८ ॥ हेतौ ऋणे का भवति। शताद्बद्धः । सहस्राद्बद्धः । निष्काद्बद्धः । हेतौ, इति किं? बद्धस्त्वया देवदत्तो नाहं बध्नामि शतं मे धारयति शतेन बद्धः ।

गुणे श्रीदत्तस्यास्त्रियां ॥ ३९ ॥ गुणे हेतौ श्रीदत्ताचार्यमतेन का भवत्यस्त्रियां । जाड्याद्बद्धः । जाड्येन बद्धः। ज्ञानान्मुक्तः। ज्ञानेन मुक्तः। गुण इति किं? धनेन कुलं। अस्त्रियामिति किं? बुद्ध्या मुक्तः ।

*हेतौ सर्वाः प्रायः ॥ ४० ॥ हेतुशब्दपर्या-

---

[1] लौकिकफलसाधनयोग्यपदार्थो हेतुः । [2] पूर्वं कारकोऽत्र तु ज्ञापकः ।

ये प्रकृते हेत्वर्थे तद्वाचिनः सर्वाः बिभक्तयः प्रायेण भवंति । धनेन हेतुना वसति । धनाय हेतवे । धनाद्धेतोः । धनस्य हेतोः । धने हेतौ । कं हेतुं वसति । केन हेतुना । किं निमित्तं । केन निमित्तेन । किं कारणं । केन कारणेन । किं प्रयोजनं । केन प्रयोजनेन । यं हेतुं वसति । येन हेतुना । येन निमित्तेन । एवं सर्ववचनेषु ।

काऽपादाने ॥ ४१ ॥ अपादाने कारके का विभक्ती भवति । रथात् पतितः । आचार्यादधीते । चौरेभ्यो बिभेति । अधर्माज्जुगुप्सते । माथुराः पाटलिपुत्रकेभ्य आढ्यतराः, अभिरूपतराः, दर्शनीयतराः ।

+प्यखे कर्माधारे ॥ ४२ ॥ प्यांतस्य खे कर्मण्याधारे च का स्यात् । प्रासादात् प्रेक्षते । आसनात् प्रेक्षते । अत एव वचनात् प्यखं दृष्टव्यं । प्यख इति किं ? प्रासादमारुह्य प्रेक्षते । आसने उपविश्य प्रेक्षते । कर्माधार ति किं ? गृहादागत्याधीते ।

***दिक्शब्दान्यार्थांचुदूथ्वाहीतराराद्वहिर्युक्ते ॥४३॥**[1] दिक्शब्दैरन्यार्थैरंचुदूथ्वादिभिश्च युक्ते का भवति । पूर्वो ग्रामात् । उत्तरो ग्रामात् । अन्यो देवदत्तात् । भिन्नो देवदत्तात् । प्राग् ग्रामात् । प्रत्यग् ग्रामात् । दाक्षिणा ग्रामात् । दाक्षिणाहि ग्रामात् । इतरोऽस्मात् । गृहादारात् क्षेत्रं । बहिर्ग्रामात् ।

***ताऽतोऽर्थस्त्यैः ॥ ४४ ॥** अतसर्थस्त्यैर्योगे ता भवति । दक्षिणतो ग्रामस्य । उत्तरतो ग्रामस्य । उपरि ग्रामस्य । उपरिष्टात् ग्रामस्य । परो ग्रामस्य ।

***इप् चैनेन ॥ ४५ ॥** एनेन योगे इप् ता च स्यात् । दक्षिणेन विजयार्द्धं वसति । उत्तरेण हिमवंतं । पूर्वेण ग्रामस्य । उत्तरेण ग्रामस्य ।

***का चर्ते ॥ ४६ ॥** ऋते शब्देन योगे का स्यात् इप् च । ऋते धर्मात् कुतः सुखं । चित्रं यथाश्रयमृते । न ह्यंगं विक्रियते रोगमृते ।

***पृथक्नाना भा च ॥ ४७ ॥**[2] पृथग्नानाभ्यां योगे भा स्यात् का च । पृथक् देवदत्तेन । पृथग् देवदत्तात् । नाना गुरुदत्तेन । नाना गुरुदत्तात् ।

***विना तिस्रः ॥ ४८ ॥** विना योगे तिस्रो भाकेपो भवंति । विना सम्यक्त्वेन । विना सम्यक्त्वात् । विना सम्यक्त्वं कुतो मुक्तिः ।

***स्तोकाल्पकृच्छ्रकतिपयात् करणे का वाऽसत्त्वे ॥ ४९ ॥** स्तोकादेरसत्त्ववचनात् करणे का वा स्यात् । स्तोकान्मुक्तः । स्तोकेन मुक्तः । अल्पान्मुक्तः । अल्पेन मुक्तः । कृच्छ्रान्मुक्तः । कृच्छ्रेण मुक्तः । कतिपयान्मुक्तः । कतिपयेन मुक्तः । असत्त्वे इति किं ? अल्पेन सीधुना मत्तः । करणे इति किं ? अल्पं जल्पति ।

+तृप्तार्थैस्ता ॥ ५० ॥ तृप्तार्थैधुभिर्योगे करणे ता भवति । ओदनस्य तृप्यति । ओदनस्य तृप्तः । सक्तूनां पूर्यते । सक्तूनां पूरणः ।

***ज्ञोऽस्वार्थे ॥ ५१ ॥** जानातेरस्वार्थे अनवबोधने वर्तमानस्य करणे ता भवति । पयसो जानीते ।[3] दध्नो जानीते । अस्वार्थे इति किं? ध्वनिना दुहितरं जानाति ।

***का चाराद्र्थैः ॥ ५२ ॥** आरादर्थैर्दूरार्थैरंतिकार्थैश्चासत्त्ववाचिभिर्युक्ते का स्यात् ता च । दूरं ग्रामात् । दूरं ग्रामस्य । विप्रकृष्टं पर्वतात् । विप्रकृष्टं पर्वतस्य । अंतिकं वनात् । अंतिकं वनस्य । अभ्यासं देशात् । अभ्यासं देशस्य ।

***तेभ्यः केब्भाः ॥ ५३ ॥** तेभ्यः आरादर्थेभ्यः केब्भाः भवंति । दूराद् ग्रामस्य । दूरं ग्रामस्य । दूरेण ग्रामस्य याति । अंतिकात् ग्रामस्य । अंतिकं ग्रामस्य । अंतिकेन ग्रामात् ।

***ईबाधारे च ॥ ५४ ॥** ईब् विभक्ती भवति आधारे कारके तेभ्यश्च ।

अपात्रे रमते लोको गिरौ वर्षति वासवः ।
अन्यस्त्रीषु मनो याति कुलस्त्रीषु न गच्छति ॥

---

[1] शब्दग्रहणेनात्र दिशि दृष्टः शब्दो गृह्यते तेन देशकालवृत्तिभिरपि पूर्वादिभिर्योगे का भवति । [2] पर्याय निवृत्त्यर्थं द्वयोर्ग्रहणं । तेनेह न-हिरुग्देवदत्तात् ।

[3] पयसा करणभूतेन परयति प्रवर्तते वा । सर्पिषि रक्तः प्रतिहतो वा तद्रूपेण सर्वं जानाति ।

कटे आस्ते। स्थाल्यां पचति। गंगायां घोषः। दूरे वनस्य। विप्रकृष्टे वृक्षस्य। अंतिके कूपस्य। समीपे देवस्य।

+क्तेनकर्मणि ॥ ५५ ॥ क्तांतस्य इन्विषयस्य कर्मणीब् भवति। अधीतं व्याकरणमनेन–अधीती व्याकरणे। आम्नीती छंदसि। अर्चिती गुरौ। क्तग्रहणं किं? भुक्तपूर्वी ओदनं। इन्ग्रहणं किं? गुरुमुपश्लिष्टः शिष्यः।

+हेतौ तद्युक्ते ॥ ५६ ॥ कर्मणा युक्ते हेतौ ईब् भवति।

चर्मणि द्वीपिनं हंति दंतयोर्हंति कुंजरं।
केशेषु चमरीं हंति सीम्नि पुष्कलको हतः॥

तद्युक्त इति किं? भिक्षया वसति।

यद्भावाद्भावगतिः ॥ ५७ ॥ यस्य भावात् क्रियातो भावांतरस्य गतिर्निर्णीतिस्तत्र ईब् भवति। गोषु दुह्यमानासु गतः। दुग्धास्वागतः। देवार्चायां क्रियमाणायां गतः कृतायामागतः। यद्भावादिति किं? यो जटाभिः स भुंक्ते। जटाभिरित्यत्रेप् नास्ति द्रव्यत्वात्। भावगतिरिति किं? यो भुक्तवान् स देवदत्तः। यो भुक्तवानित्यत्रेप् न भवति।

गते स्थानिन्यध्वांतेनैकश्च ॥ ५८ ॥ यस्याप्रयोगेऽप्यर्थो गम्यते स स्थानी। इयत्तावसितस्याध्वनोऽवसानमंतः। यद्भावाद् भावगतिस्तस्यांतेन युक्तस्याध्वनः गतशब्दे स्थानिन्यप्रयुज्यमाने तेनांतेन एकत्वं [प्रथमात्वं] भवति। पाटलिपुत्राद् राजगृहं सप्तयोजनानि। स्थानिनीति किं? गवीधुमतः सांकाश्यं चतुर्षु योजनेषु गतेषु भवति। अध्वग्रहणं किं? कार्तिक्याः आग्रहायिणी मासे। अंतेनेति किं? अद्य नश्चतुर्षु योजनेषु गतेषु भोजनं। चकारः ईबबाधनार्थः।

ता चानादरे ॥ ५९ ॥ यद्भावाद् भावगतिस्तत्र ता भवतीप् चानादरे गम्यमाने। रुदतो लोकस्य प्राव्राजीत्। रुदति लोके प्राव्राजीत्। देवदत्ते क्रोशति प्राव्राजीत्। देवदत्तस्य क्रोशतः प्राव्राजीत्।

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ॥६०॥ एतैर्योगे तेपौ स्तः। गवां स्वामी। गोषु स्वामी। यतीनामीश्वरः यतिष्वीश्वरः। नृणामधिपतिः। नृष्वधिपतिः। धनस्य दायादः। धने दायादः। गवां साक्षी। गोषु साक्षी। शतस्य प्रतिभूः। शते प्रतिभूः। गवां प्रसूतः। गोषु प्रसूतः।

कुशलायुक्तेनासेवायां ॥ ६१ ॥ कुशलायुक्ताभ्यां योगे तेपौ स्तः। मुहुर्मुहुस्तात्पर्येण वा सेवायां गम्यमानायां। कुशलो विद्याग्रहणस्य। कुशलो विद्याग्रहणे। आयुक्तस्तपश्चरणे। आयुक्तस्तपश्चरणस्य। आसेवायामिति किं? कुशलश्चित्रकर्माणि न च करोति। आयुक्तो गौः शकटेन। आकृष्य युक्त इत्यर्थः।

***साधुनिपुणेनानभ्यादिनार्चायामीप्** ॥६२॥ साधुनिपुणाभ्यां योगे अभिप्रभृतिभिरयोगे चार्चायां गम्यमानायां ईप् स्यात्। जिने साधुः। गुरौ निपुणः। अर्चायामिति किं? साधुरमात्यो राज्ञः। अनभ्यादिनेति किं? साधुर्मातरमभि। मातरमनु। पितरमनु। निपुणो मातरं प्रति। मातरं परि। निपुणः पितरं प्रति। पितरं परि।

***प्रसितोत्सुकावबद्धैर्भा च** ॥६३॥ एतैर्योगे भा स्यादीप् च भवति। केशैः प्रसितः। केशेषु प्रसितः। केशैरुत्सुकः। केशेषूत्सुकः। केशैरवबद्धः। तत्र नित्यं प्रसक्तिरित्यर्थः।

उशि भे ॥ ६४ ॥ उशि भे विषये भेपौ स्तः। पुष्येण पुष्ये वा पायसमश्नीयात्। मघाभिर्मघासु वा पललौदनं। उशीति किं? पुष्ये चंद्रमाः। भ इति किं? पंचालेषु वसति।

मिङेकार्थे वाः ॥ ६५ ॥ मिङा सहैकार्थे समानार्थे वर्तमानात् ङ्याप्मृदो वा (प्रथमा) विभक्ती भवति। मुनिर्भूते। द्रोणः पच्यते। गौः। कुमारी। वृक्षः। कुंडं। खारी। एकः। द्वौ। बहवः। एकार्थे इति किं? त्वया पच्यते ओदनः।

संबोधने बोध्यं ॥ ६६ ॥ संबोधने या वा तस्या बोध्यमिति संज्ञा भवति। हे देव। हे देवौ। हे देवाः।

***सुः किः** ॥ ६७ ॥ बोध्यसंज्ञाया वायाः सुः

किसंज्ञो भवति । हे कन्ये । हे कुमारि । हे वधु । किप्रदेशाः "केरेङः" प्रभृतयः ।

ता शेषे ॥ ६८ ॥ कारकाणामविवक्षा ततोऽन्यः स्वस्वाम्यादिर्वा शेषस्तस्मिन् ता विभक्ती भवति । नटस्य शृणोति । राज्ञः स्वं । मद्राणां राजा । तस्य भ्राता । ग्रामस्य समीपं । शालीनां राशिः । यवानां धानाः । तस्य हस्तः । गोः स्थानं ।

स्मर्थदयेशां कर्मणि ॥ ६९ ॥ स्मृत्यर्थानां दयेशोश्च कर्मणि ता स्यात् । मातुः स्मरति । पितुरध्येति । सर्पिषो दयते । पयस ईष्टे । शेष इति किं ? मातरं स्मरति ।

कृः प्रतियत्ने ॥ ७० ॥ कृञः कर्मणि ता स्यात् प्रतियत्नेऽर्थे । एधो दकस्योपस्कुरुते । शस्त्रपत्रस्योपस्कुरुते । प्रतियत्न इति किं? कुंभं करोति बुद्ध्या ।

*** रुजर्थस्याज्वरिसंताप्योर्भावोक्तेः ॥ ७१ ॥** रुजर्थानां भाववाचिनां धूनां कर्मणि ता स्यात् ज्वरिसंतापी विहाय । चौरस्य रुजति रोगः । वृषलस्यामयति रुजा । रुजर्थस्येति किं ? एति जीवंतमानंदः । अज्वरिसंताप्योरिति किं? अपथ्याशिनं ज्वरयति ज्वरः । अत्याशिनं संतापयति पीडा । भावोक्तेरिति किं ? मधुराशिनं रुजति श्लेष्मा ।

आशिषि नाथः ॥ ७२ ॥ नाथतेः कर्मणि ता भवत्याशिषि । पयसो नाथते । दध्नो नाथते । आशिषीत्येव । माणवकमुपनाथयति । अंग पुत्राधीष्वेति याचत इत्यर्थः ।

*** जासनाटक्राथपिषां हिंसायां ॥ ७३ ॥** जासादीनां हिंसार्थानां कर्मणि शेषे ता भवति । चौरस्योज्जासयति । दस्योर्नाटयति । कितवस्योत्क्राथयति । जारस्य पिनष्टि । हिंसायामिति किं ? चौरं बंधनादुज्जासयति । धानाः पिनष्टि ।

*** प्रानेर्घ्नः ॥ ७४ ॥** प्रनिभ्यां व्यस्तसमस्तविपर्यस्ताभ्यां हंतेः कर्मणि ता स्यात् हिंसार्थे । लुंटाकस्य प्रहंति । वृषलस्य निहंति । प्रणिहंति । निप्रहंति ।

व्यवहृपणोः सामर्थ्ये ॥ ७५ ॥ एतयोः सामर्थ्ये क्रयविक्रये द्यूते च कर्मणि ता भवति । शतस्य व्यवहरते । सहस्रस्य व्यवहरते । शतस्य पणते । सहस्रस्य पणते । सामर्थ्य इति किं ? शलाकां व्यवहरति ।

दिवः ॥ ७६ ॥ व्यवहृपणिसमानार्थस्य दिवेः कर्मणि ता भवति । शतस्य दीव्यति । सहस्रस्य दीव्यति ।

वा गौ ॥ ७७ ॥ गिपूर्वस्य दिवः कर्मणि ता वा भवति । शतस्य प्रतिदीव्यति । शतं प्रतिदीव्यति ।

*** कालाधारे सुजर्थे ॥ ७८ ॥** सुजर्थो यस्य तस्मिन् त्येऽर्थे युक्ते सति काले आधारे कारके ता भवति । द्विरह्नो भुंक्ते । त्रिरह्नो भुंक्ते । पंचकृत्वोऽह्नो भुंक्ते । कालग्रहणं किं ? त्रिः कंसपात्र्यां भुंक्ते । आधार इति किं ? द्विरह्ना भुंक्ते । सुजर्थ इति किं? अह्नि भुंक्ते जैनः । शेष इति किं ? द्विरह्न्यधीते ।

कर्तृकर्मणोः कृति ॥ ७९ ॥ कर्तरि कर्मणि च कृत्प्रयोगे ता भवति । भवतां शायिका । भवतामासिका । यवानां लावकाः । सक्तूनां पायकः । विश्वस्य ज्ञाता । सकलस्य द्रष्टा । कृतीति किं ? कृतपूर्वी कटं ।

*** क्तस्याधारसतोः ॥ ८० ॥** आधारे सति च वर्तमानकाले यः क्तस्तस्य प्रयोगे ता भवति । अस्मिन्नेभिरश्यते स्म । इदमेषामाशितं । इदमेषां शयितं । सतां मतः । राज्ञां बुद्धः । सतां पूजितः । राज्ञामर्चितः । साधूनां शीलितः ।

+ कामुकस्य ॥ ८१ ॥ अस्य प्रयोगे ता भवति । दास्याः कामुकः । धन्यस्य स्त्रियः कामुकाः भवंति । वेश्यायाः कामुकः ।

*** न क्षितलोकखार्थानवुणां ॥ ८२ ॥** क्ष्यादीनां प्रयोगे ता न भवति । ओदनं भुक्त्वा । स्वः सुखं कृतवान् । ओदनं भुक्तवान् । देवदत्तेन भुक्तं । विष्णुमित्रेण पीतं । चैत्यं कारयामास । जिनान् वंदिष्यमाणः । ओदनं पचमानः । कटं कुर्वन् । कटं कुर्वाणः । दानं चिकीर्षुः । रिपून् जिष्णुः । ग्राममागामुकः । सुकरः कटो भवता । ईषत्करः कटो भवता । दुष्करः कटो भवता । ईषत्पानं पयो भवता । सुज्ञानं तत्त्वं भवता ।

लोकं पवमानः । देवं यजमानः । धारयन् धर्मशास्त्रं । जैनेंद्रमधीयन् । अर्हन् पूजां । कटान् कर्ता । पठिता जैनेंद्रं । कटं कारको गच्छति । ओदनं भोजको व्रजति ।

*** भाव्याधमर्ण्येनः ॥ ८३ ॥** भाविनि काले आधमर्ण्ये च य इन् तस्य प्रयोगे ता न स्यात् । ग्रामं गमी । नगरमागामी । शतं दायी । सहस्रं दायी । कारी मेऽसि कटं ।

व्यस्य वा कर्त्तरि ॥ ८४ ॥ व्यसंज्ञकस्य प्रयोगे कर्तरि ता वा भवति । भवतः कर्तव्यो धर्मः । भवता कर्तव्यः । भवतो ज्ञेयं कर्म । भवता ज्ञेयं । भवतः खलु ग्रामो गंतव्यः । भवता खलु ग्रामो गंतव्यः । कर्त्तरीति किं ? गेयो माणवको गाथानां ।

*** द्विप्राप्तेऽनाके ॥ ८५ ॥** द्वयोः कर्तृकर्मणोः प्राप्ते कर्तरि ता वा भवत्यकारमकं च विहाय । साध्वी सूत्राणां कृतिः स्वामिनः । साध्वी सूत्राणां कृतिः स्वामिना । आश्चर्यो गवां दोहो अगोपालकस्य, अगोपालकेन वा । अनाक इति किं ? चिकीर्षा देवदत्तस्य वार्त्तिकानां । भेदकाः पत्राणां वादिनः ।

+ द्विषतः ॥ ८६ ॥ द्विषेः शतुर्योगे कर्माणि वा ता भवति । चौरस्य द्विषन् । चौरं वा ।

*** कर्मणि गुणेऽव्यस्य ॥ ८७ ॥** व्यसंज्ञकवार्जितकृत्प्रयोगे गुणेऽमुख्ये कर्माणि ता वा स्यात् । दोग्धा गोः पयसः । दोग्धा गोः पयः । याचिता गोर्मित्रस्य । याचिता गोर्मित्रं । ज्ञापयिता शिष्यस्य धर्मस्य । ज्ञापयिता शिष्यस्य धर्मं । गमयिता माणवकस्य ग्रामस्य । गमयिता माणवकस्य ग्रामं । गुण इति कि ? नेता अश्वस्य । अव्यस्येति किं? नेतव्याः ग्रामं शाखाः ।

*** तुल्यार्थैर्भा ॥ ८८ ॥** तुल्यार्थैरुपमेयार्थैर्योगे भा भवति ता च । पित्रा तुल्यः । पितुस्तुल्यः । मात्रा तुल्यः । मातुः समानः । गुरुणा समः । गुरोः समः ।

*** मद्रक्षेमायुःशंहितार्थार्थैराशिष्यप् ॥ ८९ ॥** मद्रादिशब्दार्थैः शब्दैर्योगे वा अप् स्यादाशिष्यर्थे । मद्रमस्तु जिनशासनाय । मद्रमस्तु जिनशासनस्य भद्रं कल्याणं वाऽस्तु जैनस्य, जैनाय वा । क्षेमं कुशलं निरामयं वाऽस्तु संघाय संघस्य वा । दीर्घमायुराशिष्यं चिरंजीवितं वाऽस्तु भव्याय भव्यस्य वा । शं सुखं शर्म वा भूयात् प्रजाभ्यः प्रजानां वा । हितं पथ्यं हृद्यं प्रियं वा भवतु मित्राय मित्रस्य वा । अर्थः प्रयोजनं कार्यं वा भवताद्दत्ताय दत्तस्य वा । आशिषीति किं ? आयुष्यं देवदत्तस्य तपः ।

*** प्राणितूर्यांगद्वंद्व एकवत्तुल्यं ॥ ९० ॥** प्राण्यंगानां तूर्यांगानां च तुल्यानां द्वंद्व एकवद् भवति । पाणी च पादौ च पाणिपादं । शिरोग्रीवं । कर्णनासिकं । दंतोष्ठं । शंखपटहं । भेरीमृदंगं । मार्दंगिकपाणविकं । तुल्यमिति किं ? पाणिगृध्नौ ।

*** चरणं स्थेणोर्लुङ्यनुक्तौ ॥ ९१ ॥** लुङ्परयोः स्थेणोः प्रयोगे चरणानां तुल्यानां द्वंद्व एकवद् भवत्यनुक्तावनुवादे । कठाश्च कालापाश्च कठकालापमुदगात् । कठकौथुमं प्रत्यष्ठात् । चरणमिति किं ? उदगुर्वैयाकरणमीमांसकाः । स्थेणोरिति किं ? अनंदिषुः कठकालापाः । लुङीति किं ? उद्यंति कठकौथुमाः । अनुक्ताविति किं ? प्रत्यष्ठुः कठकौथुमाः । आदिवचनमिदं ।

अध्वर्युक्रतुरनप् ॥ ९२ ॥ अध्वर्युक्रतूनामनपां द्वंद्व एकवद् भवति । अर्कश्च अश्वमेधश्च अर्काश्वमेधं । सायाह्नातिरात्रं । अध्वर्युग्रहणं किं ? इषुवज्रौ । अनबिति किं ? गवामयनादित्यानामयने ।

*** अधीत्यासन्नानां ॥ ९३ ॥** अधीत्या पठित्या आसन्नानां द्वंद्व एकवद् स्यात् । पदकश्च क्रमकश्च पदकक्रमकं । क्रमकवार्त्तिकं । अधीत्येति किं ? आढ्यदरिद्रौ । आसन्नानामिति किं ? याज्ञिकवैयाकरणौ ।

अप्राणिजातेः ॥ ९४ ॥ प्राणिवर्जितद्रव्यजातिवाचिनां द्वंद्व एकवद् भवति । आराशस्त्रि । धानाशष्कुलि । युगवरत्रं । कुंडबदरं । अप्राणिग्रहणं किं ? विट्शूद्रौ । जातेरिति किं ? हिमवद्विंध्यौ ।

*** विलिंगं पूर्णदीदेशं ॥ ९५ ॥** विलिंगानां भिन्नालिंगानां पुरां नदीनां देशवाचिनां द्वंद्व एकवद् भवति । मथुरापाटलिपुत्रं । कांचीकुसुमपुरं । उध्यश्च

इरावती च उदूध्येरावती । गंगाशोणं । कुरुकुरुक्षेत्रं । दार्व्वाभिसारं । विलिंगमिति किं ? मथुरावाराणस्यौ । गंगायमुने । मद्रकेकयाः । पूर्णदीदेशमिति किं ? कुक्कुटीमयूरौ ॥

***नित्यद्विषां द्वेषे ॥ ९६ ॥** नित्यद्विषां सदा-वैरिणां द्वंद्व एकवद् भवति द्वेषे । देवासुरं । अहि-नकुलं । मार्जारमूषकं । श्वावराहं । अश्वमहिषं । काको-लूकं । नित्यद्विषामिति किं ? गोपालशालंकायनाः ।

वर्णेनार्हद्रूपाऽयोग्यानां ॥ ९७ ॥ वर्णेन जातिविशेषेणार्हद्रूपस्य नैर्ग्रंथ्यस्यायो-ग्यानां द्वंद्व एकवद् भवति । तक्षायस्कारं । कुलाल-बरुटं । रजकतंतुवायं । वर्णेनेति किं ? मूकबधिरौ । अर्हद्रूपायोग्यानामिति किं ? ब्राह्मणक्षत्रियौ ।

***गवाश्वादिश्च ॥ ९८ ॥** गवाश्वादिर्द्वंद्व एकवद्भवति । गवाश्वं । गवैडकं । अजाविकं । कुब्जवामनं । पुत्रपौत्रं । चकारो नियमार्थः । गणवा-ह्यानां न भवति । गोश्वौ ।

+ फलसेनांगक्षुद्रजीवं बह्वर्थांशं ॥ ९९ ॥ फलांशः सेनांशः क्षुद्रजीवांशश्च बह्वर्थांशो द्वंद्व एक-वद् भवति । बदराणि च आमलकानि च बदरामलकं । कुबलामलकं । अश्वरथं । रथिकाश्वारोहं । शतस्वश्च उत्पादकाश्च शतसूत्पादकं । यूकालिक्षं । दंशमशकं । बह्वर्थांशमिति किं ? बदरामलके । अश्वरथौ । यूकालिक्षे ।

***वा तरुमृगतृणधान्यपक्षि ॥ १०० ॥** तर्वादीनां बह्वर्थांशो द्वंद्वो वा एकवद् भवति । प्लक्षन्यग्रोधं । प्लक्षन्यग्रोधाः । धवाश्वकर्णं । धवाश्व-कर्णाः । रुरुपृषतं । रुरुपृषताः । न्यंकुशूकरं । न्यंकु-शूकराः । कुशकाशं । कुशकाशाः । दर्भशीर्यं । दर्भशीर्याः । व्रीहियवं । व्रीहियवाः । तिलमाषं । तिलमाषाः । हंसचक्रवाकं । हंसचक्रवाकाः । तित्तिरिकपिंजलं । तित्तिरिकपिंजलाः ।

***पशुव्यंजनाश्ववडवपूर्वापराधरोत्तरं ॥ १०१ ॥** पश्वादिर्द्वंद्वो वैकवद् स्यात् । गोमहिषं । गोमहिषौ । वृष्णिबस्तं । वृष्णिबस्तौ । दधिघृतं । दधिघृते । शाकसूपं । शाकसूपौ । अश्ववडवं । अश्ववडवौ । पूर्वापरं । पूर्वापरे । अधरोत्तरं । अधरोत्तरे ।

***विरोध्यद्रव्यं ॥ १०२ ॥** विरोधि यदद्रव्यं तद् द्वंद्वो वैकवद् स्यात् । सुखदुःखं । सुखदुःखे । एवं—शीतोष्णं । शीतोष्णे । जन्ममरणं । जन्ममरणे । लाभालाभं । लाभालाभे । सम्यग्ज्ञानमिथ्याज्ञानं । सम्यग्ज्ञानमिथ्याज्ञाने । विरोधीति किं ? कामक्रोधौ । अद्रव्यमिति किं ? सुखदुःखाविमौ ग्रामौ । शीतोष्णे इमे उदके ।

न दधिपय आदिः ॥ १०३ ॥ दधिपयः प्रभृतिर्द्वंद्व एकवन्न भवति । दधिपयसी । सर्पिमधु-नी । ब्रह्मप्रजापती । दीक्षातपसी । उलूखलमुसले ।

***स्यौ ॥ १०४ ॥** स्यौ संख्यायां इयत्तापरिच्छेदे द्वंद्व एकवन्न स्यात् । दंताश्च ओष्ठौ च दशेमे दंतौष्ठाः । बहवो मार्दंगिकपाणविकाः ।

***वांतिके ॥ १०५ ॥** स्येः संख्याया अंतिके समीपे द्वंद्वो वैकवत्स्यात् । समीपे दशानामिमे उपदशं पाणिपादं । उपदशाः, पाणिपादाः । उपदशं मार्दंगिकपाणविकं । उपदशाः मार्दंगिकपाणविकाः ।

स नप् ॥ १०६ ॥ योऽयमुक्तः एकवद्भावः स नप् भवति । तथा चैवोदाहृतं ।

ह्रश्च ॥ १०७ ॥ ह्रसो नप् भवति । अधि-कुमारि । उपवधु । एकमुनि जैनेंद्रं । चशब्दात् क्रियाविशेषणानां नप्त्वं । साधु जल्पति । मृदु पचति ।

रः समाहारे ॥ १०८ ॥ रसः समाहारे वर्तमाने नप् स्यात् । पंचगवं । पंचाग्नि । समाहारे इति किं ? पंचाम्रप्रियः ।

+ स्त्र्यपात्राद्यत् ॥ १०९ ॥ पात्रादिवर्जितोऽ-कारांतो रः समाहारे स्त्रीलिंगो भवति । पंचपूली । दशग्रामी । चतुरध्यायी । अपात्रादीति किं ? द्विपात्रं । त्रिभुवनं । चतुष्पथं । अदिति किं ? त्रिगुप्ति ।

+ वाऽऽप् ॥ ११० ॥ आबंतो रः समाहारे वा [illegible] भवति । पंचखट्वं । पचखट्वी । दशमालं । दशमा[illegible] अष्टशालं । अष्टशाली ।

+ नप चान्नखं ॥ १११ ॥ अन्नंतस्य नखं [illegible]

१ यदा द्वंद्वैकवद्भावस्तदैकत्वनप्त्वानुरोधाद्वसोऽनुप्रयु[illegible] भेदभावे तु बसः ।

न्नप् च वा । पंचतक्षं । पंचतक्षी । द्वादशराजं । द्वादशराजी ।

षोऽनञ्यः ॥ ११२ ॥ नञ्सं यसं च वर्जयित्वा षसो नप् भवतीत्यतदधिकृतं ज्ञेयं । वक्ष्यति—सेनेत्यादिना—क्षत्रियसेनं । क्षत्रियसेना । ष इति किं ? महासेनो राजा । अनञ्य इति किं ? असेना । परमसेना ।

खौ कंथोशीनरेषु ॥ ११३ ॥ कंथांतः षो नप् भवति खुविषये उशीनरेषु यदि सा कंथा स्यात् । सौशमीनां कंथा सौशमिकंथं ग्रामः । आह्वरकंथं । चर्मकंथं । एते उशीनरेषु ग्रामाः । खाविति किं ? वीरणकंथा । उशीनरेष्विति किं ? दाक्षिकंथा ।

*** आदावुपज्ञोपक्रमं ॥ ११४ ॥** उपज्ञोपक्रमांतः षो नप् भवत्यादौ प्राथम्ये विवक्षिते तयोः । स्वायंभुवस्योपज्ञा स्वायंभुवोपज्ञं आकालिकाचाराध्ययनं । देवोपज्ञमनेकशेषव्याकरणं । कुरुराजोपक्रमं दानं । अकंपनोपक्रमं स्वयंवरविधानं । आदाविति किं ? मैत्रोपज्ञो रथः । चैत्रोपक्रमः प्रासादः ।

छाया बहूनां ॥ ११५ ॥ बहूनां या छाया तदंतः षो नप् भवति । शराणां छाया शरच्छायं । इक्षुच्छायं । शलभच्छायं । बहूनामिति किं ? कुड्यच्छाया । कुड्यच्छायं ।

*** सभाऽशाला ॥ ११६ ॥** अशाला या सभा तदंतः षो नप् भवति । स्त्रीसभं । दासीसभं । गोपालसभं । अशालेति किं ? दैशिकसभा ।

*** राक्षसाद्यराज्ञः ॥ ११७ ॥** राक्षसादिभ्योऽराज्ञश्च परा या सभा तदंतः षो नप् भवति । राक्षससभं । रक्षःसभं । पिशाचसभं । अराज्ञ इति पर्युदासात् तत्पर्यायग्रहणं । स्वामिसभं । पार्थिवसभं । इनसभं । ईश्वरसभं । इंद्रसभं । राक्षसाद्यराज्ञ इति किं ? नरसभा । युधिष्ठिरसभा । काष्ठसभा । पाषाणसभा । राजसभा ।

सेनासुराच्छायाशालानिशा वा ॥ ११८ ॥ सेनाद्यंतः षो नप् भवति वा । कपिसेनं । कपिसेना । पिष्टसुरं । पिष्टसुरा । छत्रच्छायं । छत्रच्छाया । दानशालं । दानशाला । श्वनिशं । श्वनिशा ।

द्वंद्वे युवल्लिंगं ॥ ११९ ॥ द्वंद्वे से योरिव लिंगं भवति । कुक्कुटमयूर्यौ इमे । मयूरकुक्कुटाविमौ । वृक्षकुंडे । कुंडवृक्षौ ।

+ षेऽप्राप्तालंप्राप्तापन्नादौ ॥ १२० ॥ प्राप्तालंप्राप्तापन्नपूर्ववर्जिते षसे युवल्लिंगं भवति । पूर्वशालेयं । अर्द्धपिप्पलीयं । अप्राप्तालंप्राप्तापन्नादाविति किं ? प्राध्वं शरीरं । निःकौशांबिः । अलंजीविकः । प्राप्तजीविकः । आपन्नजीविकः ।

*** पुंस्यश्ववडवौ ॥ १२१ ॥** अश्ववडवावितरेतरयोगे द्वंद्वे पुंसि भवतः । अश्ववडवाविमौ । अश्ववडवाः इमे । अश्ववडवैः ।

रात्राह्नौ ॥ १२२ ॥ रात्राह्नशब्दौ कृतसांतौ पुंसि भवतः । एकरात्रः । द्विरात्रः । त्रिरात्रः । पूर्वाह्णः । मध्याह्नः ।

+ वाकादयः ॥ १२३ ॥ एते पुंसि भवंति । उच्यते इति वाकः । अनुवाकः । संप्रवाकः । सूक्तवाकः ।

अहः ॥ १२४ ॥ अह इत्ययं शब्दः कृतसांतः पुंसि स्यात् । द्व्यहः । त्र्यहः ।

पुण्यसुदिनाभ्यां नप् ॥ १२५ ॥ पुण्यसुदिनाभ्यां परो अहो नप् भवति । पुण्याहं । सुदिनाहं ।

*** पथो झिस्य्यादिः ॥ १२६ ॥** झ्यादिः स्यिसंज्ञादिश्च पथशब्दो नप् भवति । विगतः पंथाः विपथं । उत्पथं । अपथं । द्विपथं । त्रिपथं । चतुःपथं ।

*** पुंसि चार्द्धर्चादयः ॥ १२७ ॥** अर्धर्चादयः शब्दाः पुंसि नपि च वर्तंते । अर्धर्चः । अर्द्धर्चं । गोमयः । गोमयं । कुतपः । कुतपं । कषायः । कषायं । कार्षापणं । कार्षापणः ।

*** त्कि:त्येऽदोऽगे जग्धिः ॥ १२८ ॥** तकारादौ किति प्ये चागे परे अदेर्जग्धिरादेशो भवति । जग्धः । जग्धवान् । जग्धिः । जग्ध्वा । प्रजग्ध्य । क्तित्य इति किं ? अदनं ।

*** घस्लृज्लुङ्घञ्सनि ॥ १२९ ॥** अदेर्घस्ला-

१ । जग्धेः सिद्धेंऽतरंगत्वात् ति किति प्ये विधिर्वृथा । ज्ञापयत्यंतरंगाणां प्येन बाधनमस्त्विति ॥ १ ॥ तेन—हित्वा प्रधार्येत्यादि सिद्धं ।

देशो भवति आचि लुङि घञि सनि च परतः । प्रघसः । अघसत् । घासः । जिघत्सति ।

लिटि वा ॥ १३० ॥ अदेर्लिटि परे घस्लृ वा स्यात् । जघास । जक्षतुः । जक्षुः । आद । आदतुः । आदुः ।

*** वेर्वय् ॥ १३१ ॥** वेञो वय् इत्ययमादेशो भवति वा लिटि । उवाय । ऊयतुः । ऊयुः । ववौ । ववतुः । ववुः ।

घ्नो वध लिङि ॥ १३२ ॥ हंतेर्वधादेशो भवति लिङि परतः । वध्यात् । वध्यास्तां । वध्यासुः । आवधिषीष्ट । आवधिषीयास्तां । आवधिषीरन् ।

लुङि ॥ १३३ ॥ हंतेर्लुङि वधो भवति । अवधीत् । अवधिष्टां । अवधिषुः ।

वेङि ॥ १३४ ॥ हंतेरिङि लुङि वधो वा स्यात् । आवधिष्ट । आवधिषातां । आवधिषत । आहत । आहसातां । आहसत ।

लुङ्येत्योर्गाः ॥ १३५ ॥ एत्योरिणिकोर्गा भवति लुङि परतः । अगात् । अगातां । अगुः । अध्यगात् । अध्यगातां । अध्यगुः ।

णौ गमऽज्ञाने ॥ १३६ ॥ एत्योर्गम् भवत्यज्ञानेऽर्थे णौ परतः । गमयति । अधिगमयति । अज्ञान इति किं ? अर्थान् संप्रत्याययति ।

सनि ॥ १३७ ॥ एत्योरज्ञाने गम् स्यात् सनि परतः । जिगमिषति । अधिजिगमिषति ।

इङः ॥ १३८ ॥ इङो गम् स्यात् सनि परे । अधिजिगांसते । अधिजिगांसेते । अधिजिगांसंते ।

गाङ् लिटि ॥ १३९ ॥ इङो गाङ् भवति लिटि परतः । अधिजगे । अधिजगाते । अधिजगिरे ।

*** लुङ्लृङ्णौ सन्कचोर्वा ॥ १४० ॥** इङो गाङ् वा स्यात् लुङि लृङि णौ च सन्परे कच्परे च परतः । अध्यगीष्ट । अध्यगीषातां । अध्यैष्ट । अध्यैषातां । अध्यगीष्यत । अध्यैष्यत । अधिजिगापयिषति । अध्यापिपयिषति[१] । अध्यजीगपत् । अध्यापिपत् ।

१. अध्यापयितुमिच्छत्यस्मिन् वाक्ये–सनि–अक्तदव्यूहा देवनंदीयाः,, इति श्रुस्वरूपावस्थितिः । पश्चाद्गाङादेशो युक् च ।

*** ब्रूस्तेर्वच्भू ॥ १४१ ॥** ब्रूञोऽस्तेश्च वच् भू इत्येतावादेशौ भवतो ऽगे परतः । वक्ता । वक्तुं वक्तव्यं । भविता । भवितुं । भवितव्यं ।

*** चक्षः ख्शाञ् वाचि ॥ १४२ ॥** चक्षेर्वाचि वर्तमानस्य ख्शाञ् भवति । आख्शाता । आख्शातुं । आख्शातव्यं । वाचीति किं ? चक्षुः । विचक्षणः । बोधेऽत्र । अर्थान् संचक्ष्य । वर्जनेऽत्र ।

वा लिटि ॥ १४३ ॥ चक्षः ख्शाञ् भवति लिटि वा । आचख्यौ । आचख्यतुः । आचचक्षे । आचचक्षाते ।

*** व्यजोऽक्यब्घञचि ॥ १४४ ॥** अजेर्वी भवति क्यप्घञच्वर्जितेऽगे परतः । वीयात् । वीयास्तां । वीयते । प्रवेयं । अक्यप्घञचीति किं ? समज्या । समाजः । समजः पशूनां ।

बहुलं खौ ॥ १४५ ॥ अजेर्वीभावो भवति बहुलं खुविषये । प्रवयणो दंडः । प्राजनो दंडः । प्रवेता । प्राजिता ।

*** यङ उप् ॥ १४६ ॥** यङो बहुलमुप् भवति । रोरूयते । रोरोति । रोरवीति । लालप्यते । लालप्ति । लालपीति ।

*** अचि ॥ १४७ ॥** यङोऽचि परतः नित्यमुप् भवति । चेच्यः । देद्यः । पोपुवः । लोलुवः । दनीध्वसः । मरीमृजः ।

+ नोतः ॥ १४८ ॥ उकारांतात्परस्य यङोऽच्युप् न स्यात् । रोरूयः । नोनूयः । तोष्टूयः ।

*** ध्रुभूस्थेणिक्पिबः सेर्मे ॥ १४९ ॥** ध्रुसंज्ञेभ्यो भ्वादिभ्यश्च सेरुप् भवति मे परतः । अदात् । अधात् । अभूत् । अस्थात् । अगात् । अध्यगात् । अपात् । मे इति किं ? व्यत्यभविष्ट ।

वा घ्राधेट्छाशासः ॥ १५० ॥ घ्रादिभ्यः सेरुप् स्यात् वा मे परतः । अघ्रात्, अघ्रासीत् । अछात्, अछासीत् । अशात्, अशासीत् । असात्, असासीत् ।

*** तन्भ्यस्थास्ते ॥ १५१ ॥** तनादिभ्यः सेर्वोप् भवति थासि ते च परतः । अतथाः । अतनिष्ठाः ।

अतत । अतनिष्ट । असाथाः । असानिष्ठाः । असात । असनिष्ट । अक्षत । अक्षथाः । अक्षणिष्ठाः । अक्षत । अक्षणिष्ट ।

***ञिण्यार्षाद्यून्यणिञोः॥ १५२ ॥** ञिदंतात् ण्यांतादार्षत्यांताच्च परयोः युवत्यपोरणिञोरुप् भवति । तिकस्यापत्यं वृद्धं तैकायनिः । तस्यापत्यं युवा प्राग्द्रेरण उपि तैकायनिः पिता । तैकायनिः पुत्रश्च । मैमतायनिः पिता । मैमतायनिः पुत्रश्च । कुरोरपत्यं कौरव्यः । तदपत्यं युवा इञ उपि कौरव्यः पिता पुत्रश्च । गार्ग्यः पिता । गार्ग्यः पुत्रः । वासिष्ठः पिता पुत्रश्च । वैश्वामित्रः पिता पुत्रश्च । ऋष्यण्णंतात्—इञ उप् । ञिण्यार्षादिति किं ? कुहडस्यापत्यं कौहडः । शिवाद्यण् । तदपत्यं कौहडिः । यूनीति किं ? वामरथस्यापत्यं वामरथ्यः । तस्य शिष्याः वामरथाः । अणिञोरिति किं ? दाक्षिः पिता । दाक्षायणः पुत्रः ।

***प्राक्ष्विञोऽतौल्वल्यादेः ॥ १५३ ॥** प्राचां गोत्रे य इञ् तदंतात् युवत्यस्योप् भवति तौल्वल्यादीन् वर्जयित्वा । पन्नागारस्यापत्यं पान्नागारिः पिता । तदपत्यं पान्नागारिः पुत्रः । एवं–मांथरैषणिः पिता पुत्रश्च । प्राक्ष्विति किं ? प्लाक्षिः पिता । प्लाक्षायणः पुत्रः । इञ इति किं ? राघवः पिता । राघविः पुत्रः । अतौल्वल्यादेरिति किं ? तौल्वलिः पिताः । तौल्वलायनः पुत्रः । दालीपिः पिता । दालीपायनः पुत्रः ।

***पैलाद्यविप्रात् ॥ १५४ ॥** पैलादेरविप्राच्च युवत्यस्योप् भवति । पीलाया अपत्यं पैलः पिता । तदपत्यं पैलः पुत्रः । शालंकिः पिता पुत्रश्च । सात्यकिः पिता पुत्रश्च । अविप्रात्—आंगः पिता । आंगः पुत्रः । मागधः पिता पुत्रश्च । कालिंगः पिता पुत्रश्च ।

***वेञो द्रेः ॥ १५५ ॥** द्रिसंज्ञो य इञ् तदंतात् परस्य युवत्यस्योप् वा भवति । उदुंबरस्यापत्यं औदुंबरिः पिता । तदपत्यं औदुंबरिः पुत्रः । औदुंबरायणो वा । द्रेरिति किं ? दाक्षिः पिता । दाक्षायणः पुत्रः ।

***बहुष्वास्त्रियां ॥१५६॥** द्रिसंज्ञस्य त्यस्योप् भवति बहुषु वर्तमानस्यास्त्रियां । पंचालस्यापत्यानि पंचालाः । इक्ष्वाकवः । अंगाः । वंगाः । कुरवः । बहुष्विति किं ? पांचालः । पांचालौ । अस्त्रियामिति किं ? पांचाल्यः । आंग्यः । वांग्यः । द्रेरिति किं ? औपगवाः ।

***यस्कादेर्गोत्रे ॥ १५७ ॥** यस्कादिभ्यो गोत्रे विहितस्य त्यस्योप् भवति बहुष्वास्त्रियां । यस्कस्यापत्यानि यस्काः । लह्याः । यस्कादेरिति किं ? कापटवाः । गोत्र इति किं ? यस्कस्येमे यास्काः छात्राः ।

***यञञोऽगोपवनादेः ॥ १५८॥** यञोऽञश्च गोत्रे बहुषूप् भवति गोपवनादिभ्यो विहितं विहाय । गर्गाः । वत्साः । वैदः । वैदौ । विदाः । और्वः । और्वौ । उर्वाः । अगोपवनादेरिति किं ? गोपवनस्यापत्यानि गौपवनाः । श्यामाकाः ।

कौंडिन्यागस्त्ययोः कुंडिनाग ती च ।१५९। कौंडिन्यागस्त्य इत्येतयोः गोत्रे बहुषूप्भवत्यस्त्रियां तयोः कुंडिन अगस्ति इत्येतावादेशौ भवतः । कुंडिन्याः अपत्यानि कुंडिनाः । अगस्तयः ।

***भृगुकुत्सवसिष्ठगोतमांगिरोऽत्रेः ॥१६०॥** भृग्वादिभ्यो गोत्रे बहुषु यस्त्यः तस्योप् भवति । भृगोरपत्यानि भार्गवः । भार्गवौ । भृगवः । कुत्साः । वसिष्ठाः । गोतमाः । अंगिरसः । अत्रयः । अस्त्रियामिति किं ? भार्गव्यः । कौत्स्यः स्त्रियः ।

***बह्वचः प्राग्भरतेष्विञः ॥ १६१ ॥** बह्वचो मृदो य इञ् तस्य बहुपूप्भवति प्राग्गोत्रे भरतगोत्रे च । पान्नागारिः । पान्नागारी । पन्नागाराः । एवं–मंथरेषणाः । क्षीरकंबलाः । भरतेषु-औद्दालकिः । औद्दालकी । उद्दालकाः । युधिष्ठिराः । बह्वच इत्येव । वैकयः । पौष्पयः । प्राग्भरतेष्विति किं ? बालाकयः । हास्तिदासयः ।

***वोपकादेः ॥ १६२ ॥** उपकादिभ्यो गोत्रे बहुषु यस्त्यः तस्य वोप् भवति । उपकस्यापत्यानि उपकाः । औपकायनाः । लमकाः । लामकायनाः । कपिष्ठलाः । कापिष्ठलयः ।

***तिककितवादेर्द्वंद्वे ॥ १६३ ॥** तिककित-

वादीनां द्वंद्वे बहुषु यस्त्यस्तस्योप् भवत्यास्त्रियां । तैकायनश्च कैतवायनश्च तिककितवाः । और-सायनश्च लांकटयश्च उरसलंकटाः । वंखरभंडीरथाः ।

+ तथा द्र्यादेः ॥ १६४ ॥ द्वंद्वे बहुत्वे वर्त-मानो यो द्र्यादिस्तस्य तथोप् भवति यथापूर्वं[१] । आंगश्च वांगश्च सौह्मश्च अंगवंगसुह्माः । यस्कलह्यद्रुह्याः । गर्ग-वत्सवाजाः । कुंडिनागस्त्यवसिष्ठाः । तथेति किं ? यास्कलाह्याः छात्राः ।

+ वाऽन्येन ॥ १६५ ॥ द्र्यादेर्वोप् भवति अन्येन सह द्र्यादीनां द्वंद्वे बहुत्वे । आंगश्च वांगश्च दा-क्षिश्च अंगवंगदाक्षयः । आंगवांगदाक्षयः । गर्गवत्सौ-पगवाः । गार्ग्यवात्स्यौपगवाः ।

यञादेर्द्व्येकेषु तायाः षे ॥ १६६ ॥ यञादेस्तथा वोप् भवति द्वयोरेकस्मिंश्च वर्तमानस्य तायाः षसे । गार्ग्यस्य गार्ग्ययोर्वा कुलं गर्गकुलं । गा-र्ग्यकुलं । बिदकुलं । बैदकुलं । अगस्तिकुलं । आग-स्त्यकुलं । यञादेरिति किं ? आंगकुलं । द्व्येकेष्विति किं ? गर्गाणां कुलं गर्गकुलं । ताया इति किं ? पारम-गार्ग्यः । ष इति किं ? गार्ग्यस्य समीपं उपगार्ग्यं ।

सुपो धुमृदोः ॥ १६७ ॥ धुमृदोरंतर्गतस्य सुप उप् भवति । पुत्रमिच्छत्यात्मनः पुत्रकाम्यति । पटीयति । औपगवः । राजपुरुषः । यतः । यत्र । शबलगुः ।

*** झेः** ॥ १६८ ॥ झेः परस्य सुप उप् भवति । ततः । तत्र । कृत्वा । च । वा । ह । अह । एव ।

हात् ॥ १६९ ॥ हसात् परस्य सुप उप् भ-वति । अधिस्त्रि । उपवधु । एकमुनि । द्विमुनि ।

नातोऽम्त्वकायाः ॥ १७० ॥ हादकारांतात् सुपो नोब्भवति अम् तु भवति कां विहाय । उप-कुंभं तिष्ठति । पश्य देहि स्वं वा । अत इति किं ? उपाग्नि । अकाया इति किं ? उपकुंभादानय । उप-मणिकादानय ।

*** भाया वा** ।१७१। हादकारांताद् भाया वाऽम् भवति । उपकुंभं । उपकुंभेन । उपकुंभैः कृतं ।

१ । यस्य पूर्वं यथा विधिर्निषेधो विकारो विकल्पश्च तस्य द्वंद्वे तथैव ।

*** ईपः** ॥ १७२ ॥ हादकारांतादपो वाऽम् भवति । उपकुंभे निधेहि । उपकुंभं निधेहि ।

+ स्यिनद्यृद्धेः ॥१७३॥ स्यवयवान्नदीलक्ष-णात् ऋद्धिलक्षणाच्च हादकारांतादीपोऽम् भवति नित्यं । एकविंशतिभारद्वाजं । त्रिकोशलं । द्वि-यमुनं वसति । सप्तगंगं वसति । त्रिगोदावरं वसति। सुमद्रं । सुमगधं ।

+ परस्परादेर्वाम्सुपोऽपुंसि ॥ १७४ ॥ परस्परादीनामपुंसि सुपः आम् वा भवति । इमे सख्यौ परस्परां भोजयतः । परस्परं भोजयतः । आभिः सखीभिः परस्परां भोज्यते । परस्परेण वा भोज्यते । इमाः सख्यः परस्परां प्रयच्छंति । परस्परस्मै वा प्रयच्छंति । इमे सख्यौ अन्योन्यां भोजयतः । अन्योन्यं वा भोजयतः । आभिः सखीभिरन्योन्यां भोज्यते अन्योन्येन वा भोज्यते । इमे सख्यावितरेतरां इतरेतरं वा भोजयतः । इमे कुले परस्परां परस्परं अन्योन्यां अन्योन्यं इतरेतरां इतरेतरं वा भोजयतः। कुलैःपरस्परेण परस्परां अन्योन्येन अन्योन्यां इतरे-तरां इतरेतरेण वा भोज्यते । कुलानि परस्परां परस्परस्मै वा प्रयच्छंति । अपुंसीति किं ? परस्पर-मिमे जनाः भोजयंति । अन्योन्यमिमे जनाःभोजयंति ।

इति जैनेंद्र (शब्दार्णव) व्याकरणे
शब्दार्णवचंद्रिकायां लघुवृत्तौ
प्रथमोऽध्यायः ।

अथ द्वितीयोऽध्यायः ।

प्रथमः पादः ।

त्यः ॥ १ ॥ त्य इत्ययमधिकारो वेदितव्य आ इवः । वक्ष्यति--तव्यानीयौ । कर्तव्यः । करणीयः ।

परः ॥ २ ॥ धोर्मृदो वा यस्त्यसंज्ञको विधीयते स पर एव भवति । कर्तव्यः । करणीयः । अजा । औपगवः ।

+ **किद्गुप्तिजः सन् भिषज्यादिनिंदाक्षमे**[1] ॥ ३ ॥ किद् गुप् तिज् इत्येतेभ्यः सन् भवति भिषज्यादावर्थे निंदायां क्षमायां च । ज्वरं चिकित्सति । शत्रुं चिकित्सति । जुगुप्सते । तितिक्षते । भिषज्यादाविति किं? संकेतयति । गोपायति । तेजयति ।

*** निशानार्जवजिज्ञासावैरूप्ये शानदान्मान्बधादीश्चस्य** ॥ ४ ॥ शानादिभ्यः सन् भवति निशानादिष्वर्थेषु चस्य च दीः । शीशांसति । शीशांसते । दीदांसति । दीदांसते । मीमांसते । बीभत्सते । निशानादाविति किं? निशानयति । निदानं । मानिता । बाधयति ।

तुमीच्छायां धोर्वेप् ॥५॥ धोरिच्छायां कृते तुमि सन् वा भवति तुमश्चेप् । भोक्तुमिच्छति बुभुक्षते । चिकीर्षति । जिहीर्षति । इच्छायामिति किं? कर्तुं गच्छति । धोरिति किं? प्रकर्तुमैच्छत् प्राचिकीर्षत् ।

+ **न सनः** ॥६॥ तुमि इच्छायां धोर्यो विहितः सन् तदंतात् सन् न भवति । चिकीर्षितुमिच्छति । तुमीच्छायामिति किं? चिचिकित्सिषति ।

*** स्वेपः काम्यः** ॥ ७ ॥ स्वस्यात्मनो यदिबंतं तस्मादिच्छायां वा काम्यो भवति । पुत्रमिच्छत्यात्मनः पुत्रकाम्यति । वस्त्रकाम्यति । स्वः काम्यति । इदंकाम्यति । स्वग्रहणं किं? पुत्रमिच्छति ब्रह्मचारी परस्य ।

*** क्यजझिमः** ॥ ८ ॥ स्वस्येबंतात् झिमकारांतं त्यक्त्वा क्यज् भवति । स्वस्य पुत्रमिच्छति पुत्रीयति । वस्त्रीयति । कंबलीयति । वाच्यति । अझिम इति किं? उच्चैरिच्छति । किमिच्छति ।

*** गौणादीपश्चाचारे** ॥ ९ ॥ गौणादिबंतादीबंताच्चाचारेऽर्थे क्यच् स्यात् । पुत्रमिवाचरति पुत्रीयति छात्रं । वस्त्रीयति कंबलं । प्रासादे इवाचरति प्रासादीयति कुड्यां ।

+ **कर्तुः क्विः** ॥ १० ॥ कर्तुः गौणादाचारेऽर्थे क्विर्भवति । अश्व इवाचरति अश्वति गर्दभः । गर्दभत्यश्वः । पुरुषति स्त्री । कर्तुरिति किं? पटीयति कंबलं ।

+ **गल्भक्लीबहोडाङ्ङित्** ॥ ११ ॥ एभ्यः क्विर्ङित् भवति । गल्भ इवाचरति गल्भते । क्लीबते । होडते ।

*** क्यङ् च** ॥ १२ ॥ गौणादाचारेऽर्थे कर्तुः क्यङ् भवति । श्येन इवाचरति काकः श्येनायते । कुमुदं पुष्करायते । अश्वायते गर्दभः । गर्दभायतेऽश्वः । केरबाधनार्थश्चकार ।

*** सः खं वा** ॥ १३ ॥ गौणात् कर्तुराचारेऽर्थे क्यङि परतः सकारस्य वा खं स्यात् । मथितं पयस्यते । मथितं पयायते ।

*** अप्सरसः** ॥ १४ ॥ क्यङि परतः सखं भवत्यप्सरसः । अप्सरायते कन्या ।

+ **तद्वत्योजःस्वम्रात्** ॥ १५ ॥ आभ्यां तद्वति वर्तमानाभ्यां क्यङ् स्यात् । ओजस्वीवाचरति ओजायते । ओजस्यते । स्वम्रवानिवाचरति स्वम्रायते । तद्वतीति किं? स्वम्र इवाचरति ।

*** भृशादेश्च्व्योस्तः** ॥ १६ ॥ भृशादेश्च्व्यर्थे क्यङ् भवति सकारतकारयोश्च खं । अभृशो भृशो भवति भृशायते । शीघ्रायते । मद्रायते । उन्मनस्-उन्मनायते । वेहत्--वेहायते ।

डाज्लोहितादिभ्यः क्यष् ॥ १७ ॥ डाज-

१ आदिशब्देन निग्रहविनाशयोर्ग्रहणं ।

तेभ्यो लोहितादिभ्यश्च च्व्यर्थे क्यष् भवति । अदमदमद् भवति दमदमायति । दमदमायते । हडहडायति । हडहडायते । लोहितायति । लोहितायते । निद्रायति । करुणायति ।

***सुखादेर्भुजीपः ॥ १८ ॥** सुखादेरिबंतात् भुज्यर्थे क्यङ् भवति । सुखं भुंक्ते सुखायते । दुःखायते । भुजीति किं ? सुखं वेदयते प्रसाधको देवदत्तस्य ।

+ कष्टकक्षकृच्छ्रसत्रगहनात् पापे चिकीर्षौ ॥१९॥ कष्टादेरिबंताद् पापे वर्तमानात् चिकीर्ष्यर्थे क्यङ् स्यात् । कष्टं चिकीर्षति कष्टायते । कक्षायते । कृच्छ्रायते । सत्रायते । गहनायते ।

वाष्पोष्मफेनादुद्वमौ ॥ २० ॥ वाष्पादेरिबंतादुद्वमत्यर्थे क्यङ् भवति । वाष्पमुद्वमति वाष्पायते । ऊष्माणं उद्वमति ऊष्मायते । फेनायते नदी ।

*** शब्दादेः कृञि ॥ २१ ॥** शब्दादेरिबंतात् करोत्यर्थे क्यङ् स्यात् । शब्दं करोति शब्दायते । वैरायते । कलहायते । अभ्रायते । कण्वायते । मेघायते ।

***रोमंथादुच्चर्वे ॥ २२ ॥** रोमंथशब्दादुच्चर्वे वर्तमानात् कृञर्थे क्यङ् भवति । रोमंथायते गौः । उच्चर्व इति किं ? रोमंथं करोति कीटकः ।

***तपसः क्यच् ॥ २३ ॥** तपःशब्दादिबंतात् कृञि क्यच् भवति । तपः करोति तपस्यति ।

***नमोवरिवश्चित्रङः पूजासपर्याविस्मये ॥ २४ ॥** एभ्यः पूजादिष्वर्थेषु वर्तमानेभ्यः कृञर्थे क्यज् भवति । नमस्करोति नमस्यति सुमतिनाथं । वरिवस्यति गुरून् । चित्रीयते । ङित्वाद्ः । पूजादिष्विति किं ? नमस्करोति ।

+ निरस्यंगेभ्यो णिङ् ॥ २५ ॥ अंगेभ्य इबंतेभ्यो निरस्यर्थे णिङ् भवति । हस्तं निरस्यति हस्तयते । पादयते । निरसीति किं ? हस्तमाचष्टे हस्तयति ।

***पुच्छभांडादश्चौ ॥ २६ ॥** आभ्यां अस्यर्थे चिञर्थे च णिङ् भवति । पुच्छमुदस्यति उत्पुच्छयते । परिपुच्छयते । भांडं संचिनोति संभांडयते । परिभांडयते ।

***चीवरात्परिधानार्ज्योः ॥ २७ ॥** चीवरात् परिधाने अर्जने च णिङ् भवति । चीवरं परिधत्ते समर्जयति वा परिचीवरयते भिक्षुः ।

+ मृदो ध्वर्थे णिज् बहुलं ॥२८॥ मृदो धूनामर्थे णिज् भवति बहुलं । सूत्रं करोति सूत्रयति व्याकरणं । मुंडयति माणवकं । मिश्रयति धान्यं । श्लक्ष्णयति वस्त्रं । पाशं विमोचयति विपाशयति । रूपं दर्शयति रूपयति । पयो भुंक्ते-पयो व्रतयति । सावद्यं न भुंक्ते-सावद्यं व्रतयति । लोमान्यनुमार्ष्टि अनुलोमयति । वस्त्रेण समाच्छादयति संवस्त्रयति । सेनया अभियाति अभिषेणयति । वर्मणा संनह्यते संवर्मयति । वीणयोपगायति उपवीणयति । श्लोकैरुपस्तौति उपश्लोकयति । न च भवति—आख्यानमाचष्टे ।

+ श्वेताश्वाश्वतरगालोडिताह्वारकस्याश्वतरेतकखं च ॥ २९ ॥ एषां णिच्यश्वतरेतकानां खं भवति । श्वेताश्वमाचष्टे श्वेतयति । अश्वतरं-अश्वयति । गालोडितं-गालोडयति । आह्वरकं-आह्वरयति । णिच् संनियोगार्थश्चकारः ।

***हलकलत्वचाः ॥ ३० ॥** हलिकलित्वचां णिच्यदंतता निपात्या । हलिं गृह्णाति हलयति । कलिं—कलयति । त्वचं—त्वचयति । अत्वनिपातः किं ? अजहलत् ।

***वेदार्थसत्यस्याः ॥ ३१ ॥** एषां णिच्याकारांतादेशो भवति । वेदमाचष्टे वेदापयति । अर्थापयति । सत्यापयति ।

***धोर्यङ् भृशाभीक्ष्णेऽशुभ्रुचेः ॥ ३२ ॥** शुभिरुचिमुक्ताद्धोर्भृशेऽभीक्ष्णे चार्थे यङ् भवति । भृशं पुनः पुनर्वा पठति पापठ्यते । देदीप्यते । बोभुज्यते । भृशाभीक्ष्ण इति किं ? ओदनं पचति । अशुभ्रुचेरिति किं ? भृशं शोभते । पुनः पुना रोचते ।

+ सूचिसूत्रिमूत्र्यट्यर्त्यश्यूर्णोः ॥ ३३ ॥

एभ्यो भृशाभीक्ष्णे यङ् भवति । सोसूच्यते । सोसूत्र्यते । मोमूत्र्यते। अटाट्यते।अशाश्यते। अरार्यते । ऊर्णोनूयते । नियमार्थोऽयं योगः । हलादिभ्योऽनेकाज्भ्यः सूच्यादिभ्य एव, एकाज्भ्योऽजादिभ्योऽट्यादिभ्य एव यङ् भवति नान्यतः । भृशं चकास्ति । पुनः पुनरीहते ।

** गत्यर्थात्कुटिले ॥ ३४॥** गत्यर्थाद्धोः कुटिलेऽर्थे यङ् स्यात् । कुटिलं क्रामति चंक्रम्यते । जंगम्यते ।

लुपसदचरजपजभदहगृदशो गर्हे ॥ ३५॥ एभ्यो गर्हेऽर्थे यङ् भवति । गर्हितं लुंपति लोलुप्यते। सासद्यते । चंचूर्यते । जंजप्यते । जंजभ्यते । दंदह्यते । जेगिल्यते । दंदश्यते । गर्ह इति किं ? स्वर्गृहे सुखं सीदति ।

** चुरादिभ्यो णिच् ॥ ३६ ॥** एभ्यो णिच् भवति स्वार्थे । चोरयति । चिंतयति । आडयति । लालयति । पीडयति । भक्षयति । आच्छादयति । मंडयति । छर्दयति । चेतयते । मंत्रयते ।

+ युजादेर्वा ॥ ३७ ॥ युजादिभ्यो वा णिच् स्यात् स्वार्थे । योजयति । योजति । अर्चयति । अर्चति। साहयति । सहति । ईरयति । ईरति । लाययति । लयति । वर्जयति । वर्जति । वारयति । वरति । वारयते । वरते । धावयति । धवति । आपयति।आपति।

+ भूङः प्राप्तौ णिङ् ॥ ३८ ॥ भुङो णिङ् भवति प्राप्तौ वा । भावयते । भवते ।

हेतुमति ॥ ३९ ॥ हेतुमति ध्वर्थे णिच् भवति । कटं कारयति । ओदनं पाचयति । छात्रं पाठयति ।

कंड्वादेर्यक् ॥ ४० ॥ कंड्वादेर्यगागमो भवति स्वार्थे । कंडूयति । कंडूयते । वल्गूयति । मंतूयति । भिषज्यति । असूयति ।

गुपूधूप्विच्छपन्पणेरायः ॥ ४१ ॥ एभ्य आयत्यो भवति । गोपायति । धूपायति । विच्छायति । पनायते । पणायते ।

कमृतेर्णिङीयङ् ॥ ४२ ॥ आभ्यां यथासंख्यं णिङ् ईयङ् इत्येतौ त्यौ भवतः । कामयते । ऋतिः सौत्रो धुः । घृणार्थो गत्यर्थश्च । ऋतीयते ।

** वाऽगे त्रयः ॥ ४३ ॥** अगे परे गुपादिभ्य आयो णिङीयङ् च त्रयो वा भवंति । गोपायांचकार । जुगोप । धूपायिता । धूपिता । कामयिता । कमिता । ऋतीयिता । अर्तिता ।

तदंता धवः ॥ ४४ ॥ येऽनुक्रांताः सन्नादयस्तदंताः शब्दाः धुसंज्ञा भवंति । तथा चोदाहृतं ।

+ गिर्नोऽल्ये ॥४५॥ गिसंज्ञको धुर्न भवत्यल्ये परतः । अभ्यमनायत । प्रासादीयत् । गिरिति किं ? अमहापुत्रीयत् । अल्य इति किं ? औत्सुकायत ।

स्यतासी ऌल्वोः ॥ ४६ ॥ धोः स्यतासी इत्येतौ त्यौ भवतः ऌलुटो परतः । करिष्यति । अकरिष्यत् । कर्त्तास्मि । भोक्ष्यते । अभोक्ष्यत । भोक्ता ।

** कास्यनेकाच्त्याल्लिड्वत् कृञ्याम् ॥४७॥** कासेरनेकाज्भ्यः त्यांतेभ्यश्च लिड्वत् कृञि परे आम् भवति । कासांचक्रे । कासाञ्चकार । चकासाम्बभूव । चकासामास । दरिद्राञ्चकार । दरिद्राम्बभूव । दरिद्रामास । बुभूषाञ्चकार । बुभूषाम्बभूव । बुभूषामास । गवाञ्चकार । गवाम्बभूव । गवामास । लोलूयाञ्चक्रे । कारयाञ्चकार । कारयाम्बभूव । कारयामास ।

+ सर्विजादिदयायासोऽनृच्छूर्णोः ॥४८॥ सर्विजादेर्धोः ऋच्छत्यूर्णवर्जितात् दयादेश्च लिड्वत् कृञ्याम् भवति । इंदाम्बभूव । इंदाञ्चकार । इंदामास । एधांचक्रे । दयांचक्रे । पलायांचक्रे । आसांचक्रे । अनृच्छूर्णोरिति किं ? आनर्च्छ । प्रोर्णुनाव ।

** वोष्विदजागृसमिंधः ॥ ४९ ॥** एभ्यो लिड्वत् कृञ्याम् स्यात् वा । ओषाञ्चकार । ओषाम्बभूव । ओषामास । उवोष । विदाञ्चकार । विदाम्बभूव । विदामास । विवेद । जागराञ्चकार । जागराम्बभूव । जागरामास । जजागार । समिंधाञ्चक्रे । समींधे ।

भीह्रीभृहोरुज्वत् ॥ ५० ॥ भ्यादेर्लिड्वत्कृञ्याम् वा भवति उचीव कार्यं च । बिभयाञ्चकार ।

१। जागृसाहचर्याद्वादादिकस्य विदेर्ग्रहणं।

बिभयाम्बभूव । बिभयामास । बिभाय । जिह्रयाञ्चकार । जिह्रयाम्बभूव । जिह्रयामास । जिह्राय । बिभराञ्चकार । बिभराम्बभूव । बिभरामास । बभार । जुहवांचकार । जुहवांबभूव । जुहवामास । जुहाव ।

*** विदां कृ लोटि ॥ ५१ ॥** विदां कृ वा निपात्यो लोटि परतः । विदांकरवाणि । वेदानि । विदांकरवाव । वेदाव । विदांकरवाम । वेदाम । विदांकुरु । विद्धि । विदांकुरुतं । वित्तं । विदांकुरुत । वित्त । विदांकरोतु । वेत्तु । विदांकुरुतां । वित्तां । विदांकुर्वतु । विदंतु ।

सिर्लुङि ॥ ५२ ॥ धोः सिस्यो भवति लुङि परतः । अकार्षीत् । अभैत्सीत् ।

स्पृशमृशकृषतृपदृपो वा ॥ ५३ ॥ एभ्यो लुङि सिर्वा स्यात् । अस्प्राक्षीत् । अस्पार्क्षीत् । अस्पृक्षत् । अम्राक्षीत् । अमार्क्षीत् । अमृक्षत् । अक्राक्षीत् । अकार्क्षीत् । अकृक्षत् । अत्राप्सीत् । अतार्प्सीत् । अतृपत् । अद्राप्सीत् । अदार्प्सीत् । अदृपत् ।

*** इकः शलोऽनिटोऽदृशः क्सः ॥ ५४ ॥** इकः परो यः शल् तदंतात् दृशिवर्जितात् धोरनिटः लुङि क्सो भवति । अलिक्षत् । अधिक्षत् । अधुक्षत् । इक इति किं ? अधाक्षीत् । शल इति किं ? अरौत्सीत् । अनिट इति किं ? अमोषीत् । अदृश इति किं ? अद्राक्षीत् ।

श्लिषः स्वार्थे ॥५५॥ श्लिषेः स्वार्थे लुङि क्सो भवति । आश्लिक्षत् भार्या दत्तः । स्वार्थ इति किं ? उपाश्लिषत् जतु च काष्ठं च ।

*** णिकमिश्रिद्रुस्रोः कर्त्तरि कच् ॥ ५६ ॥** ण्यंतेभ्यः कमादिभ्यश्च कर्तृवाचिनि लुङि परतः कञ् भवति । अचीकरत् । अबीभवत् । अचकमत । अशिश्रियत् । अदुद्रुवत् । असुस्रुवत् । कर्त्तरीति किं ? अकारयिषातां कटौ पुत्रेण ।

वा धेट्श्व्योः ॥५७ ॥ आभ्यां लुङि परतः कञ्वा स्यात् । अदधत् । अधात् । अधासीत् । अशिश्वियत् । अश्वत् । अश्वयीत् ।

*** वक्त्यसुख्यातेरङ्[१] ॥ ५८ ॥** एभ्यः कर्तरि लुङ्यङ् भवति । अवोचत् । पर्यास्थत । आख्यत् । आख्यतां । आख्यन् ।

लिपिसिचह्वार्त्तेः ॥ ५९ ॥ एभ्यो लुङ्यङ् भवति । अलिपत् । आसिचत् । आह्वत् । आरत् ।

दे वा ॥६० लिपादेर्दे लुङ्यङ् वा भवति । अलिपत । अलिप्त । असिचत । असिक्त । अह्वत । अह्वास्त । समारत । समार्ष्ट ।

*** द्युत्पुष्यादिलृत्सर्तिशास्तेर्मे ॥ ६१ ॥** द्युतादेः पुष्यादेः लृकारेद्भ्यः सर्तिशास्तिभ्यां च मे लुङ्यङ् भवति । व्यद्युतत् । व्यलुटत् । व्यरुटत् । अपुषत् । अरुषत् । अशुषत् । अगमत् । अपतत् । असरत् । अशिषत् । मे इति किं ? व्यद्योतिष्ट । व्यत्यपुक्षत ।

वेरितः ॥ ६२ ॥ इरशब्देतो धोर्मे लुङ्यङ् वा भवति । अरुधत् । अरौत्सीत् । अभिदत् । अभैत्सीत् ।

*** जॄश्विस्तंभुम्रुचुम्लुचुग्रुचुग्लुचुग्लुंचः ॥६३।** एभ्यो लुङ्यङ् वा स्यात् । अजरत् । अजारीत् । अश्वत् । अश्वयीत् । अस्तभत् । अस्तंभीत् । न्यम्रुचत् । न्यम्रोचीत् । न्यम्लुचत् । न्यम्लोचीत् । अग्रुचत् । अग्रोचीत् । अग्लुचत् । अग्लोचीत् । न्यग्लुंचत् । न्यग्लुंचीत् ।

*** दीपजनबुधपूरितायिप्यायस्ते ञिः ।६४।** दीपादेः कर्तरि लुङि ते परतः ञिर्वा भवति । अदीपि । अदीपिष्ट । अजनि । अजनिष्ट । अबोधि । अबुद्ध । अपूरि । अपूरिष्ट । अतायि । अतायिष्ट । अप्यायि । अप्यायिष्ट । त इति किं ? अदीपिषातां ।

पदः ॥ ६५ ॥ पदः लुङि ते परतः ञिर्भवति । उदपादि भैक्ष्यं । समापादि सस्यं ।

*** कर्मणि ॥ ६६ ॥** कर्तृत्वेन विवक्षिते कर्मणि लुङि ते ञिर्वा भवति । अकारि कटः स्वयमेव । अकृत कटः स्वयमेव । अलावि केदारः । अलविष्ट केदारः स्वयमेव ।

---

१ । ब्रूञो वचिरादेशो "बहुलं खौ" इति बाहुलकादथवेदं वक्तिग्रहणमेव ज्ञापकं गेऽन्यादेशस्य ।

दुहश्च ॥ ६७ ॥ दुहेः कर्तृकर्मणि लुङि ते वा ञिर्भवति । अदोहि गौः स्वयमेव । अदुग्ध गौः स्वयमेव । नियमोऽयं—दुह एव हलंतात् ञिर्वा नान्यतः। अभेदि कुशूलःस्वयमेव। अछेदि काष्ठःस्वयमेव।

***डौ ॥ ६८ ॥** धोर्डावर्थे लुङि ते ञिर्भवति । आसि भवता । अहारि भागो भवता । अकारि कटो भवता ।

न रुधः ॥ ६९ ॥ रुधः कर्मकर्तरि ञिर्न स्यात् । अरुद्ध गौः स्वयमेव ।

तपोऽनुतापे ॥ ७० ॥ तपेः कर्मकर्तरि अनुतापे च ञिर्न स्यात् । अतप्त तपः स्वयमेव साधुः । अन्ववातप्त पापेन कर्मणा । अनुतापे चेति किं ? अतापि पृथ्वी राज्ञा ।

यक् दुहः ॥ ७१ ॥ दुहेः कर्मकर्तरि यक् न स्यात् । दुग्धे गौः स्वयमेव । अदुग्ध गौः स्वयमेव ।

नमः शप्तु ॥ ७२ ॥ नमेः कर्मकर्तरि यग् न भवति शप्तु स्यात् । नमते दंडः स्वयमेव । अनमत दंडः स्वयमेव ।

+ दधिणिश्रिश्रंथिग्रंथिवचस्नोश्च ञिश्च।७३। दे धीनां ण्यंतानां श्रयादीनां च नमेश्च ञिर्यक् च न भवति । व्यकृत सैंधवाः स्वयमेव । विकुर्वते सैंधवाः स्वयमेव । अपीपचत औदनः स्वयमेव । पाचयते ओदनः स्वयमेव । उदशिश्रियत दंडः स्वयमेव । उच्छ्रयते दंडः स्वयमेव । अश्रंथिष्ट मेखला स्वयमेव । श्रथ्नीते मेखला स्वयमेव । अग्रंथिष्ट मेखला स्वयमेव । ग्रथ्नीते मेखला स्वयमेव । अवोचत कथा स्वयमेव । ब्रूते कथां स्वयमेव । प्रास्नोष्ट गौः स्वयमेव । प्रस्नुते गौः स्वयमेव । अनंस्त दंडः स्वयमेव । नमते दंडः स्वयमेव ।

+ भूषार्थसन्किरादीनां यक् च ॥ ७४ ॥ भूषार्थानां सन्नंतानां किरादीनां च कर्मकर्तरि यक् ञिश्च न भवति । भूषयते कन्या स्वयमेव । अबूभुषत कन्या स्वयमेव । मंडयते कन्या स्वयमेव । अममंडत कन्या स्वयमेव । अलंकुरुते कन्या स्वयमेव । अलमकृत कन्या स्वयमव । अलमचीकरत कन्या स्वयमेव । चिकीर्षते कटः स्वयमेव । अचिकीर्षिष्ट स्वयमेव कटः । बिभित्सते कुशूलः स्वयमेव। अबिभित्सिष्ट कुशूलः स्वयमेव । किरते हस्ती स्वयमेव । अकीर्ष्ट हस्ती स्वयमेव । गिरते ग्रासः स्वयमेव । अगीर्ष्ट ग्रासः स्वयमेव ।

कुषरजोः श्यो मे वा ॥ ७५ ॥ कुषि रंजी इत्येताभ्यां कर्मकर्तरि मे श्यो वा भवति । कुष्यति पादः स्वयमेव । कुष्यते पादः स्वयमेव । रज्यति वस्त्रं स्वयमेव । रज्यते वस्त्रं स्वयमेव । यदा श्यो न भवति तदा यग्दविधी स्तः ।

+ कर्मवल्लेऽश्रवादीनां ॥ ७६ ॥ श्रवत्यादिवर्जितानां धूनां कर्मकर्तरि विहिते लकारे कर्मवत् कार्यं भवति । भिद्यते कुशूलः स्वयमेव । लूयते लूयमानो वा केदारः स्वयमेव । अपाच्योदनः स्वयमेव । अश्रवादीनामिति किं? श्रवत्युदकं स्वयमेव । गलत्युदकं स्वयमेव ।

*** तपस्तपोऽधेः ॥ ७७ ॥** तपेर्धोः तपोऽधेः तपःकर्मकस्य कर्ता कर्मवद् भवति । तप्यते तपः साधुः । अतप्यत तपस्तापसः । तपोऽधेरिति किं ! उत्तपति सुवर्णं सुवर्णकारः ।

+ सृजः श्राद्धे ॥ ७८ ॥ सृजः श्राद्धवति कर्तरि लकारे सति कर्मवत् कार्यं स्यात् । सृज्यते मालां धार्मिकः। श्राद्ध इति किं? सृजति मालां मालिकः।

+ क्वचित् करणे ॥ ७९ ॥ धोः करणे कर्तरि लकारे सति क्वचित् कर्मवत् कार्यं भवति । परिवारयंति पुरुषाः कंटकैर्वृक्षं । परिवारयंते कंटकाः स्वयमेव वृक्षं । क्वचिदिति किं ? साधु असिश्छिनत्ति ।

गे यक् ॥ ८० ॥ धोर्डिवाचिनि गे परतः यग् भवति । सुप्यते भवता । आस्यते भवता ग्लायते लतया । क्रियते कटः । भ्रियते कर्मकारः । ह्रियते भारः ।

कर्तरि शप् ॥ ८१ ॥ धोः कर्तृवाचिनि गे परतः शप् भवति । जयति । तरति । पठति । पचति । पचते ।

*** ह्वदादेरुजुप् ॥ ८२ ॥** ह्वादेरदादेश्चोत्त-

रस्य शपः उज्जुपौ स्तः । जुहोति । बिभेति । जिह्रेति । अस्ति । प्साति । क्षौति । अध्येति । वेत्ति । सूते । इष्टे ।

दिवादेः श्यः ॥ ८३ ॥ दिवादिभ्यः श्यो भवति कर्तरि गे परतः । दीव्यति । सीव्यति । कुध्यति । पुष्यति । सूयते ।

वा भ्राशभ्लाशभ्रमक्रमत्रसत्रुटलषः ॥८४॥ एभ्यो गे परतः श्यो वा स्यात् । भ्रास्यते । भ्रासते । भ्लास्यते । भ्लासते । भ्राम्यति । भ्रमति । क्राम्यति । क्रामति । त्रस्यति । त्रसति । त्रुट्यति । त्रुटति । लष्यति । लषति ।

यसः ॥ ८५ ॥ यसेर्वा श्यो भवति गे परतः । यस्यति । यसति ।

समः ॥ ८६ ॥ सम्पूर्वाद् यसः श्यो वा स्यात् । संयस्यति । संयसति । नियमोऽयं–गेः सम एव वा श्यो नान्यतः । प्रयस्यति । आयस्यति । वियस्यति ।

स्वादेः श्नुः ॥ ८७ ॥ स्वादिभ्यः श्नुर्भवति कर्तरि गे परे । सुनोति । सुनुते । मिनोति । मिनुते । धृष्णोति ।

श्रोः शृः ॥ ८८ ॥ श्रु इत्येतस्य कर्तरि गे परतः श्नुर्भवति शृ इत्ययं चादेशः । धर्मं शृणोति ।

वाऽक्षः ॥ ८९ ॥ अक्षतेर्वा श्नुर्भवति । अक्ष्णोति । अक्षति ।

तक्षः स्वार्थे ॥ ९० ॥ तक्षतेः स्वार्थे तनूकरणे श्नुर्वा स्यात् । तक्ष्णोति, तक्षति काष्ठं । स्वार्थे इति किं ? संतक्षति वाग्भिर्दुर्जनः ।

*** तुदाद्यचः शः ॥ ९१ ॥** तुदादिभ्यो गे परतः शो भवति । तुदति । तुदते । दिशति । निक्षिपति । कृषति । जुषते । पणते । लज्जते ।

*** रुधां श्नम् ॥ ९२ ॥** रुधादीनां गे श्नम् भवति । रुणद्धि । भिनत्ति । विशिनष्टि । भुनक्ति ।

कृञ्तनादेरुः ॥ ९३ ॥ कृञस्तनादिभ्यश्च गे उर्भवति । करोति । तनोति । वनुते । मनुते ।

धिन्विकृण्व्योरच ॥ ९४ ॥ आभ्यां उर्भवति अकारश्चांतादेशः । धिनोति । कृणोति ।

क्र्यादेः श्ना ॥ ९५ ॥ क्र्यादिभ्यः श्ना भवति गे परतः । क्रीणाति । प्रीणाति । गृह्णाति । वृणीते ।

स्तंभुस्तुंभुस्कंभुस्कुंभुस्कुंभ्यः श्नुश्च ॥ ९६ ॥ एभ्यः श्नुर्भवति कर्तरि गे श्ना च । स्तभ्नाति । स्तभ्नोति । स्तुभ्नाति । स्तुभ्नोति । स्कभ्नाति । स्कभ्नोति । स्कुभ्नोति । स्कुभ्नाति । स्कुनोति । स्कुनाति ।

हौ हलः श्नः शानः ॥ ९७ ॥ हलः परस्य श्नात्यस्य शानो भवति हौ परतः । गृहाण । अशान । कुषाण । मुषाण । हल इति किं ? क्रीणीहि ।

*** ईपा वाक् ॥ ९८ ॥** अत्र धोरधिकारे ईपा निर्दिष्टं वाक्संज्ञं भवति । कर्मण्यण् । कुंभकारः । वाक्प्रदेशाः-वागमिङ्"इत्येवमादयः ।

कृदमिङ् ॥ ९९ ॥ इतः प्रभृत्यत्र धोरधिकारे कृत्संज्ञकास्त्याः वेदितव्याः मिङं वर्जयित्वा । वक्ष्यति—तव्यानीयौ । स्तोतव्यः । स्तवनीयः ।

प्राक् क्तेर्वाऽसमः ॥१००॥ क्ति इत्येतस्मात् प्राक् असमस्त्यो वा भवति । इत्यधिकारो वेदितव्यः । जेयं । जेतव्यं । ज्ञः । ज्ञाता । ज्ञायकः । प्राक्क्तेरिति किं ? चिकीर्षा । क्तेरत्यो बाधकः । असम इति किं ? अणं को बाधत एव । गोदः । कंबलदः ।

ण्वोर्व्यः ॥१०१॥ ण्वु इत्येतस्मात् प्राक् ये त्यास्ते व्यसंज्ञका भवंति । पुत्रस्य कर्तव्यं । दत्तस्य करणीयं । व्यप्रदेशाः—व्यस्य वा कर्तरि,,इत्येवमादयः ।

तव्यानीयौ ॥१०२॥ धोरेतौ त्यौ स्तः । हर्तव्यं । हरणीयं ।

*** योऽचोऽख्यास्खुः ॥१०३॥** अजंताद्धोर्यो भवति ख्यादिवर्जितात् । देयं । धेयं । नेयं । अच

१ । शित्करणं शानस्यानुबंधस्थानिवद्भावानित्यत्वज्ञापनार्थं । तेन-पचमाना स्त्री, ओचनवम्-दिवं दिवं च न।

इति किं ? पाक्यं । अच्यास्वुरिति किं ? याच्यं । आसाव्यं । कार्यं । धार्यं ।

*** पोरदुङोऽत्रपिवपिरापिलपिजपिजभिचमिदभेः ॥१०४॥** पवर्गांतादुदुङो धोः त्रपादिवर्जितात् यो भवति । शप्यं । लभ्यं । रम्यं । पोरिति किं ? पाठ्यं । अदुङः इति किं ? लेप्यं । अत्रपादेरिति किं ? त्राप्यं । वाप्यं । राप्यं । लाप्यं । जाप्यं । जाभ्यं । आचाम्यं । दाभ्यं ।

+ यतिचतितकिशकिशसिसहयजेः॥१०५॥ एभ्यो यो भवति । यत्यं । चत्यं । तक्यं । शक्यं । शस्यं । सह्यं । यज्यं ।

*** गदमदयमोऽगेः ॥ १०६ ॥** गदादेरगिपूर्वाद् यो भवति । गद्यं । मद्यं । यम्यं । अगेरिति किं ? निगाद्यं । प्रगाद्यो धर्मः ।

*** चरेः ॥ १०७ ॥** अगिपूर्वाच्चरेर्यो भवति । चर्यं ।

+ आङोऽगुरौ ॥ १०८ ॥ आङ्पूर्वाच्चरेर्यो भवत्यगुरावर्थे । आचर्यं व्रतं । अगुराविति किं ? आचार्यः पूज्यपादः ।

*** पण्यावद्योपसर्यावर्यं विक्रेयगर्ह्यर्तुमत्यपेये ॥ १०९ ॥** पण्यादयो निपात्यंते विक्रेयादिष्वर्थेषु । पण्या गौः विक्रेय इत्यर्थः । अवद्यं पापं गर्ह्यमित्यर्थः । उपसर्या गौः ऋतुमतीत्यर्थः । शतेन वर्या स्त्री उपेया सेव्या इत्यर्थः । अन्यत्र पाण्यः साधुः । अनूद्यः जनापवादः । उपसार्या शरदि मथुरा । वृत्या गौः ।

*** स्वामिवैश्येऽर्यः ॥ ११० ॥** अर्त्तेर्यो निपात्यः स्वामिनि वैश्ये चाभिधेये । अर्यः स्वामी वैश्यश्च । आर्यः साधुरन्यत्र ।

वदः सुपि क्यप् च ॥ १११ ॥ वदेरगि सुपि वाचि क्यप् भवति यश्च । सत्योद्यं । सत्यवद्यं । तत्त्वोद्यं । तत्त्ववद्यं । सुपीति किं ? वाद्यं ।

*** भूयत्याग्निचित्या भावे ॥ ११२ ॥** एते शब्दाः अगिसुपि वाचि भावे निपात्यंते । ब्रह्मभवनं ब्रह्मभूयं गतः । गोहत्या । स्त्रियां क्यपि तुक् । अग्नेश्चयनं अग्निचित्या ।

*** शास्स्त्वेतिवृञ्दृजुषः ॥ ११३ ॥** एभ्यः क्यप् भवति । शिष्यः । स्तुत्यः । इत्यः । अधीत्यः । प्रावृत्यः । आदृत्यः । जुष्यः ।

*** ऋदुङोऽक्लृपचृतृचः ॥ ११४ ॥** ऋदुङो धोः क्यप् भवति क्लृपादिवर्जितात् । वृत्यं । वृध्यं । सृध्यः । अक्लृपादेरिति किं ? संकल्प्यं । चर्त्यं । अर्च्यं ।

*** जिविपून्यो हलिमुंजकल्के ॥ ११५ ॥** जेः विपूर्वाभ्यां पूनीभ्यां क्यप् भवति हल्यादिषु । जित्यो हलिः महद्धलं । विपूयो मुंजः तृणविशेषः । विनीयः कल्कः त्रिफलादीनां । जेयं । विपव्यं । विनेयमन्यत्र ।

पदाऽस्वैरिबाह्यापक्ष्ये ग्रहः ॥ ११६ ॥ ग्रहेः क्यप् भवति पदादिष्वर्थेषु । प्रगृह्यं पदं । गृह्यका इमे परवशा इत्यर्थः । ग्रामगृह्या स्त्री । बहिर्भूतेत्यर्थः । भुजबलगृह्यः । भरतगृह्यः । तत्पक्ष्य इत्यर्थः । ग्राह्यमन्यत्र ।

भृञोऽखौ ॥ ११७ ॥ भृञः क्यप् भवत्यखौ । भृत्याः कर्मकराः । अखाविति किं ? भार्या नाम क्षत्रियाः ।

+ सामि वा ॥ ११८ ॥ संपूर्वात् भृञः क्यप् भवति वा । संभृत्याः । संभार्याः भृतकाः ।

*** कृमृजवृषजपशंसदुहगुहः ॥ ११९ ॥** एभ्यः क्यप् भवति वा । कृत्यं । कार्यं । मृज्यं । मार्ग्यं । वृष्यं । वर्ष्यं । जप्यं । जाप्यं । शस्यं । शंस्यं । दुह्यं । दोह्यं । गुह्यं । गोह्यं ।

*** खेयमृषोद्यं ॥ १२० ॥** खेयमृषोद्यशब्दौ निपात्येते । खनेः क्यप् नस्य चेत्वं । खेयः कूपः । मृषापूर्वाद् वदेः क्यप् । मृषोद्यं ।

*** कुप्याज्यभिद्योद्ध्ययुग्यं खौ ॥ १२१ ॥** कुप्यादयः खौ निपात्यंते । गुपेरादौ कत्वं क्यपि । कुप्यं फल्गुभांडं । आज्यं घृतं । भिनत्ति कूलमिति भिद्ध्यो नदः । उज्झत्युदकमित्युद्ध्यो नदः । युग्यं वाहनं । खाविति किं ? गोप्यं । आज्यं । भेद्यं । उज्झ्यं । योग्यं ।

ण्यः ॥ १२२ ॥ धोर्ण्यो भवति । हार्यं । कार्यं । वाक्यं ।

+ पाणिसमवे सृजः ॥ १२३ ॥ आभ्यां

सृजेर्ण्यो भवति । पाणिभ्यां सृजते इति पाणिसर्ग्या रज्जुः । समवसर्ग्यः कटः ।

ओरावश्यके ॥ १२४ ॥ उवर्णांताद्धोरावश्यकेऽर्थे ण्यो भवति । अवश्यपाव्यं । अवश्यलाव्यं । आवश्यक इति किं ? पव्यं । लव्यं ।

*** वाऽमावास्याधारे ॥ १२५ ॥** अमावाचि वसेर्ण्यो भवति आधारे । प्रश्च वा निपात्यः । अमा सह वसतः सूर्याचंद्रमसौ अस्यां तिथाविति अमावस्या । अमावास्या ।

*** पाय्यधाय्यसान्नाय्यनिकाय्यानाय्यप्रणाय्यं मानग्घवि‍र्निवासानित्यासम्मतौ॥ १२६॥** पाय्यादयो मानादिष्वर्थेषु निपात्यंते । मीयतेऽनेनेति पाय्यं मानं । माङो ण्ये पत्त्वं । धीयते समिधोऽग्नावनयेति धाय्या ऋक् । धाञो ण्यः । सान्नाय्यं हविः । संपूर्वाण्णीञो ण्यायादेशौ गेर्दीश्च । निकाय्यो निवासः । निपूर्वात् चिञो ण्यायादेशौ कुत्वं च । आनाय्यो दक्षिणाग्निः । आनयतेर्ण्यायादेशौ अनित्येर्थे । प्रणाय्यश्चौरः । प्रणीञो ण्यायादेशौ असम्मत्यर्थे । मेयं । धेयं । सन्नेयं । निश्चेयं । आनेयं । प्रणेयमित्यन्यत्र ।

*** कुंडपाय्यसंचाय्यराजसूयाः क्रतौ॥१२७॥** कुंडपाय्यादयः क्रतौ ण्यांताः निपात्यंते । कुंडैः पीयते सोमोऽस्मिन्निति कुंडपाय्यः । ण्ये युक् । संचीयते इति संचाय्यः । संचिञो ण्यायादेशौ । राज्ञा सूयते राजा वा सूयतेऽस्मिन् इति राजसूयः क्रतुः । सुञः क्यप् दीश्च । कुंडपानं । संचेयं । राजसवनमन्यत्र ।

*** परिचाय्योपचाय्यसमूह्यचित्योऽग्नौ १२८** परिचाय्यादयो निपात्या अग्नावर्थे । पर्युपाच्चिञो ण्यायादेशौ । परिचाय्यः । उपचाय्यः । समूह्यः । समः उहेर्ण्यः । चित्योऽग्निः । चिञः क्यप् । परिचेयः । उपचेयः । समूहितव्यः । चेयोऽन्यत्र ।

ण्वुतृच् ॥ १२९ ॥ धुभ्यो ण्वुतृचौ स्तः । वाचकः । वक्ता । वादकः । वदिता । दर्शकः । द्रष्टा । भारकः । भर्त्ता ।

*** पचादिभ्योऽच् ॥ १३० ॥** एभ्यः अच् भवति । पचतीति पचः । वचः । शरः । वदः । वरः । करः ।

*** नंद्यादिभ्योऽनः ॥ १३१ ॥** एभ्यः अनस्यो भवति । नंदयतीति नंदनः । दर्पणः । रमणः । संक्रंदनः । जनार्दनः ।

*** ग्रहादिभ्यो णिन् ॥ १३२ ॥** एभ्यो णिन् भवति । गृह्णातीति ग्राही । उत्साही । स्थायी । मंत्री ।

+ नौ श्रुशाविश्वपरक्षः ॥ १३३ ॥ नौ वाचि एभ्यो णिन् स्यात् । निश्रावी । निशायी । निवेशी । निवापी । निरक्षी ।

+ नञि याच्व्रजवद्वससंव्याहृव्याहृः॥१३४ नञ्पूर्वेभ्यो याजादिभ्यो णिन् स्यात् । न याचते अयाची । अव्राजी । अवादी । अवासी । असंव्याहारी । अव्याहारी ।

+ अचित्तेऽचः ॥ १३५ ॥ नञ्वाचि धोरजंतात् णिन् स्यादचित्तेर्थे । न करोतीत्यकारी परशुः । अहारी गंधः । अचित्त इति किं ? अकर्ता कटस्य दत्तः ।

*** रुधराधोऽपे ॥ १३६ ॥** अपे वाच्याभ्यां णिन् स्यात् । अपरोधी । अपराधी ।

+ इन् च परौ भ्वः ॥ १३७ ॥ परौ वाचि भवतेरिन् भवति णिन् वा । परिभवी । परिभावी ।

+ वौ षिञ्श्यो देशे ॥ १३८ ॥ वौ वाचि षिञ्शीङ्भ्यां देशेऽर्थे इन् स्यात् । विसयी देशः । विशयी देशः ।

ज्ञाकॄगॄप्रीगुङः कः ॥ १३९ ॥ ज्ञादिभ्य इगुङश्च धोः कस्यो भवति । जानातीति ज्ञः । किरः । गिरः । प्रियः । लिखः । विबुधः । बृषः ।

*** गावातोऽनिक् ॥१४०॥** गौ वाचि धोराकारांतात् को भवत्यानिक् च । प्रस्थः । सुरः । व्यालः । सुत्रः । सुग्लः । सुम्लः । गाविति किं ? त्राता । अनिगिति किं ? प्रह्वः । सुज्यः । विम्यः ।

पाघ्राध्माधेट्दृशः शः ॥ १४१ ॥ गौ वाचि पादिभ्यः शो भवति । उत्पिबः । विजिघ्रः । उद्धमः । विधयः । उत्पश्यः ।

लिंविंद्धारिपारिवेद्युदेजिचेतिसातिसाहोऽगौ ॥ १४२ ॥ लिंपविंदिभ्यां धार्यादिभ्यश्च ण्यंतेभ्यः शो भवत्यगौ वाचि। लिंपतीति लिंपः। विंदः। धारयः। पारयः। वेदयः। उदेजयः। चेतयः। सातं सुखं करोतीति णिचि सातयः। साहयः। अगाविति किं? प्रलिपः। निर्विदः।

*** दुन्योर्णः ॥१४३॥** दुनीभ्यामगौ णो भवति। दुनोतीति दावः। नायः। अगाविति किं? प्रदवः। प्रणयः।

*** ज्वलादिग्रहाद्वा ॥ १४४ ॥** ज्वलादिभ्यो ग्रहेश्च अगौ णो वा स्यात्। ज्वालः। ज्वलः। स्थालं। स्थलं। नालः। नलः। चालः। चलः। बालः। बलं। कोलः। कुलं। फालः। फलं। पातः। पतः। क्वाथः। क्वथः। क्षारः। क्षरः। बोधः। बुधः। कासः। कसः। ग्राहः। ग्रहः।

*** तनूश्याद्रुधाश्रुसंस्रवतीणश्वसः॥१४५॥** एभ्यो णो भवति। तानः। उत्तानः। अवश्यायः। दायः। धायः। व्याधः। आश्रावः। संस्रावः। अत्यायः। श्वासः।

हृसोऽवे ॥ १४६ ॥ हृसाभ्यामवपूर्वाभ्यां णत्यः स्यात्। अवहारः। अवसायः।

*** नृत्खनूरजः शिल्पिनि ट्वुः ॥ १४७॥** नृतादिभ्यः ट्वुर्भवति शिल्पिनि गम्यमाने। नृत्यतीति नर्तकः। खनकः। रजकः। नर्तकी। खनकी रजकी। शिल्पिनीति किं? नर्त्तिका।

*** पाणिघट्टताडघट् ॥ १४८ ॥** पाणौ ताडे च वाचि हंतेरट्टल्यघटित्वानि निपात्यंते शिल्पिनि। पाणिं पाणिना वा हंतीति पाणिघः। ताडं हंतीति ताडघः।

*** गस्थकः ॥ १४९ ॥** गायतेस्थको भवति शिल्पिनि। गाथकः।

*** णनट् ॥ १५० ॥** गायतेर्णनट् स्यात् शिल्पिनि। गायनः। गायनी।

व्रीहिकाले हः ॥ १५१ ॥ जहातेर्व्रीहौ काले च णनट् स्यात्। जहत्युदकमिति हायना व्रीहयः। जहाति भावान् सह वृत्तानिति हायनः संवत्सरः।

प्रुसृल्वः साधौ वुन् ॥ १५२ ॥ एभ्यः साध्वर्थे वुन् भवति। साधु प्रवते प्रवकः। सरकः। लवकः। साधाविति किं? प्रावकः।

*** आशिषि वुञ् ॥ १५३ ॥** आशिष्यर्थे धोर्वुञ् भवति। जीवतादित्याशास्यमानो जीवकः। जीवका। नंदकः। नंदका।

इति जैनेंद्रव्याकरणे शब्दार्णवचंद्रिकायां
लघुवृत्तौ द्वितीयाध्यायस्य
प्रथमः पादः।

द्वितीयः पादः।

—:o:—

कर्मण्यण् ॥ १ ॥ कर्मणि वाचि धोरण् भवति। नगरं करोति नगरकारः। कांडलावः। द्वारपालः।

+ शीलीक्षिक्षम्काम्याचर्भक्षेर्णः ॥ २ ॥ एभ्यो णो भवति कर्मणि वाचि। धर्मं शीलयतीति धर्मशीलः। धर्मशीला। सुखप्रतीक्षः। क्लेशक्षमः। धर्मकामः। उत्तमाचारः। वायुभक्षः।

*** आतः कोऽह्वावामः ॥३॥** आकारांताद्धोः कर्मणि वाचि को भवति ह्वादिवर्जितात्। सर्वं जानातीति सर्वज्ञः। अंगुलित्रः। पार्ष्णित्रं। अह्वादेरिति किं? स्वर्गह्वायः। तंतुवायः। धान्यमायः।

प्रे ॥ ४ ॥ कर्मणि प्रशब्दे च वाचि धोरातः को भवति। तत्त्वप्रज्ञः। नियमोऽयं—प्र एव गो नान्यस्मिन्। गोसंदायः। वडवासंदायः।

दाज्ञः ॥ ५ ॥ दाज्ञाभ्यां कर्मणि प्रशब्दे च वाचि को भवति। मोक्षप्रदः। सुखप्रदः। तत्त्वप्रज्ञः। धर्मप्रज्ञः। अयमपि नियमः—प्रे दाज्ञ एव नान्यतः। अंगुलिप्रत्रायः। पार्ष्णिप्रत्रायः।

संख्यः ॥ ६ ॥ संपूर्वात् ख्या इत्येतस्मात् को भवति। पशून् संख्याति संचष्टे पशुसंख्यः। गोसंख्यः।

सुपि ॥ ७ ॥ सुबंते वाचि धोरातः को भवति । द्वाभ्यां पिबतीति द्विपः । पादपः । कच्छपः । स्वर्गाय प्रददातीति स्वर्गप्रदः ।

+ नखमुचादयः ॥ ८॥ एते भावे वेदितव्याः । नखान् मुंचंतीति नखमुचानि धनूंषि । मूलानि विभुजतीति मूलविभुजो रथः । कौ मोदते कुमुदं । समे तिष्ठतीति समस्थः । विषमस्थः । पर्वतस्थः ।

स्थः ॥ ९ ॥ सुपि वाचि तिष्ठतेः को भवति । आखूनामुत्थानं आखूत्थं । शलभोत्थं । अनिर्दिष्टार्थत्वात् स्वार्थे भावे भवति ।

दुहो घश्च ॥ १० ॥ दुहेः सुपि वाचि को भवति घश्चांतादेशः । कामं दोग्धीति कामदुघो धर्मः ।

*** तुंदशोके परिमृजापनुदोऽलससुखाहरे ११** तुंदशोकयोर्वाचोराभ्यां को भवत्यलससुखाहरयोः । तुंदं परिमार्ष्टि तुंदपरिमृजोऽलसः । शोकमपनुदतीति शोकापनुदः पुत्रः । तुंदपरिमार्जे आतुरः । शोकापनोदो धर्माचार्योऽन्यत्र ।

गष्टक् ॥ १२ ॥ गायतेः कर्मणि वाचि टग् भवति । वक्रं गायतीति वक्रगः । वक्रगी ।

सुरासीध्वोः पिबः ॥ १३ ॥ सुरासीध्वोर्वाचोः पिबतेष्टक् भवति । सुरापः । सुरापी । सीधुपः । सीधुपी ।

*** ओऽर्हः** ॥ १४ ॥ कर्मणि वाचि अर्हतेरस्त्यो भवति । राज्यार्हः । पूजामर्हतीति पूजार्हो जिनः । पूजार्हा प्रतिमा ।

*** धृञोऽसूत्रे** ॥ १५ ॥ असूत्रे वाचि धृञोऽस्त्यो भवति । गणधरः । शशिधरः । असूत्र इति किं ? सूत्रधारः ।

शम्यस्थो धोः खौ ॥ १६ ॥ शमि वाचि स्थावार्जिताद्धोरस्त्यो भवति खौ । शंभवः । शंकरः । शंवदः । पुनर्धुग्रहणं बाधकबाधनार्थं । तेन खुविषये हेत्वादिना परत्वादट् माभूत् । शंकरा नाम परिव्राजिका । अस्थ इति किं ? शंस्थः । खाविति किं ? शंकरी जिनविद्या ।

स्तम्बेरमकर्णेजपौ ॥ १७ ॥ एतौ हस्तिनि सूचके च निपात्येते खौ । स्तंबेरमो हस्ती । कर्णेजपः सूचकः ।

+ शक्तिलांगलांकुशर्ष्टितोमरघनुर्घटे ग्रहः १८ शक्त्यादिषु वाक्षु ग्रहेरस्त्यो भवति । शक्तिं गृह्णातीति शक्तिग्रहः । लांगलग्रहः । अंकुशग्रहः । ऋष्टिग्रहः । तोमरग्रहः । धनुर्ग्रहः । घटग्रहः । एष्विति किं ? कमंडलुग्राहः ।

+ सूत्रे धारणे ॥ १९ ॥ सूत्रे वाचि ग्रहेरस्यः स्याद्धारणेऽर्थे । सूत्रग्रहः । सूत्रग्राहोऽन्यः ।

*** हृवयोऽनुत्सेधे** ॥ २० ॥ कर्मणि वाचि हृञोऽस्त्यो भवति वयस्यनुत्सेधे च गम्यमाने । कवचहरः क्षत्रियकुमारः । अंशहरः पुत्रः । वयोऽनुत्सेध इति किं ? भारहारः ।

आङि शीले ॥ २१ ॥ कर्मणि आङि च वाचि शीले हृञोऽस्त्यो भवति । पुष्पाण्याहरत्येवं शीलः पुष्पाहरः । सुखाहरः । आङीति किं ? पुष्पाणि हर्ता ।

*** दृतिनाथे पशाविः** ॥ २२ ॥ दृतिनाथयोर्वाचोर्हृञः पशावर्थे कर्तरि इर्भवति । दृतिं चर्ममयीं खल्वां हरतीति दृतिहरिः । नाथहरिः पशुः । दृतिहारोऽन्यः ।

फलेग्रह्यात्मंभरिकुक्षिंभरिः ॥ २३ ॥ एते शब्दाः निपात्यंते । फलानि गृह्णातीति फलेग्रहिर्वृक्षः । आत्मानं बिभर्ति—आत्मंभरिः । कुक्षिंभरिः । फलस्यैत्वमात्मकुक्ष्योश्च मुम् निपात्यते ।

शकृत्स्तंबे वत्सव्रीहौ कृः ॥ २४ ॥ शकृत्स्तंबयोर्वाचोः कृञो वत्से व्रीहौ चार्थे इर्भवति । शकृत्करिः वत्सः । स्तंबकरिः व्रीहिः । शकृत्कारोऽन्यत्र ।

कियत्तद्बहुष्वः ॥ २५ ॥ किमादिषु वाक्षु कृञोऽस्त्यो भवति । किंकरः । किंकरा । यत्करः । तत्करः । बहुकरः ।

*** स्यिदिवाविभानिशाप्रभाभास्करांतानंतादिनांदीलिपिलिबिबलिभक्तबाहर्द्धनुर्जंघारुःकर्तृचित्रक्षेत्रेऽट्** ॥२६॥ स्यिसंज्ञकेषु

दिवादिषु च वाक्षु कृञोऽट् त्यो भवति। एककरः। द्विकरः। त्रिकरः। चतुष्करः। दिवाकरः। विभाकरः। निशाकरः। प्रभाकरः। भास्करः। कारकरः। अंतकरः। अनंतकरः। आदिकरः। नांदीकरः। लिपिकरः। लिबिकरः। बलिकरः। भक्तकरः। बाहुकरः। अहस्करः। धनुष्करः। जंघाकरः। अरुष्करः। कर्तृकरः। चित्रकरः। क्षेत्रकरः। टकारो ङ्यर्थः।

हेतुशीलानुलोम्येऽशब्दश्लोककलहगाथावैरचाटुसूत्रमंत्रपदे ॥ २७ ॥ शब्दादिवर्जिते कर्मणि वाचि कृञोऽट् स्यात् हेतौ शीले आनुलोम्ये चार्थे। यशः करोतीत्येवं हेतुः यशस्करी विद्या। कुलकरं धनं। तीर्थकरो जिनः। शोककरी कन्या। श्राद्धं करोतीत्येवं शीलः श्राद्धकरः। समासकरः। पूजाकरः। प्रेषणं करोतीत्येवमनुकूलः प्रेषणकरः। वचनकरः। हेत्वादिष्विति किं? कांडकारः। अशब्दादीति किं? शब्दकारः। श्लोककारः। कलहकारः। गाथाकारः। वैरकार। चाटुकारः। सूत्रकारः। मंत्रकारः। पदकारः।

कर्मणि भृतौ ॥ २८ ॥ कर्मशब्दे वाचि कृञोऽट् त्यो भवति भृतौ गम्यमानायां। कर्मकरः। कर्मकरी। भृताविति किं? कर्मकारः।

+ पार्श्वादिषु श्योऽः ॥ २९ ॥ पार्श्वादिषु सुबंतेषु वाक्षु शीङोऽत्यो भवति। पार्श्वाभ्यां शेते पार्श्वशयः। पृष्ठशयः। उत्तानः शेते—उत्तानशयः।

*** आधारे ॥ ३० ॥** आधारे वाचि अत्यो भवति शीङः। खे शेते खेशयः। खशयः। गर्तशयः। दरीशयः।

*** चरोऽट् ॥ ३१ ॥** आधारे वाचि चरेरट् भवति। कुरुषु चरतीति कुरुचरः। कुरुचरी। मद्रचरः। मद्रचरी।

भिक्षासेनादाये ॥ ३२ ॥ भिक्षादिषु वाक्षु चरेरट् भवति। भिक्षां चरतीति भिक्षाचरः। भिक्षाचरी। सेनाचरः। आदायचरः।

पुरोऽग्रतोऽग्रे सुः ॥ ३३ ॥ एषु वाक्षु सरतेरट् स्यात्। पुरो धावतीति पुरःसरः। अग्रतःसरः। अग्रेसरः। अग्रेसरी।

पूर्वे कर्तरि ॥ ३४ ॥ पूर्वशब्दे कर्तृवाचिनि वाचि सरतेरट् स्यात्। पूर्वः सरति धावति इति वा पूर्वसरः। पूर्वसरी। कर्तरीति किं? पूर्वं देशं सरतीति पूर्वसारः।

एजेः खश् ॥ ३५ ॥ कर्मणि वाच्येजेः खश् भवति। अंगान्येजयतीति—अंगमेजयः। जनमेजयः। अरिमेजयः।

+ शर्द्धललाटवाते हाक्तपाजः ॥ ३६ ॥ शर्धादौ वाचि यथासंख्यं हाकादेः खश् वा स्यात्। शर्धं जहतीति शर्द्धंजहाः मृगाः। ललाटंतपः सविता। वातमजाः मृगाः।

+ शुनीस्तने धेटः ॥ ३७ ॥ शुनीस्तनयोर्वाचोःधेटः खश् भवति। शुनीं धयतीति शुनिंधयः। स्तनंधयः।

+ नाडीनासिकामुष्टिघटीखरीवाते ध्मश्च ॥ ३८ ॥ एषु वाक्षु ध्मो धेटश्च खश् स्यात्। नाडीं धमतीति नाडिंधमः। नाडिंधयः। नासिकंधमः। नासिकंधयः। मुष्टिंधमः। मुष्टिंधयः। घटिंधमः। घटिंधयः। खरिंधमः। खरिंधयः। वातंधमः। वातंधयः।

+ पाणौ ॥ ३९ ॥ पाणौ वाचि ध्मः खश् स्यात्। पाणिंधमाः पथिकाः।

उदि कूले रुज्वहः ॥ ४० ॥ उत्पूर्वाभ्यां रुजिवहिभ्यां कूले वाचि खश् स्यात्। कूलमुद्रुजतीति कूलमुद्रुजः वृक्षः। कूलमुद्वहः।

वहाभ्रे लिहः ॥ ४१ ॥ वहाभ्रयोर्वाचोः लिहेः खश् स्यात्। वहं लेढीति वहंलिहा गौः। अभ्रंलिहः प्रासादः।

मितनखपरिमाणे पचः ॥ ४२ ॥ मितादिषु वाक्षु पचेः खश् स्यात्। मितंपचा कन्या। नखंपचा यवागूः। प्रस्थंपचं कुलं। द्रोणंपचा स्थाली।

प्रियवशे वदः ॥ ४३ ॥ प्रियवशयोर्वाचोः वदेः खश् स्यात्। प्रियंवदः। वशंवदः।

*** कूलाभ्रकरीषे कषः ॥ ४४ ॥** कूलादिषु वाक्षु कषेः खश् भवति । कूलं कषयतीति कूलंकषा नदी । अभ्रंकषो वायुः । करीषंकषा वात्या ।

*** सर्वे ॥ ४५ ॥** सर्वशब्दे वाचि कषेः खश् स्यात् । सर्वंकषो विप्रः ।

*** सहेः ॥ ४६ ॥** सर्वे वाचि सहेः खश् स्यात् । सर्वं सहते सर्वंसहाः सूरयः ।

*** विध्वरुस्तिले तुदः सखं ॥ ४७ ॥** एषु वाक्षु तुदेः खश् स्यात् वाचः सकारस्य च खं । विधुंतुदो राहुः । अरुंतुदो वैद्यः । तिलंतुदो वायुः ।

*** द्विषत्परे तापेः खच् तः ॥ ४८ ॥** द्विषति तकारांते परे च वाचि तापेः खच् भवति वाचस्तकारस्य च खं । द्विषतस्तापयतीति द्विषंतपः । परंतपः ।

*** वाचंयमो व्रती ॥ ४९ ॥** वाक्पूर्वाद् यमेः खच् अमश्चानुप निपात्यो व्रतिनि गम्यमाने । वाचं यच्छतीति वाचंयमो व्रती । वाग्यामोऽन्यः ।

भृतॄवृजिधारिदम्तप्सहः खौ ॥ ५० ॥ एभ्यः कर्मणि सुपि च वाचि खच् स्यात् खौ । विश्वंभरा भूः । रथेन तरतीति रथंतरो राजा । पतिं वृणोति वृणुते वा पतिंवरा कन्या । शत्रुंजयो गिरिः । युगं धारयतीति युगंधरो राजा । अरिं दाम्यति अरिंदमः । शत्रुंतपः । शत्रुंसहः । खाविति किं ? भूमिभारः ।

*** मेघर्त्तौ कृः ॥ ५१ ॥** मेघर्त्योर्वाचोः कृञः खच् स्यात् । मेघंकरः । ऋतिंकरः ।

*** भये ॥ ५२ ॥** भये वाचि कृञः खच् स्यात् । भयंकरः ।

क्षेमप्रियमद्रेऽण् च ॥ ५३ ॥ क्षेमादौ वाचि कृञः खच् स्यादण् च । क्षेमंकरः । क्षेमकारः । प्रियंकरः । प्रियकारः । मद्रंकरः । मद्रकारः ।

*** पुरंदरभगंदरेम्मदासूर्यपश्योग्रंपश्याः ॥ ५४ ॥** पुरंदरादयः शब्दाः खजंताः खशंताश्च निपात्यंते । पुरं दारयतीति पुरंदरः । पूःशब्दे वाचि दारेः खजमतता च वाचो निपात्या । भगंदरो व्याधिः । खच् । इरया माद्यति–इरंमदः । इराशब्दे वाचि मदेः खच् । न सूर्यं पश्यंतीति असूर्यंपश्याः राजदाराः । उग्रंपश्यः । सूर्ये नञ्पूर्वे उग्रे च वाचि दृशेः खश् ।

*** सुभगाढ्यस्थूलपलितनग्नांधप्रियेऽच्वौ च्वौ भ्वः स्नुखखुकञ् ॥ ५५ ॥** सुभगादिषु अच्व्यंतेषु च्व्यर्थे वर्तमानेषु वाक्षु भुवोः स्नुखखुकञौ स्तः । असुभगः सुभगो भवति सुभगंभविष्णुः । सुभगंभावुकः । आढ्यंभविष्णुः । आढ्यंभावुकः । स्थूलंभविष्णुः । स्थूलंभावुकः । पलितंभविष्णुः । पलितंभावुकः । नग्नंभविष्णुः । नग्नंभावुकः । अंधंभविष्णुः । अंधंभावुकः । प्रियंभविष्णुः । प्रियंभावुकः । अच्वाविति किं ? सुभगीभविता । सुभगीभावकः ।

*** कृः करणे खनट् ॥ ५६ ॥** सुभगादिषु अच्व्यंतेषु च्व्यर्थे वर्तमानेषु वाक्षु कृञः खनट् स्यात् करणे कारके । असुभगं सुभगं कुर्वत्यनेन सुभगंकरणं । आढ्यंकरणं । स्थूलंकरणं । पलितंकरणं । नग्नंकरणं । अंधंकरणं । प्रियकरणं ।

*** भावे चाशितंभवः ॥ ५७ ॥** आशितंभवो निपात्यते भावे करणे च । आशितस्य भवनं आशितंभवः । आशितो भवत्यनेनेति आशितंभव ओदनः । आशिते वाचि भुवः खच् ।

+ गमेः खचखड्डाः ॥ ५८ ॥ सुपि वाचि गमेः खच् खड् डश्च स्यात् । तुरां गच्छति तुरंगमः । तुरंगः । तुरगः । पतंगः । पतगः । पारगः । अध्वगः । अंतगः । दूरगः । सर्वगः । गुरुतल्पगः । अनंतगः ।

+ विहायो विह च ॥ ५९ ॥ विहायसो विहादेशः स्यात् गमेः खच् खड्डाश्च स्युः । विहायसा गच्छतीति विहंगमः । विहगः ।

+ सुदुस्याधारे डः ॥ ६० ॥ सुदुसोर्वाचोर्गमेर्डो भवति आधारे कारके । सुखेन गम्यतेऽस्मिन् इति सुगः पंथाः । दुर्गो गिरिः ।

+ निसि देशे ॥ ६१ ॥ निसि वाचि गमेर्डो भवति देशे गम्यमाने । निर्गम्यतेऽस्मिन्निति निर्गो देशः ।

+ उरगः ॥ ६२ ॥ उरसा गच्छति–उरगः । इसखे निपात्यते ।

आशिषि घ्नः ॥ ६३ ॥ आशिष्यर्थे हंतेर्डो भवति । तिमिं हंतु इत्याशंसितः तिमिहः । शत्रुहः । पापहः ।

*** क्वचिदपे ॥ ६४ ॥** अपे वाचि हंतेः क्वचिड्डो भवति । क्लेशापहः । तमोपहः ।

कुमारशीर्षे णिन् ॥ ६५ ॥ एतयोर्वाचोः हंतेर्णिन् स्यात् । कुमारं हंति कुमारघाती । शीर्षघाती ।

*** टगमर्त्ये ॥ ६६ ॥** कर्मणि वाचि हंतेष्टग् भवत्यमर्त्ये कर्तरि । वातघ्नमाविकं क्षीरं पित्तघ्नं माहिषं पयः । पतिघ्नी पाणिरेखा । अमर्त्य इति किं ? पापघातो मुनिः ।

जायापत्योर्लक्षणे ॥ ६७ ॥ जाया पति इत्येतयोर्वाचोः हंतेष्टक् स्यात् लक्षणवति कर्तरि । जायाघ्नः पुत्रः । पतिघ्नी पुत्री ।

शक्ति हस्तिकवाटे॥६८॥ अनयोर्वाचोः शक्यर्थे हंतेष्टक् स्यात् । हस्तिघ्नः । कवाटघ्नः । शक्तीति किं ? हस्तिघातो व्याध उपायेन ।

***राजघः ॥ ६९ ॥** राजनि वाचि हंतेष्टग् घत्वं टिखं च निपात्यते । राजानं हंतीति राजघः ।

स्पृशोऽनुदके क्विः ॥ ७० ॥ अनुदके सुपि वाचि स्पृशेः क्विर्भवति । घृतं स्पृशतीति घृतस्पृक् । तैलस्पृक् । अनुदक इति किं? उदकस्पर्शः ।

ऋत्विग्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंचः ॥ ७१ ॥ ऋत्विगादयः क्यंता निपात्यंते । अंचादेश्च क्विप् भवति । ऋतून् ऋतौ वा यजते ऋत्विक् । धृष्णोतीति दधृक् । धृषेर्द्वित्वं । सृजंति तामिति स्रक् । सृजेर्मालार्थे क्विरमागमश्च । दिशंति तामिति दिग् । उत्स्निह्यति-उष्णिक् । उत्पूर्वस्य स्निहेः क्विग्यंतखं षत्वं च । प्राङ् । युङ् । क्रुङ् ।

*** कर्मणीवे त्यदाद्यन्यसमाने दृशष्टक् सक् च ॥ ७२ ॥** त्यदादौ अन्यशब्दे समाने च कर्मणि इवार्थे उपमाने वाचि दृशेष्टक् सक् क्विश्च स्यात् । त्यामिव पश्यति स इव दृश्यते वा त्यादृशः । त्यादृक्षः । त्यादृक् । तादृशः । तादृक्षः । तादृक् । तादृशी । यादृशः । यादृक्षः । यादृक् । अन्यादृशः । अन्यादृक्षः । अन्यादृक् । सदृशः । सदृक्षः । सदृक् । सदृक्षी । कर्मणीति किं ? स इव पश्यति । इव इति किं ? यं पश्यति यद्दर्शः । तद्दर्शः ।

मन्वन्क्वनिब्विचः क्वचित् ॥ ७३ ॥ सुपि वाचि धोर्मन् वन् क्वनिप् विच् च त्याः क्वचिद् दृश्यंते । सुष्ठु शृणाति सुशर्मा । हिनोति हेमा । विजावा । अग्रेगावा । प्रातरित्वा । कृत्वा । वेट् । जागः ।

क्विप् ॥ ७४ ॥ धोः क्विप् क्वचिद् दृश्यते । अंतरिक्षे सीदति—अंतरिक्षसत् । प्रसत् । शतसूः । प्रसूः । अंडसूः । वित् । चित् । जित् । तत्त्ववित् । कर्मचित् । विद्विट् । गोधुक् । अश्वयुक् । बलभित् । रज्जुछित् । अग्रणीः । सम्राट् । भासनशीलो भाः ।

अदोऽनन्ने ॥ ७५ ॥ अन्नवर्जिते सुपि वाचि अदेः क्विप् भवति । सस्यमत्तीति सस्यात् । वृक्षात् । अनन्न इति किं ? अन्नादः ।

क्रव्ये ॥ ७६ ॥ क्रव्ये आममांसे वाचि अदेः क्विप् स्यात् । क्रव्यात् ।

भजो ण्विः ॥ ७७ ॥ सुपि वाचि भजेर्ण्विर्भवति । अर्धभाक् । अंशभाक् । स्वर्गभाग् । मोक्षभाग् ।

*** शीलेऽजातौ णिन् ॥ ७८ ॥** जातिवर्जिते सुपि वाचि धोर्णिन् भवति शीले गम्यमाने । उष्णं भुंक्ते इत्येवं शील उष्णभोजी । शीतभोजी । शील इति किं ? उष्णभोजः । अजाताविति किं ? शालीन् भोक्ता ।

साधौ ॥ ७९ ॥ साध्वर्थे धोर्णिन् भवति । साधुकारी । साधुदायी । मित्रदायी । भोजनकारी ।

+ ब्रह्मवादी ॥ ८० ॥ ब्रह्मणि वाचि वदेर्णिन् निपात्यते । ब्रह्म वदंतीति ब्रह्मवादिनः ।

कर्तरीवे ॥ ८१ ॥ कर्तृवाचिनि इवार्थे वाचि धोर्णिन् स्यात् । उष्ट्र इव क्रोशतीति उष्ट्रक्रोशी । ध्वांक्षरावी । सिंहनादी । कर्तरीति किं ? शालीनिव भुंक्ते कोद्रवान् । इव इति किं ? उष्ट्रान् क्रोशति ।

*व्रताभीक्ष्ण्ये ॥ ८२ ॥ सुपि वाचि धोर्णिन् स्यात् व्रते आभीक्ष्ण्ये च गम्यमाने । पार्श्वेन शेते इत्येवं व्रतमस्य पार्श्वशायी । श्मशानवासी । आतपस्थायी । पुनः पुनः क्षीरं पिबंतीति क्षीरपायिणोऽम्राः । कषायपायिणो गांधारयः । सुरापायिणः प्राच्याः ।

*मन्यात् ॥ ८३ ॥ सुपि वाचि धोर्मन्यतेर्णिन् भवति । शोभनमानी । पटुमानी ।

*खश् स्वस्य ॥ ८४ ॥ स्वस्यात्मनः सुपि वाचि मन्यतेः खश् स्यात् णिन् च । पंडितमात्मानं मन्यते पंडितंमन्यः । पंडितमानी । सर्वज्ञंमन्यः । सर्वज्ञमानी ।

*व्यभौ भ्वो भूते ॥ ८५ ॥ व्यभ्योर्वाचोर्भवतेर्णिन् स्यात् भूतेऽतीतेऽर्थे वर्तमानात् । विभूतमान् विभावी । अभिभावी । भूत इति किं ? विभवति ।

करणे यजः ॥ ८६ ॥ करणे कारके वाचि यजेर्णिन् भवति भूतेऽर्थे । अग्निष्टोमेन इष्टवान्—अग्निष्टोमयाजी । वाजपेययाजी । राजसूययाजी ।

*कर्मणि घ्नः कुत्स्यः ॥ ८७ ॥ कर्मणि वाचि हंतेर्भूतेऽर्थे णिन् स्यात् कुत्स्यश्चेत् कर्ता । पितरं हतवान् पितृघाती । मातृघाती । पितृव्यघाती । मातुलघाती । कुत्स्य इति किं ? चौरं हतवान् ।

*इन् विक्रयः ॥ ८८ ॥ कर्मणि वाचि विक्रीञः इन् स्यात् भूतेऽर्थे कुत्स्यश्चेत् कर्ता । तैलं विक्रीतवान् तैलविक्रयी । सोमविक्रयी । कुत्स्य इति किं ? धान्यविक्रायः ।

*ब्रह्मभ्रूणवृत्रे क्विप् घ्नः ॥ ८९ ॥ ब्रह्मादिषु वाक्षु हंतेः क्विप् स्यात् भूते । ब्रह्माणं हतवान् ब्रह्महा । भ्रूणहा । वृत्रहा । नियमोयं । ब्रह्मादिषु भूते क्विबेव नान्यः । ब्रह्मादिषु एव हंतेः क्विबिति द्विधा नियमः । मित्रं हतवान् ।

सुकर्मपापमंत्रपुण्ये कृः ॥ ९० ॥ एषु वाक्षु कृञः क्विप् भवति भूते काले । सुष्ठु कृतवान् सुकृत् । कर्मकृत् । पापकृत् । मंत्रकृत् । पुण्यकृत् । अयमपि नियमः—स्वादिष्वेव कृञः क्विप् नान्यस्मिन् । सूत्रकारः ।

सोमे सोः ॥ ९१ ॥ सोमे वाचि सुञः क्विप् स्यात् । सोमं सुतवान् सोमसुत् । सोमसुतौ । सोमसुतः । अयमपि नियमः—सोमे एव सुञः क्विप् नान्यस्मिन् । सुरासावः ।

अग्नौ चेः ॥ ९२ ॥ अग्नौ वाचि चिञः क्विप् भवति । अग्निं चितवान् अग्निचित् । अग्निचितौ । अग्निचितः । अयमपि नियमः—अग्नावेव चिञः क्विप् नान्यत्र । कुड्यचायः ।

*कर्मण्यगन्यर्थे ॥ ९३ ॥ कर्मणि वाचि चिनोतेर्धोः भूते कर्मणि कारके क्विप् भवत्यग्न्यर्थेऽभिधेये । श्येन इव चितः श्येनचित् । कंकचित् । रथचक्रचित् ।

दृशेः क्वनिप् ॥ ९४ ॥ कर्मणि वाचि दृशेः क्वनिप् स्यात् भूते काले । विश्वं दृष्टवान् विश्वदृश्वा । मेरुदृश्वा । सर्वदृश्वा ।

*राजसहे युधिकृञोः ॥ ९५ ॥ राज्ञि सहे च वाचि युधिकृञ्भ्यां क्वनिप् स्यात् । राजानं योधितवान्—राजयुध्वा । राजकृत्वा । सह युद्धवान्—सहयुध्वा । सहकृत्वा ।

+जनोऽनौ डः ॥ ९६ ॥ अनौ वाचि जनेर्डो भवति । पुमांसमनुजाता पुमनुजा स्त्री । स्त्र्यनुजः । अनुजः ।

+ईपि ॥ ९७ ॥ ईबंते वाचि जनेर्डः स्यात् । मंदुरायां जातः मंदुरजः । अप्सुजः । वलभीजः । जलजं । अंगजः ।

+कायामजातौ ॥ ९८ ॥ कांते जातिवर्जिते वाचि जनेर्डः स्यात् । जाड्याज्जातं जाड्यजं दुःखं । संतोषजं सुखं । संकल्पजः कामः । अजाताविति किं ? अश्वाज्जातः ।

+क्वचित् ॥ ९९ ॥ क्वचिदन्यस्मिन् वाचि जनेर्डो भवति । द्विर्जातः—द्विजः । स्त्रीभ्यो जातं स्त्रीजमनृतं । क्षत्रियजं युद्धं । ब्राह्मणजः पशुवधः । अजः । प्रजाः । मुंडजाः । केशजाः । क्वचिन्न स्यात्—गृहस्थो जातः । क्वचिदन्यतः—भातीति भं । अततीति अः । कायतीति कः । खन्यते इति खं । अवतीति अः ।

तः ॥१००॥ धोर्भूते तसंज्ञकस्त्यो भवति। क्रियते स्म कृतः। करोति स्म कृतवान्।

यजसोर्ङ्वनिप् ॥ १०१ ॥ यजुसुभ्यां ङ्वनिप् स्यात्। इष्टवान्। यज्वा। यज्वानौ। यज्वानः। सुत्वा। सुत्वानौ। सुत्वानः।

जृषोऽतृ ॥ १०२ ॥ जृष अतृ इत्ययं त्यो भवति। जीर्णवान्। जरन्। जरंतौ। जरंतः।

*** लिटः क्वसुकानौ** ॥ १०३ ॥ धोः परस्य लिटः स्थाने क्वसुकानौ स्तः। पेचिवान्। ररज्वान्। पेचानः। ररजानः।

*** वस्सदिणश्रोः क्वसुः** ॥ १०४ ॥ एभ्यो लिटः क्वसुः स्यात्। अनूषिवान्। उपसेदिवान्। उपेयिवान्। शुश्रुवान्।

*** अनाश्वान्** ॥ १०५ ॥ नञ्पूर्वात् अश्नातेर्लिटः क्वसुः स्यादिडभावश्च निपात्यः। अनाश्वान् तपश्चकार।

*** कर्तर्यनूचानः** ॥ १०६ ॥ वचेरनुपूर्वात् कर्तरि कारके कानो निपात्यः। अनूचानो व्रतोपपन्नोऽशेषशास्त्रपारगो वा। कर्तरीति किं? अनूक्तं।

लुङ् ॥ १०७ ॥ धोर्भूते काले लुङ् स्यात्। अहौषीत्। अकार्षीत्। अपाक्षीत्।

*** वसो निश्यंत्ययामास्वापे** ॥१०८॥ निशि वसेर्लुङ् स्यात् लङोपवादः भूते अंत्ययामास्वापे गम्यमाने क्व भवानुषित[1]ः। अहमत्राऽवात्सं। अंत्ययामास्वाप इति किं? अमुत्रावसं।

अनद्यतने[2] लङ् ॥ १०९ ॥ अनद्यतने भूते धोर्लङ् भवति। अभवत्। अपठत्। अरात्। अपुनात्।

+ ख्याते दृश्ये ॥ ११० ॥ ख्याते लोकविज्ञाते भूतेऽनद्यतने दृश्ये प्रयोक्तुः दृष्टिविषये वर्तमानाद्धोर्लङ् भवति। लिङपवादः। अदहत् यवनः साकेतं। ख्यात इति किं? जगाम ग्रामं। दृश्य इति किं? जघान कंसं किल वासुदेवः।

*** स्मर्थेऽयदि लृट्** ॥ १११ ॥ स्मृतिवचने यच्छब्दवर्जिते वाचि भूतेऽनद्यतने वर्तमानाधोर्लृट् स्यात्। लङोऽपवादः। अभिजानासि मित्रोजयंते नेमिस्वामिनं वंदिष्यामहे। स्मरसि मान्यखेटे वत्स्यामः। अयदीति किं? अभिजानासि पुत्र यत् क्षुल्लकपुरे अवसाम।

*** वा साकांक्षे** ॥ ११२ ॥ साकांक्षेऽर्थे भूते स्मर्थे वाचि लृट् स्यात् वा। स्मरसि देवदत्त कास्मीरेषु वत्स्यामः तत्रौदनान् भोक्ष्यामहे। कास्मीरेष्ववसाम। तत्रौदनान् अभुंज्महि।

परोक्षे लिट् ॥ ११३ ॥ भूतानद्यतने परोक्षे वर्तमानाद्धोर्लिट् स्यात्। चकार। सुप्तोऽहं किल विललाप। मत्तोऽहं किल विचचार।

+ निह्नवेऽत्यंते ॥ ११४ ॥ अत्यंतनिह्नवे भूते अनद्यतनेऽर्थे धोर्लिट् स्यात्। किं त्वं गत्वा कलिंगेषु स्थितोऽसि। किं कलिंगान् जगाम। नाहं कलिंगान् जगाम। नाहं कलिंगान् ददर्श। सर्वं मूलतोऽपलपतीत्यर्थः।

*** हशश्वद्युगांतःप्रश्ने लङ् च** ॥ ११५ ॥ हशश्वतोर्वाचोर्युगांतःप्रश्ने च पंचवर्षाभ्यंतरे प्रष्टव्ये परोक्षे लङ् स्यात् लिट् च। इति हाकरोत्। इति ह चकार। शश्वदकरोत्। शश्वच्चकार। किमदात् पुत्रोऽतिथिभ्यो दानं। किं ददौ पुत्रोऽतिथिभ्यो दानं। हशश्वद्युगांतःप्रश्ने इति किं? जघान किलाश्वग्रीवं त्रिपृष्टः।

पुरि लुङ् वा ॥ ११६ ॥ पुराशब्दे वाचि भूतेऽनद्यतनेऽर्थे वर्तमानाद्धोर्लुङ् वा भवति। अवात्सुरिह पुरा छात्राः। अवसन्निह पुरा छात्राः। ऊषुरिह पुरा छात्राः।

१। निशोऽतीतायाः पश्चिमयामे कोऽप्युषितः तं याममशेषमसुप्तः, केन चित् क्व भवानुषितः इति पृष्टः प्रत्याचष्टे तस्मिन्नेव यामेऽहनि चामुत्रावात्समिति ततोप्यतीतेऽनद्यतने समाधेरिति लङ् प्राप्तः। तद्याममुहूर्त्तमपि स्वापे लङेव—अमुत्रावसमित्यपि।

२। अन्याय्यादुत्थानादन्याय्यात् संवेशनादेषोऽद्यतनकालः अहरुभयतोऽर्द्धरात्रं वा। न विद्यतेऽद्यतनो यस्मिन् तस्मिन् भूतानद्यतनेऽपि भूतमात्राभिविवक्षायां लङ्।

लट् ॥ ११७ ॥ पुराशब्दे वाचि भूतेऽनद्यतनेऽर्थे वर्तमानाद्धोर्लट् भवति । वसंतीह पुरा छात्राः ।

स्मे ॥ ११८ ॥ स्मे वाचि भूतानद्यतनेऽर्थे धोर्लट् स्यात् । पृच्छति स्म सुप्रभार्थं पुरा युध्यंते स्म विद्याधराः । सुलोचनार्थं युध्यंते स्म पार्थिवाः ।

+ **ननौ पृष्टोक्तौ** ॥ ११९ ॥ पृष्टस्योक्तौ प्रतिवचने भूतेऽर्थे वर्तमानाद्धोर्ननौ वाचि लट् स्यात् । किमकार्षीः कटं देवदत्त ? । ननु करोमि भोः । किमवोचः किंचित्पुत्र ? । ननु ब्रवीमि ।

सति ॥ १२० ॥ सति संप्रतिकाले धोर्लट् भवति । भवति । नयति । तरति । पद्मप्रभनाथं स्तौमि ।

पूङ्यजोः शानः ॥ १२१ ॥ पूङ्यज्भ्यां धोः शानो भवति । पवमानः । यजमानः ।

वयःशक्तिशीले ॥ १२२ ॥ एष्वर्थेषु धोः शानः स्यात् सति काले । कति कवचं पर्यस्यमानाः । कति कंडूं निघ्नानाः । कतीह पचमानाः । कतीह समश्नानाः । कतीह मंडयमानाः । कतीह जानानाः ।

धारीङः शत्रकृच्छ्रे ॥ १२३ ॥ सति काले धारीङ्भ्यां शतृ इत्ययं त्यो भवत्यकृच्छ्रे सुखसाध्ये । धारयन् धर्मशास्त्रं । अधीयन् जैनेंद्रं । अकृच्छ्र इति किं ? कृच्छ्रेण धारयति । कृच्छ्रेणाधीते ।

***सुञ्द्विषर्हः सत्र्यारिशस्ये** ॥ १२४ ॥ एभ्यः सत्र्यादिष्वर्थेषु शतृ इति त्यः स्यात् । सर्वे सुन्वंतः सत्रिणः यजमानाः । द्विषन् शत्रुः । अर्हन् विद्यां । सुरां सुन्वंति । द्वेष्टि भार्या पतिं । चैरो बधमर्हत्यन्यत्र ।

***शीलधर्मसाधौ तृन्** ॥ १२५ ॥ एष्वर्थेषु धोस्तृन् भवति सति काले । करणशीलः कर्ता कटान् । वदिता जनापवादान् । मुंडनधर्माणः— वधूमूढां मुंडयितारः श्राविष्ठायना भवंति । श्राद्धे सिद्धमन्नमपहर्त्तारः आह्वरकाः भवंति । साधु गच्छतीति गंता खेलः । सलीलगंतेत्यर्थः ।

*** भूभ्राज्यलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृद्वृधसहचर इष्णुः** ॥ १२६ ॥ सति काले भ्वादिभ्यः इष्णुर्भवति शीलाद्यर्थे । भवनशीलः भवनधर्मा साधु वा भवतीति भविष्णुः । एवं—भ्राजिष्णुः । अलंकरिष्णुः । निराकरिष्णुः । प्रजनिष्णुः । उत्पचिष्णुः । उत्पतिष्णुः । उन्मदिष्णुः । रोचिष्णुः । अपत्रपिष्णुः । वर्त्तिष्णुः । वर्धिष्णुः । सहिष्णुः । चरिष्णुः ।

ग्लाभूजिस्थो ग्स्नुः ॥ १२७ ॥ एभ्यः शीलादौ सति काले ग्स्नुर्भवति । ग्लास्नुः । भूष्णुः । जिष्णुः । स्थास्नुः ।

त्रसगृधधृषक्षिपः क्नुः ॥ १२८ ॥ त्रसादेः क्नुत्यः स्यात् । त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः ।

***शंभ्यो घिनिण्** ॥ १२९ ॥ शमादिभ्योऽष्टभ्यः शीलादौ सत्यर्थे घिनिण् स्यात् । शमी । दमी । तमी । श्रमी । भ्रमी । क्षमी । क्लमी । प्रमादी ।

दुहानुरुधदुषाद्विषद्रुहयुजत्यजरजभजाभ्याघ्नः ॥ १३० ॥ एभ्यो घिनिण् स्यात् शीलादौ । दोही । अनुरोधी । दोषी । द्वेषी । द्रोही । योगी । त्यागी । रागी । भागी । अभ्याघाती ।

आङि यम्यस्क्रीड्मुषः ॥ १३१ ॥ यमादेराङ्पूर्वाद् घिनिण् स्यात् शीलादौ सत्यर्थे । आयामी । आयासी । आक्रीडी । अमोषी ।

वौ कष्विचलस्कत्थस्रंभः ॥ १३२ ॥ वौ वाचि कषादेः घिनिण् भवति । विकाषी । विवेकी । विलासी । विकत्थी । विस्रंभी ।

***लषोऽपे च** ॥ १३३ ॥ अपे वौ च वाचि शीलादौ सत्यर्थे लषेर्घिनिण् स्यात् । अपलाषी । विलासी ।

***चरोऽतौ च** ॥ १३४ ॥ अतौ अपे च वाचि चरेर्घिनिण् स्यात् । अतिचारी । अपचारी ।

***प्रे लप्वसद्रुमथः** ॥ १३५ ॥ प्रे वाचि लपादेर्घिनिण् स्यात् । प्रलापी । प्रवासी । प्रद्रावी । प्रमाथी ।

***वत्सुः** ॥ १३६ ॥ प्रे वाचि वदिसृभ्यां घिनिण् भवति । प्रवादी । प्रसारी ।

***परौ दहमुहश्च** ॥ १३७ ॥ परौ वाचि दहिमुहिभ्यां वत्सृभ्यां च घिनिण् भवति । परिदाही । परिमोही । परिवादी । परिसारी ।

*** देवुर्णेश्च ॥ १३८ ॥** परौ वाचि देवृकः केवलाण्ण्यंताच्च घिनिण् स्यात्। परिदेवते परिदेवयतीति च परिदेवी।

*** क्षिप्रटः ॥ १३९ ॥** परौ वाचि क्षिपिरड्भ्यां घिनिण् भवति। परिक्षेपी। परिराटी।

*** वादेश्च वुञ् ॥ १४० ॥** परौ वाचि वादेः क्षिप्रड्भ्यां च शीलादौ सत्यर्थे वुञ् भवति। परिवादकः। परिक्षेपकः। परिराटकः।

निंदहिंसक्लिशखादविनाशिव्याभाषाऽसूयात् ॥ १४१ ॥ निंदादिभ्यो वुञ् भवति शीलादौ। निंदकः। हिंसकः। क्लेशकः। खादकः। विनाशकः। व्याभाषकः। असूयकः।

देविक्रुशो गौ ॥ १४२ ॥ गौ वाचि देविक्रुशिभ्यां वुञ् भवति। आदेवकः। परिदेवकः। उपदेवकः। उपक्रोशकः। आक्रोशकः। परिक्रोशकः

*** रुचलार्थाद्धेरनः ॥ १४३ ॥** रौत्यर्थेभ्यः चल्यर्थेभ्यो धिभ्यः अन इत्ययं त्यो भवति। रवणः। कथनः। शब्दनः। चलनः। कंपनः। चोपनः। घेरिति किं? पठिता शास्त्रं। कंपयिता शाखां।

***हलाद्यंताङ्ङेदितोऽय्सूददीप्दीक्षणिङः१४४** ङेदितोर्हलादेर्हलंताद्धेर्धोः शीलादौ सत्यर्थे अनः स्यात् यकारांतादिवर्जितात्। वर्त्तनः। वर्द्धनः। द्योतनः स्पर्द्धनः। हलाद्यंतादिति किं? एधिता। धर्ता। अय्सूदादेरिति किं? क्नूयिता। क्ष्मायिता। सूदिता। दीपिता। दीक्षिता। उत्पुच्छयिता। परिचीवरयिता।

*** सृजुज्वलल्षपत्पद्गृच्छुचः ॥ १४५ ॥** एभ्योऽनः स्यात् शीलादौ सत्यर्थे। सरणः। जवनः। ज्वलनः। लषणः। पतनः। पदनः। गर्धनः। शोचनः।

क्रुधमंडार्थात् ॥ १४६ ॥ क्रुध्यर्थात् मंडार्थाच्चानः स्यात्। क्रोधनः। कोपनः। रोषणः। मंडनः। भूषणः।

क्रमूद्रमो यङः ॥ १४७ ॥ आभ्यां यङंताभ्यामनो भवति शीलादौ सत्यर्थे। चंक्रमणः। दंद्रमणः।

यज्जजप्वद्दशाद्वूकः ॥ १४८ ॥ एभ्यो यङंतेभ्य ऊको भवति। यायजूकः। जंजपूकः। वावदूकः। दंदशूकः।

जागुः ॥ १४९ ॥ जागर्तेरूकः स्यात् शीलादौ सत्यर्थे। जागरूकः।

लष्पत्पद्स्थाभूवृष्हकमृगमूष्नः उकञ् ॥ १५० ॥ एभ्य शीलादौ सत्यर्थे उकञ् स्यात्। अपलाषुको नीचः। प्रपातुका गर्भाः। उपपादुकाः देवाः। उपस्थायुकाः। प्रभावुकः। वर्षुकः पर्जन्यः। प्रशारुकः। कामुका धन्यस्य स्त्रियो भवंति। आगामुकः स्वगृहं। आघातुको जीवान् नरकं याति।

*** जल्पभिक्षवृङ्कुट्टलुंटाट्टाकः ॥ १५१ ॥** एभ्यष्टाको भवति। जल्पाकः। जल्पाकी। भिक्षाकः। वराकः। कुट्टाकः। लुंटाकः।

प्रे सृजोरिन् ॥ १५२ ॥ प्रे वाचि सृजुभ्यां इन् स्यात्। प्रसवी। प्रजवी।

परिभूजिदृक्षिविश्रीण्वमाव्यथाभ्यमः ॥ ॥ १५३ ॥ एभ्यः इन् भवति शीलादौ सत्यर्थे। परिभवी। जयी। आदरी। क्षयी। विश्रयी। उदयी। वमी। अव्यथी। अभ्यमी।

*** निद्रातंद्राश्रद्धाशीङ्दय्स्पृहिगृहिपतेरालुः ॥ १५४ ॥** निद्रादेरालुर्भवति। निद्रालुः। तंद्रालुः। श्रद्धालुः। शयालुः। दयालुः। स्पृहयालुः। गृहयालुः। पतयालुः।

*** शद्सद्दाधेङ्सेरुः ॥ १५५ ॥** एभ्यो रुर्भवति। शद्रुः। सद्रुः। दारुः। धारुः। सेरुः।

*** घस्यत्सुः क्मरः ॥ १५६ ॥** घस्यादेःक्मरः स्यात् शीलादौ सत्यर्थे। घस्मरः। अद्मरः। सृमरः।

*** भास्मिद्भंजो घुरः ॥ १५७ ॥** एभ्यो घुरो भवति। भासुरं वपुः। मेदुरं मुखं। भंगुरं काष्ठं।

*** वेत्तिछिद्भिदेः कित् ॥ १५८ ॥** वेत्त्यादेः घुरः स्यात् स च किद्भवति। विदुरः। छिदुरः। भिदुरः।

*** स्निणशजेष्ट्वरप् ॥ १५९ ॥** एभ्यः ट्वरभवति स च कित्। सृत्वरः। सृत्वरी। इत्वरः। इत्वरी। नश्वरः। नश्वरी। जित्वरः। जित्वरी।

गत्वरः ॥ १६० ॥ गमेष्ट्वरप् मत्वं च निपात्यं । गत्वरः । गत्वरी ।

नम्रकंपिस्म्यजस्कमुहिंसदीपो रः॥१६१॥ एभ्यो रो भवति शीलादौ सत्यर्थे । नम्रं मुखं । कंप्रा शाखा । स्मेरं मुखं । अजस्रं तत्त्वं भावयामः । कम्रा स्त्री । हिंस्रः पापमतिः । दीप्रः प्रदीपः ।

***सन्भिक्षाशंसिविदिच्छादुः ॥ १६२ ॥** सन्नंताद् भिक्षादेश्च उर्भवति । चिकीर्षुः । बुभूषुः । बुभुत्सुः । बीभत्सुः । भिक्षुः । आशंसुः । विंदुः । इच्छुः । वेत्तेर्नुम् । इच्छतेश्च छो निपात्यः ।

***स्वप्तृष्धृषो नज् ॥ १६३ ॥** स्वपादेः नज् भवति शीलादौ सत्यर्थे । स्वप्नक् । स्वप्नजौ । स्वप्नजः । तृष्णक् । धृष्णक् ।

शृवंदादारुः ॥ १६४ ॥ आभ्यामारुः स्यात् । शरारुः । वंदारुर्जिनान् ।

भ्यः कुकुकौ ॥ १६५ ॥ बिभेतेः क्रु - कौ स्तः । भीरुः । भीरुकः । भीलुकः ।

स्थेशभासपिसकसो वरः ॥ १६६ ॥ स्थादेर्वरो भवति । स्थावरः । ईश्वरः । भास्वरः । पेस्वरः । कस्वरः ।

यो यङः ॥ १६७ ॥ यातेर्यङंतात् वरः स्यात् । यायावरः ।

+ सहवहचलपापतेरिः ॥ १६८ ॥ सहादेर्यङंतात् इर्भवति । सासहिः । वावहिः । चाचलिः । पापतिः[१] ।

+धाञ्कृसृजनूनमेः किर्लिट् च॥१६९॥ एभ्यः शीलादौ किर्भवति स च लिड्वत् । दधिः । चक्रिः । सस्रिः । जज्ञिः । नेमिः । चकारात् शीलाद्यर्थ उत्तरत्र नानुवर्तते ।

***संविप्राद् भ्वोऽखौ डुः ॥ १७० ॥** समादिपूर्वाद् भुवः सत्यर्थे डुर्भवत्यखौ । संभवतीति संभुः जनिता । विभुः सर्वगतः । प्रभुः स्वामी । अखाविति किं ? विभूर्नाम कश्चित् ।

***मितंद्र्वादयः ॥१७१ ॥** एते द्र्वंता निपात्यंते । मितं द्रवतीति मितंद्रुः । शंभुः । स्वयंभुः ।

***इत्रः प्वो दैवते ॥ १७२ ॥** दैवतेऽर्थे पूञः इत्रो भवति । पवित्रोऽर्हन् स मां पुनातु ।

***ख्वृषौ करणे ॥ १७३ ॥** पुवः करणे कारके इत्रः स्यात् खौ ऋषौ चाभिधेये । पूयतेऽनेनेति पवित्रो दर्भः । पवित्रोऽयमृषिः ।

***लूधूसूखनर्तिसहचरः ॥ १७४ ॥** एभ्यः करणे इत्रः स्यात् । लुनंति तेनेति लवित्रं । धवित्रं । सवित्रं । खनित्रं । अरित्रं । सहित्रं । चरित्रं ।

***व्ययोद्रोर्घनः ॥ १७५ ॥** व्यादिभ्यः हंतेर्घनो निपात्यः । विहन्यतेऽनेनेति विघनः । अयोघनः । द्रुघनः ।

***स्तंबाद् घ्नश्च ॥ १७६ ॥** स्तंबाद् घ्नः घनश्च निपात्यः । स्तंबो हन्यतेऽनेनेति स्तंबघ्नः । स्तंबघनः ।

***वह्यपरिघं ॥ १७७ ॥** वह्यपरिघशब्दौ निपात्येते । वहंति अनेनेति वह्यं शकटं । वहेर्यः । परिहन्यतेऽनेनेति परिघः । हनेर्डत्यघौ निपात्यौ ।

प्वो हलकोलास्ये त्रट् ॥ १७८ ॥ पूञः त्रट् भवति हलास्ये कोलास्ये च करणे । हलस्य पोत्रं । कोलस्य पोत्रं । तन्मुखमित्यर्थः ।

***दाब्नीशसयुयुजस्तुतिससिचमिहपतदशनहस्तोः ॥ १७९ ॥** एभ्यः करणे सति काले त्रट् स्यात् । दांति तेन दात्रं । नेत्रं । शस्त्रं । योत्रं । योक्त्रं । तोत्रं । सेत्रं । सेक्तं । पत्रं । दंष्ट्रा । मेढ्रं । नद्ध्री । स्तोत्रं ।

***धात्री ॥ १८० ॥** धेटः धाञश्च कर्मणि त्रट् निपात्यते । धयंति दधति तामिति धात्री स्तनदायिनी आमलकी च ।

***ञीन्मत्यर्चार्थशील्यादिभ्यःक्तः॥१८१॥** ञीद्भ्यः मत्यर्थेभ्योऽर्चार्थेभ्यः शील्यादिभ्यश्च सति काले क्तो भवति । ञिमिदा–मिन्नः । ञिधृषा-धृष्टः । राज्ञां मतः । राज्ञां बुद्धः । राज्ञामिष्टः । राज्ञां ज्ञातः । सतामर्चितः । सतां पूजितः । शीलितः । रक्षितः । क्षांतः ।

---

१ पापतीति यङंतनिर्देशो नीगभावार्थः ।

उणादयो बहुलं ॥ १८२ ॥ उण् इत्येवमादयस्त्याः सति काले बहुलं भवंति। कृवापाजिमिस्वदिसाध्यशूभ्य उण्। कारुः। वायुः। पायुः। जायुः। मायुः। स्वादुः। साधुः। आशुः। कचिदन्येऽन्यतोऽपि दृश्यंते। जरंडः। करंडः। त्रपिंडः। एरंडः। शंखः। क्वचिद् भूतेऽपि। कषितोऽसौ कषिः। ततोऽसौ तनिः। भसितं—भस्म। चरित्रं तत्र—चर्म। बृत्तं तत्र—वर्त्म।

इति जैनेंद्रव्याकरणे शब्दार्णवचंद्रिकायां
लघुवृत्तौ द्वितीयाध्यायस्य द्वितीयपादः।

तृतीयः पादः।

—:o:—

गम्यादिर्वर्त्स्यति ॥ १ ॥ गम्यादयः शब्दाः वर्त्स्यति काले साधवो भवंति। गमिष्यतीति गमी ग्रामं। आगामी नगरं। प्रस्थायी। भावी।

लृट् ॥ २ ॥ वर्त्स्यत्यर्थे धोर्लृट् स्यात्। करिष्यति। हरिष्यति। पक्ष्यते। अध्येष्यते।

***शेकानद्यतने लुट् ॥ ३ ॥** शेकेऽनद्यतने वर्त्स्यति धोर्लुट् स्यात्। इयं कदा गंता। यैवं पादौ निदधाति। अयं नु कदाऽध्येता य एवमनाभियुक्तः। श्वः कर्ता। श्वोऽध्येता।

पुरायावतोर्लट् ॥ ४ ॥ एतयोर्वाचोर्लट् भवति वर्त्स्यत्यर्थे। पुराधीते। यावदधीते। पुरा भुंक्ते। यावद् भुंक्ते।

वा कदाकर्ह्योः ॥ ५ ॥ कदा कर्हि इत्येतयोर्वाचोर्वा लट् स्यात्। कदा भुंक्ते। कदा भोक्ष्यते। कदा भोक्ता। कर्हि भुंक्ते। कर्हि भोक्ष्यते। कर्हि भोक्ता।

***किंवृत्तेऽर्थित्वे ॥ ६ ॥** किंवृत्ते वाचि वर्त्स्यति काले वा लट् भवत्यर्थित्वे गम्यमाने। को भवद्भ्यो भिक्षां ददाति, दास्यति, दाता वा। कं भवंतो भोजयंति, भोजयिष्यंति, भोजयितारो वा। स्वयं लब्धुमिच्छुरेवं पृच्छति। अर्थित्व इति किं? कः स्कंधावारं यास्यति।

लिप्स्यासिद्धौ ॥ ७ ॥ लिप्स्यासिद्ध्यर्थे वा लट् स्यात्। यो भवद्भ्यो दानं ददाति, दास्यति, दाता वा। स स्वर्गलोकं गच्छति, गमिष्यति, गंता वा।

***लोटि हेतौ ॥ ८** लोटि लोडंते वाचि लोटः प्रत्यासत्त्या लोडंतार्थस्य प्रैषादेर्हेतौ निमित्ते वर्त्स्यति काले वा लट् स्यात्। उपाध्यायश्चेदागच्छति, आगमिष्यति, आगंता वा। अथ त्वं जैनेंद्रमधीष्व। तर्कमधीष्व।

लिङ् चोर्ध्वमौहूर्तिके ॥ ९ ॥ लोटि लोडंते वाचि लोटः प्रत्यासत्त्या लोडंतार्थस्य प्रैषादेर्हेतौ निमित्ते ऊर्ध्वे मौहूर्तिके वर्त्स्यति काले लिङ् स्यात् लट् च वा। ऊर्ध्वमुहूर्त्तात् उपरि मुहूर्त्तस्य उपाध्यायश्चेदागच्छेत्, आगच्छति, आगमिष्यति, आगंता। अथ त्वं सूत्रमधीष्व, गणितमधीष्व।

वुणतुमूलृट् क्रियायां तदर्थायां ॥ १० ॥ क्रियार्थायां क्रियायां वाचि वर्त्स्यति वुणतुमूलृटो भवंति। कारको व्रजति। कर्तुं व्रजति। करिष्यामीति व्रजति। पाचको व्रजति। पक्तुं व्रजति। पक्ष्यामीति व्रजति। क्रियायामिति किं? अध्येष्ये इत्यस्य कमंडलुः। भिक्षिष्ये इत्यस्य जटाः। तदर्थायामिति किं? धावतस्ते दंडः पतिष्यति।

कर्मणि चाण् ॥ ११ ॥[1] कर्मणि वाचि क्रियायां तदर्थायां च धोरण् भवति। कुंभकारो व्रजति। गोदायो व्रजति। सुरापायो व्रजति।

***लृटो वाऽनितौ शतृशानौ ॥ १२ ॥** वर्त्स्यति यो लृट् तस्य स्थाने शतृशानौ वा स्तः अनितौ परे। पक्ष्यन्। पक्ष्यमाणः। पक्ष्यति। अनिताविति किं? पक्ष्यामीति व्रजति। करिष्यामीति व्रजति।

***सल्लटः ॥ १३ ॥** सति संप्रति काले यो लट् तस्य शतृशानौ वाऽनितौ स्तः। पचन्। पचमानः। पचति। यान्, याति। शयानः। शेते।

माङ्याक्रोशे ॥ १४ ॥ माङि वाच्याक्रोशे गम्यमाने लटः शतृशानौ स्तः। मा पचन्। मा पचमानः।

---

१ पूर्वेण वुणूलृटोः प्राप्तयोरयमारंभः केवले कर्मणि केवलायां च क्रियायां माभूदित्यर्थः।

तौ सत् ॥ १५ ॥ तौ शतृशानौ सत्-संज्ञौ स्तः । पचन् । पचमानः । पुत्रस्य कुर्वन् । पुत्रस्य कुर्वाणः ।

* पद्रुजो घञ् ॥ १६ ॥ आभ्यां घञ् स्यात् , पद्यतेऽसौ पादः । रुजत्यसौ रोगः ।

* सुः स्थिररुग्मत्स्यबले ॥ १७ ॥ सरतेः स्थिरादिषु कर्तृषु घञ् स्यात् । चंदनसारः । अतीसारो व्याधिः । विसारो मत्स्यः । सारं बलं । एष्विति किं ? सर्ता । सारकः ।

+ भावे ॥ १८ ॥ भावे धोर्घञ् भवति । पाकः । रागः ।

अकर्तरि ॥ १९ ॥ कर्तृवर्जिते कारके घञ् स्यात् । प्रकुर्वंति तमिति प्राकारः । दास्यतेऽस्मै दासः । आहरंति तस्मादाहारः । अकर्तरीति किं? कारकः । कर्ता ।

इङः ॥ २० ॥ इङो घञ् भवति भावेऽकर्तरि च । अधीयते इति अध्यायः । उपेत्याधीयतेऽस्मादुपाध्यायः ।

गौ रोः ॥ २१ ॥ गौ वाचि रौतेर्घञ् भवति । सुरावः । दूरावः । संरावः । विरावः । गाविति किं ? रवः ।

समि युदुद्रोः ॥ २२ ॥ समि वाच्येभ्यो घञ् स्यात् भावेऽकर्तरि । संयावः । संदावः । संद्रावः । समीति किं ? उपद्रवः ।

* स्तोर्यज्ञे ॥ २३ ॥ संपूर्वात् स्तौतेर्घञ् स्यात् यज्ञविषये । संस्तुवंत्यस्मिन्—संस्तावः छंदोगानां । संस्तवः सतामन्यत्र ।

* श्रिभ्वोऽगौ ॥ २४ ॥ अगौ वाचि श्रिभूभ्यां घञ् स्यात् । श्रायः । भावः । अगाविति किं ! प्रश्रयः । प्रभवः ।

* निरभ्यवे पूल्वन्यः ॥ २५ ॥ एषु वाक्षु प्वादिभ्यो घञ् स्यात् भावे कर्तरि । निष्पावः । अभिलावः । अवनायः । पवः, लवः, नयोऽन्यत्र ।

प्रे द्रुस्तुश्रोः ॥ २६ ॥ प्रे वाच्येभ्यो घञ् स्यात् । प्रद्रावः । प्रस्तावः । प्रश्रावः ।

स्त्रोऽयज्ञे ॥ २७ ॥ प्रे वाचि स्तृणातेर्घञ् भवत्ययज्ञे । शंखप्रस्तारः । विमानप्रस्तारः । बर्हिःप्रस्तरोऽन्यः ।

* वौ प्रथनेऽशब्दे ॥ २८ ॥ वौ वाचि स्तृणातेः प्रथने विस्तीर्णतायां भावेऽकर्तरि घञ् भवत्यशब्दे । पटस्य विस्तारः । गृहस्य विस्तारः । प्रथने इति किं ? विस्तरः । तृणस्याच्छादनमित्यर्थः । अशब्द इति किं ? वाक्यविस्तरः ।

क्षुश्रोः ॥ २९ ॥ वौ वाचि क्षुश्रुभ्यां घञ् स्यात् । विक्षावः । विश्रावः ।

* न्युदि ग्रः ॥ ३० ॥ न्युदोर्वाचोर्गृरूपात् घञ् स्यात् भावेऽकर्तरि । निगारः । उद्गारः । न्युदीति किं ? संगरः ।

क्रो धान्ये ॥ ३१ ॥ न्युदि वाचि किरतेर्धान्यविषये घञ् स्यात् भावेऽकर्तरि । धान्यस्य निकारः । उत्कारः । फलनिकरोऽन्यः ।

* वृणो ॥ ३२ ॥ नौ वाचि वृरूपात् घञ् स्यात् धान्ये । नीवारा नाम व्रीहयः ।

* इणोऽभ्रेषे ॥ ३३ ॥ निपूर्वादिणोऽभ्रेषे युक्तकरणे घञ् स्यात् भावेऽकर्तरि । एषोऽत्र न्यायः । अभ्रेष इति किं ? न्ययं गतश्चौरः ।

* परौ क्रमे ॥ ३४ ॥ परौ वाचीणः क्रमेऽर्थे घञ् स्यात् । तव पर्यायो भोक्तुं । मम पर्यायो भोक्तुं । पर्ययोऽन्यत्र ।

* व्युपे श्यः ॥ ३५ ॥ व्युपाभ्यां शीङः घञ् स्यात् क्रमे । तव विशायः । मम विशायः । तव राजोपशायः । मम राजोपशायः ।

* हस्तादेयेऽनुद्यस्तेये चेः ॥ ३६ ॥ हस्तादेये हस्तेनादानेऽनुदि वाचि चिञो घञ् भवत्यस्तेये । पुष्पप्रचायः । हस्तादेय इति किं ? पुष्पप्रचयं करोति तरुशिखरे । अनुदीति किं ? फलोच्चयः । अस्तेय इति किं ? फलप्रचयं करोति चौर्येण ।

* चित्यावासांगोपसमाधौ च कः ॥ ३७ ॥ चित्यादिष्वर्थेषु चेर्घञ् स्यात् चकारस्य च ककारादेशः । आकायमग्निं चिन्वीत । मुनिनिकायः ।

जलबुद्बुदधर्माणः कायाः । महान् गोमयनिकायः । चयोऽन्यत्र ।

संघेऽनूर्ध्वे ॥ ३८ ॥ संघे प्राणिविशेषसमुदाये चेर्घञ् स्यात् चस्य च को भवत्यनूर्ध्वे । वैयाकरणानिकायः । देवनिकायः । संघ इति किं ? सारसमुच्चयः । अनूर्ध्वे इति किं ? उपर्युपरि शूकरनिचयः ।

+ श्रो वायुवर्णनिवृते ॥ ३९ ॥ एष्वर्थेषु श्रृणातेर्घञ् भवति । शारो वायुर्वर्णो निवृतं च । शरोऽन्यः ।

***माने ॥ ४० ॥** माने इयत्तायां गम्यमानायां धोरकर्तरि घञ् भवति । एको निघासः । द्वौ केदारलावौ । त्रयः काराः ।

***उदि पूयुद्रोः ॥ ४१ ॥** उदि वाचि एभ्यो घञ् भवति । उत्पावः । उद्यावः । उद्द्रावः ।

ग्रहः ॥ ४२ ॥ उदि वाचि ग्रहेर्घञ् भवति । उद्ग्राहः । उदीति किं ? विग्रहः ।

समि मुष्टौ ॥ ४३ ॥ समि वाचि ग्रहेर्घञ् स्यात् मुष्ट्यर्थे । अहो मल्लस्य संग्राहः । मौष्टिकस्य संग्राहः । मुष्टाविति किं ? संग्रहः शास्त्रस्य ।

***शापे न्यवे ॥ ४४ ॥** न्यवयोर्वाचोर्ग्रहेरकर्तरि घञ् स्यात् शापे आक्रोशे गम्यमाने । निग्राहोऽह ते जाल्म भूयात् । अवग्राहोऽह ते जाल्म भूयात् । शापे इति किं ? निग्रहश्चौरस्य ।

प्रे लिप्सायां ॥ ४५ ॥ प्रे वाचि ग्रहेर्घञ् स्यात् लिप्सायां । पात्रप्रग्राहेण चरति पिंडपातार्थी । लिप्सायामिति किं ? प्रग्रहः ।

परौ यज्ञे ॥ ४६ ॥ परौ वाचि यज्ञेऽभिधेये ग्रहेर्घञ् स्यात् । उत्तरपरिग्राहः । अधरपरिग्राहः । परिग्रहोऽन्यः ।

***वाऽवे वर्षे ॥ ४७ ॥** अवे वाचि ग्रहेर्घञ् स्याद्वा वर्षविषये । अवग्राहः । अवग्रहः । वृष्टेः प्रतिबंध इत्यर्थः । अवग्रहः पदस्यान्यत्र ।

***प्रे युग्यतुलासूत्रे ॥ ४८ ॥** प्रे वाचि ग्रहेर्घञ् भवति वा युग्यसूत्रे तुलासूत्रे चाभिधेये । प्रग्राहः । प्रग्रहः । अश्वादिसंयमनरज्जुः वणिजां तुलाग्रहणं चोच्यते ।

***वुर्वस्त्रे ॥ ४९ ॥** प्रे वाचि वृञोऽकर्तरि घञ् वा स्यात् वस्त्रेऽभिधेये । प्रावारः । प्रवरः ।

***उन्न्युच्छ्रेः ॥ ५० ॥** आभ्यां घञ् वा स्यात् । उन्नायः । उन्नयः । उच्छ्रायः । उच्छ्रयः ।

आङि रुप्लोः ॥ ५१ ॥ आङि वाचि रुप्लुभ्यां घञ् वा स्यात् । आरावः । आरवः । आप्लावः । आप्लवः ।

परौ भ्वोऽवज्ञाने ॥ ५२ ॥ परौ वाचि भवतेरवज्ञाने घञ् वा स्यात् । परिभावः । परिभवो देवदत्तस्य ।

***न्यो द्यूते ॥ ५३ ॥** परौ वाचि नयतेर्द्यूतविषयेऽकर्तरि घञ् वा स्यात् । परिणायेन शारान् हंति । परिणयः कन्यायाः । अन्यत्र—परिणयः ।

***इवृग्रहवृदृगम्वसरणोऽच् ॥ ५४ ॥** इवर्णांतादुवर्णांतात् ऋकारांतात् ग्रहादेश्च भावेऽकर्तरि अज्भवति । जयः । लयः । क्रयः । नवः । लवः । यवः । तरः । शरः । करः । गरः । ग्रहः । वरः । आदरः । आगमः । वसः । रणः ।

गावदः ॥ ५५ ॥ गौ वाच्यदेरज् भवति । प्रघसः । विघसः । परिघसः । संघसः । गाविति किं ? घासः ।

नौ णश्च ॥ ५६ ॥ नौ वाच्यदेर्भावेऽकर्तरि णो भवत्यच्च । न्यादः । निघसः ।

***सृपणग्लहः प्रजनेयत्ताक्षे ॥ ५७ ॥** एभ्यो यथासंख्यं प्रजनादिविषये अज् भवति । गवामुपसरः । शाकपणः । मूलकादीनामियत्तीकृता संव्यवहारार्था मुष्टिरित्यर्थः । ग्लहः । अन्यत्र—उपसारः, पाणः, ग्लाहः ।

***समुदजः पशौ ॥ ५८ ॥** समुदोर्वाचोरजेर्भावेऽकर्तरि अच् स्यात् पशुविषये । समजः पशूनां समुदाय इत्यर्थः । उदजः पशूनां प्रेरणमित्यर्थः । पशाविति किं ? समाजः, उदाजः साधूनां ।

***विन्यभ्युपे ह्वो वश्चोश् ॥ ५९ ॥** व्यादिषु वाक्षु ह्वयतेरज् स्यात् वाशब्दस्य चोश् । विहवः । निहवः । अभिहवः । उपहवः ।

आङ्याजौ ॥ ६० ॥ आङि वाचि ह्वेञो-ऽञ् भवति वश्चोश् आजौ युद्धविषये । आहूयंते-ऽस्मिन् परस्परमिति आहवो रामस्य । आह्वायोऽन्यः ।

निपानमाहावः ॥ ६१ ॥ आहाव इति निपात्यते निपाने जलस्थानेऽर्थे । आहूयंतेऽस्मिन् पशवः पानायेत्याहावः पशूनां । आह्वयतेर्घञ् वश्चोश् ।

भावेऽगौ ॥ ६२ ॥ अगौ वाचि ह्वेञोऽञ् स्यात् भावे वश्चोश् । ह्वानं-हवः ।

हनश्च वधः ॥६३॥ हंतेर्भावेऽगौ अञ् भवति वधादेशश्च । हननं—वधः । चकारात् घञपि—घातः ।

*** मज्जब्व्यधोऽगौ ॥ ६४ ॥** अगौ वाचि मदादेरच् स्यात् भावेऽकर्तरि । मदः । जपः । व्यधः । अगाविति किं ? उन्मादः ।

*** ह्रस्वनक्वण्न्यो वा ॥६५॥** अगौ वाचि एभ्यो भावेऽकर्तरि अञ् वा स्यात् । हसः । हासः । स्वनः । स्वानः । क्वणः । क्वाणः । नयः । नायः ।

यमः सम्निव्युपे च ॥६६॥ समादौ अगौ च वाचि यमेरज्वा स्यात् । संयमः । संयामः । नियमः । नियामः । वियमः । वियामः । उपयमः । उपयामः । यमः । यामः ।

*** नौ स्वनगदनदपठः ॥ ६७ ॥** नौ वाच्येभ्यो भावेऽकर्तरि अच् स्याद्वा । निस्वनः । निस्वानः । निगदः । निगादः । निनदः । निनादः । निपठः । निपाठः ।

*** क्वणः ॥ ६८ ॥** नौ वाचि क्वणेर्भावेऽकर्तरि वाऽच् स्यात् । निक्वणः । निक्वाणः ।

*** वैणे गौ ॥ ६९ ॥** वैणेऽर्थे गिपूर्वात् क्वणेर्वाऽच् स्यात् । प्रक्वणः । प्रक्वाणः वीणायाः । प्रक्वणः शृंखलस्यान्यत्र ।

+ स्थादिभ्यः कः ॥ ७० ॥ स्थादिभ्यो भावेऽकर्तरि कस्त्यो भवति । प्रतिष्ठंतेऽस्मिन् स प्रस्थः । संस्था । प्रपिबंत्यस्यां प्रपा । विहन्यतेऽनेनेति विघ्नः ।

*** घनांतर्घणोद्घनापघनोपघ्नसंघोद्घनिघं मूर्तिदेशात्याधानांगासन्नगणशस्तनिमित्ते ॥ ७१ ॥** घनादयो निपात्यते मूर्त्यादिषु अर्थेषु । दधिघनः । हंतेराचि घनभावः काठिन्ये । अंतर्घणो देशः । अंतर्हंतेराधारे घनोऽच् । उद्घन्यतेऽस्मिन् उद्घनोऽत्याधानं । अपहन्यतेऽनेनेति—अपघनोऽगं । गुरूपघ्नः । उपहतेः को घ्नभावश्चासन्ने । ऋषिसंघः । संहंतेरच् घश्च गणे । उद्घन्यते उत्कर्षेण ज्ञायते उद्घः प्रशस्तः । हंतेरञ् घश्च निमित्ते । निघाः वृक्षाः । अचि घः । अन्यत्रांतर्घातः । उद्घातः । अपघातः । उपघातः । संघातः । उद्घातः । निघातः ।

*** प्रघणप्रघाणौ कोष्ठांशे ॥ ७२ ॥** एतौ कोष्ठांशे निपात्यौ । प्रघणः, प्रघाणः । गृहद्वारैकदेशः । हंतेरचि घणघाणौ निपात्यौ । प्रघातोऽन्यत्र ।

*** प्रमदसंमदौ हर्षे ॥ ७३ ॥** अमू हर्षे अजंतौ निपात्यौ । प्रमदः कन्यानां । संमदः कोकिलानां । अन्यत्र-प्रमादः । संमादः ।

ड्वितः क्त्रिः ॥ ७४ ॥ डुशब्देतो धोर्भावे कर्तरि क्त्रिर्भवति । पाकेन निर्वृत्तं पक्त्रिमं । उप्त्रिमं । कृत्रिमं । विहित्रिमं ।

ट्वितोऽथुः ॥ ७५ ॥ टुशब्देतो धोरथुः स्यात् । श्वयथुः । क्षवथुः । वेपथुः ।

*** यजयदविच्छच्छस्वप्रक्षो नङ् ॥७६॥** एभ्यो नङ् भवति भावेऽकर्तरि । यज्ञः । यत्नः । विश्नः । प्रश्नः । स्वप्नः । रक्ष्णः ।

*** याञ्चा ॥ ७७ ॥** याचेः स्त्रियां नङ् निपात्यते । याञ्चा । स्त्रीलिंगादन्यत्र—याचित्रिमं ।

गौ भोः किः ॥ ७८ ॥ गौ वाचि भुसंज्ञकेभ्यः किर्भवति । विधिः । निधिः । संधिः । व्याधिः । निदिः । प्रदिः । संदिः । आदिः ।

कर्मण्याधारे ॥ ७९ ॥ कर्मणि वाचि आधारे कारके किर्भवति भोः । जलं धीयतेऽस्मिन् जलधिः । इषुधिः । वालधिः ।

स्त्रियां क्तिः ॥ ८० ॥ स्त्रीलिंगे भावेऽकर्तरि वर्तमानाद्धोः क्तिर्भवति । दृष्टिः । सृष्टिः । कृतिः । हृतिः । धृतिः ।

+ लभादिभ्यः ॥ ८१ ॥ एभ्यः स्त्रियां क्तिर्भवति । लब्धिः । प्राप्तिः । दीप्तिः ।

श्रुस्तिवषयजः करणे ॥ ८२ ॥ एभ्यः करणे स्त्रियां क्तिः स्यात्। शृण्वंत्यनयेति श्रुतिः। स्तुतिः। इष्टिः। यजंत्यनयेति इष्टिः।

गापापचो भावे ॥ ८३ ॥ एभ्यो भावे स्त्रियां क्तिर्भवति। संगीतिः। प्रपीतिः। पक्तिः।

***स्थो वा ॥ ८४ ॥** तिष्ठतेः स्त्रियां भावे क्तिर्वा स्यात्। अवस्थितिः। अवस्था।

कर्मव्यतिहारे ञः ॥ ८५ ॥ कर्मव्यतिहारेऽर्थे धोः स्त्रियां भावे ञो वा स्यात्। परस्परस्य क्रोशनं व्याक्रोशी। व्याकृष्टिः। व्यापहासी। व्यापहस्तिर्वर्तते।

ण्युक्षेः[1] ॥८६॥ ण्यंतादुक्षेश्च कर्मव्यतिहारे ञः स्यात्। व्यापचर्ची। व्यापचोरी। व्यात्युक्षी।

व्रज्यजः क्यप् ॥ ८७ ॥ आभ्यां स्त्रियां भावे क्यप् भवति। प्रव्रज्या। इज्या।

***भृञः खौ ॥ ८८ ॥** भृञो भावे क्यप् स्यात् खौ। भृत्या। खाविति किं? भृतिः।

***शीण्विन्निषान्निपद्मनसुञ्समजः ॥८९॥** एभ्यः स्त्रियामकर्तरि क्यप् स्याद् खौ। शेरतेऽस्यामिति शय्या। यंत्यस्यामिति इत्या। विद्यतेऽनयेति विद्या। निषीदंत्यस्यामिति निषद्या। निपद्यंतेऽस्यामिति निपद्या। मन्यंतेऽनयेति मन्या। सुनोत्यस्यामिति सुत्या। समजंति अस्यामिति समज्या।

कृञः शश्च ॥ ९० ॥ कृञः स्त्रियामकर्तरि शो भवति क्यप् च। क्रिया। कृत्या।

+ संपदादिभ्यः क्विप् क्तिः ॥ ९१ ॥ संपदादिभ्यः स्त्रियां भावे क्विप्क्ती स्तः। संपत्। संपत्तिः। विपत्। विपत्तिः। संवित्। संवित्तिः।

यूतिजूतिसातिहेतिकीर्तिः ॥ ९२ ॥ एते क्त्यंता निपात्यंते। यूतिः। जूतिः। युज्वोर्दीः। सातिः। स्यतेरनित्वं। हेतिः। हंतेर्हिनोतेर्वा हे। कीर्तिः। कीर्तयतेः क्तिः।

+ ग्लाज्याहो निः ॥ ९३ ॥ एभ्यो निर्भवति भावेऽकर्तरि स्त्रियां। ग्लानिः। ज्यानिः। हानिः।

ण्यासिवच्छ्रंथिघट्टिवंदाऽनः ॥ ९४ ॥ ण्यंतेभ्य आसनादेश्चान इत्ययं त्यो भवति स्त्रियां भावे। योजना। भावना। वाचना। कारणा। हारणा। आसना। वेदना। श्रंथना। घट्टना। वंदना।

+ इषोऽनिच्छायां ॥ ९५ ॥ इषेरनः स्यादनिच्छायां। एषणा। इष्टिरन्यत्र।

+ परौ वा ॥ ९६ ॥ परौ वाचि इषेरनिच्छायामकर्तरि स्त्रियामनः स्याद्वा। पर्येषणा। परीष्टिः।

+ चरसुर्यः ॥ ९७ ॥ परौ वाचि चरिसर्तिभ्यां यो भवति स्त्रियां। परिचर्या। परिसर्या। पराविस्येव। संचूर्तिः। संसृतिः।

+ जागुरश्च ॥ ९८ ॥ जागर्तेर्भावेऽकर्तरि स्त्रियामस्यो भवति यश्च। जागरा। जागर्या।

त्यात् ॥ ९९ ॥ त्यांतेभ्यो धुभ्यो भावे स्त्रियामत्यो भवति। चिकित्सा। लोलूया। पुत्रकाम्या। कंडूया। गोपाया।

सरोर्हलः ॥ १०० ॥ सह रुणा वर्तमानाद्धोर्हलंतादत्यो भवति। कुंडा। शिक्षा। ईहा। सरोरिति किं? पठितिः। हल इति किं? नीतिः।

षिद्भिदादिभ्योऽङ् ॥ १०१ ॥ षिद्भ्यो भिदादिभ्यश्च भावेऽकर्तरि स्त्रियामङ् भवति। जॄष् जरा। त्रपा। घटा। व्यथा। भिदा। छिदा। आरा शस्त्र्यां। कारा बंधने। कृपा।

चितिपूजिकथिकुंबिचर्चः ॥ १०२ ॥ एभ्यो भावेऽकर्तरि स्त्रियामङ् स्यात्। चिंता। पूजा। कथा। कुंबा। चर्चा।

***गावातः ॥ १०३ ॥** गौ वाच्याकारांतात् स्त्रियामङ् स्यात्। प्रज्ञा। उपदा। प्रमा। गाविति किं? दत्तिः।

+ मृगयेच्छाटाट्याः ॥१०४॥ एते निपात्यंते स्त्रियां भावेऽकर्तरि। मृगया। मृगयतेः शः शप् च यगपवादः। इच्छा। इषेः शः यगभावश्च। अटाट्या। अटतेर्यङ्वच्च।

***खुभावे क्वचिण्वुः १०५ ॥** धोः स्त्रियां खुविषये भावे च क्वचिण्वुर्भवति। प्रवाहिका। प्रच्छ-

1। णिरिति णिङ्णिचोः सामान्यग्रहणार्थः।

र्दिका । विचार्चिका । एवं नामानो व्याधयः । शाला भज्यंते यस्यां क्रीडायां सा शालभंजिका क्रीडा । वारणपुष्पप्रचायिका । उद्दालकपुष्पभंजिका । अवोषणादिका । शयनं शायिका । आसिका । क्वचिन्न । शिरोर्तिः । चंदनतक्षाः ।

वेञ्च प्रश्नाख्याने ॥ १०६ ॥ धोः स्त्रियामिञ् वा स्यात् ण्वुश्च । वावचनात् यथाप्राप्तं च प्रश्ने आख्याने च प्रतिवचने गम्यमाने । कां त्वं कारिमकार्षीः, कां कारिकां, कां क्रियां, कां कृत्यां, कां कृतिं । सर्वा मया कारिः, कृता । सर्वा कारिका, सर्वा क्रिया, सर्वा कृत्या, सर्वा कृतिः । कां त्वं पाठिमपाठीः, पाठिकां, पठितिं । कां त्वं गणिमजीगणः । कां गणिकां, कां गणनां ।

*** पर्यायार्हर्णोत्पत्तौ ण्वुः** ॥ १०७ ॥ एष्वर्थेषु ण्वुर्भवति धोः स्त्रियां नित्यं भावे । भवतः शायिका । भवतः आसिका । भवतोऽग्रे गामिका । आसनादेः क्रम इत्यर्थः । अर्हति भवानिक्षुभक्षिकां । ओदनभोजिकां । इक्षुभक्षिकां मे धारयसि । ओदनभोजिकां । पयः पायिकां । इक्षुभक्षिकां मे उदपादि । उड्डकखादिका । क्षीरपायिका

*** नञ्यनिः शापे** ॥ १०८ ॥ नञि वाचि धोः स्त्रियां भावेऽकर्तरि अनिर्भवति शापे आक्रोशे गम्यमाने । अभवनिस्ते जाल्म भूयात् । अकरणिस्ते वृषल भूयात् । नञीति किं ? हतिस्ते जाल्मास्तु । शाप इति किं ? अकृतिस्तस्य घटस्य ।

*** व्यानड् बहुलं** ॥ १०९ ॥ व्यसंज्ञा अनड् च बहुलं भवति । भावकर्मणोर्व्यान् वक्ष्यति । ततोऽन्यत्रान्यत्रापि स्युः । ज्ञानमावृणोति आव्रियतेऽनेनेति वा ज्ञानावरणीयं । दर्शनावरणीयं । वेदनीयं । मोहनीयं । स्नांति तेन—स्नानीयं चूर्णं । दीयतेऽस्मै दानीयोऽतिथिः । भावकरणाधारेष्वनटं वक्ष्यति । ततोऽन्यत्रापि स्यात् । निरदंति तदिति निरदनं । राजभोजनाः शाल्यः । संप्रदीयतेऽस्मै संप्रदानं । अपादीयतेऽस्मादित्यपादानं ।

*** नभ्भावे क्तोऽभ्यादिभ्यः** ॥ ११० ॥ बिभेत्यादिवर्जितात् धोर्नपि भावे क्तो भवति । हसितं छात्रस्य । शोभनं । जल्पितं । आसितं । शयितं । अभ्यादिभ्य इति किं ? भयं । वर्षं ।

*** ञिन् व्याप्तौ** ॥ १११ ॥ नभ्भावे ञिन् स्यात् धोः व्याप्तौ कात्स्न्येनाभिसंबंधे गम्यमाने । समततः कुटनं सांकोटिनं । सांराविणं । सांमार्जिनं । व्याप्ताविति किं ? संकोटः ।

*** करणाधारे चानट्** ॥ ११२ ॥ करणे आधारे नभ्भावे चाभ्यादिभ्यो धुभ्योऽनट् स्यात् । वृश्च्यतेऽनेनेति वृश्चनः । इध्मव्रश्चनः । पलाशशातनः । दुह्यतेऽस्यामिति दोहनी । तिलपीडनी । राजधानी । हसनं । शोभनं छात्रस्य । आसनं । जल्पनं । शयनं ।

पुंस्वौ घः प्रायः ॥ ११३ ॥ धोः पुंलिंगसंज्ञायां करणाधारयोर्घो भवति प्रायः । प्रच्छाद्यतेऽनेनेति प्रच्छदः । दंतच्छदः । प्लवः । एत्य कुर्वंत्यस्मिन् इति-आकरः । आलवः । आपवः । पुंग्रहणं किं ? प्रधानं । स्वाविति किं ? प्रहरणो दंडः । प्राय इति किं ? दोहनः । प्रसाधनः ।

*** गोचरसंचरवहव्रजव्यजसंक्रमापणखेलभगकषनिकषनिगमाः** ॥ ११४ ॥ एते करणाधारयोः घांता निपात्यंते पुंस्वौ । गावश्चरंत्यस्मिन्—गोचरः । संचरतेऽनेन-संचरः । वहः । व्रजः । व्यजंत्यस्मिन् व्यजः । संक्रमः । आपणः । खेलः । भगः । कषः । निकषः । निगमः ।

+ खनेर्डडरेकेकवकाश्च ॥ ११५ ॥ खनेर्धोः करणाधारयोः पुंस्वौ डादयो भवंति घश्च । आखन्यतेऽनेनास्मिन् वा आखः । आखरः । आखनिकः । आखनिकबकः । आखनः ।

+ घञ् ॥ ११६ ॥ खनेर्धोः करणाधारयोः पुंस्वौ घञ् स्यात् । आखानः ।

तॄस्त्रोऽवे ॥ ११७ ॥ अवे वाच्याभ्यां करणाधारयोः पुंस्वौ घञ् स्यात् । अवतारः । अवस्तारः ।

हलः ॥ ११८ ॥ हलंताद्धोः करणाधारयोः पुंस्वौ घञ् स्यात् । वेदः । वेगः । संगः । अपामार्गः । आपाकः ।

*** दारजारसंहारोद्यावन्यायावहाराबाधाः**

॥११९॥ दारादयः पुंखौ घञंताः निपात्यते करणाधारयोः। दीर्यते पुमानेभिरिति दाराः। जीर्यतेऽनेनेति जारः। संहारः। उद्यावः। न्यायः। अवहारः। एत्य वयंत्यस्मिन्निति-आवायः।

*** आनायोदंकं ज लाजले ॥ १२० ॥** एतौ घञंतौ करणाधारयोर्निपात्येते जालाजलयोः। आनीयतेऽनेनास्मिन् वेति आनायः जालं। तैलमुद्घ्यतेऽनेनास्मिन् वेति तैलोदंकः। अन्यत्र–आनयः। जलोदंचनः।

स्वीषद्दुसि कृच्छ्राकृच्छ्रे खः ॥ १२१ ॥ एषु वाक्षु कृच्छ्राकृच्छ्रवृत्तिषु धोः खो भवति। सुखेन शय्यते सुशयं भवता। ईषच्छयं। दुःशयं। सुकरः। दुःकरः। ईषत्करः कटस्त्वया।

कर्तृकर्मणोर्भूकृञ्भ्यां च्वौ ॥ १२२ ॥ कृच्छ्राकृच्छ्रवृत्तिषु स्वीषद्दुसु वाक्षु कर्तरि कर्मणि च च्व्यर्थे वाचि भूकृञ्भ्यां खो भवति यथासंख्यं। सुखेनानाढ्येनाढ्येन भूयते स्वाढ्यंभवं भवता। ईषदाढ्यंभवं। दुराढ्यंभवं। सुखेनानाढ्य आढ्यः क्रियते स्वाढ्यंकरो देवदत्तः। ईषदाढ्यंकरः। दुराढ्यंकरः।

*** आतोऽनः ॥ १२३ ॥** स्वादौ वाचि धोराकारांतादनो भवति। सुपानं पयो भवता। ईषत्पानं। दुष्पानं। सुग्लानं। सुमानं।

+ शास्युद्धृष्मृष्दृशोऽल्ये ॥ १२४ ॥ कृच्छ्रार्थेऽल्ये दुसि वाच्येभ्योऽनः स्यात्। दुःशासनः ' दुर्योधनः ' दुर्धर्षणः। दुर्मर्षणः। दुर्दर्शनः।

*** सद्भूतवद्वाऽऽशंस्ये ॥ १२५ ॥** सद्भूतवद्वाशंस्ये सद्भूतवच्च वा त्यो भवत्याशंस्ये प्रशंसावचने। वावचनाद्यथाप्राप्तं च। उपाध्यायश्चेदागच्छति, आगमत्, आगतः,आगमिष्यति, आगंता तदा जैनेंद्रमधीमहे, अध्यगीष्महि, एतदधीतं, अध्येष्यामहे, अध्येतास्महे। आशंस्य इति किं ? उपाध्यायः आगमिष्यति।

*** क्षिप्राशंसोक्तौ लृट्लिङ् ॥ १२६ ॥** क्षिप्रोक्तौ आशंसोक्तौ च शब्दे वाचि धोर्यथासंख्यं लृट्लिङौ स्तः आशंस्ये गम्यमाने। उपाध्यायश्चेदागच्छति, आगमत्, आगतः, आगमिष्यति, आगंता। क्षिप्रं, शीघ्रं, अरं, मक्षु, त्वरितं, त्वरं, आशु, तूर्णं. वेगं, तदा तर्कमध्येष्यामहे। आशंसे-संभावये, अवकल्पये, युक्तोऽधीयीय।

न लङ्लुट् सामीप्याव्युच्छित्त्योः १२७ सामीप्याव्युच्छित्त्योर्वर्तमानाद्धोर्लङ्लुटौ न स्तः। कालतत्तुल्यजातीयेनाव्यवधानं सामीप्यं। येयं पौर्णमासी अतिक्रांता एतस्यां सुपार्श्वनाथमपूपुजाम, अतिथीन् अबूभुजाम। येयममावास्या आगामिनी एतस्यां जिनमहं पूजयिष्यामि, अतिथीन् स्थापयिष्यामि। अव्युच्छित्तिः क्रियाप्रबंधः। यावदजीवत् भृशमन्नमदात्। यावज्जीविष्यति भृशमन्नं दास्यति।

*** वर्त्स्यत्यनहोरात्रेऽवोऽवधेः ॥ १२८ ॥** वर्त्स्यत्यर्थे अवधेः अवः अवरस्मिन् भागे अहोरात्रवर्जिते धोर्लङ् न स्यात्। योऽयमध्वा गंतव्यः आचित्रकूटात् तस्यावरस्मिन् भागे द्विरोदनं भोक्ष्यामहे। द्विः सूत्रमध्येष्यामहे। योयमागामी संवत्सरः तस्य यदवरं आग्रहायण्यास्तत्रार्हत्पूजां करिष्यामहे। अतिथिभ्यो दानं दास्यामहे। वर्त्स्यतीति किं ? योयमध्वागतः आदंतपुरात्तस्य यदवरं कांचीपुरात् तत्र द्विरोदनं अभुञ्महि। योयमतीतः संवत्सरस्तस्य यदवरमाग्रहायण्यास्तत्र द्विरर्हत्पूजामकुर्म्महि। अनहोरात्र इति किं ? योयमागामी त्रिंशद्रात्रः तस्य योऽवरः पंचदशरात्रः तत्र युक्ता द्विरध्येतास्महे। अव इति किं ? योयमध्वा गंतव्यः आचित्रकूटात् तस्य यत्परं मथुरायाः तत्र युक्ताः द्विरध्येतास्महे। अवधेरिति किं ? योयमध्वा गंतव्यो निरवधिकस्तस्य यदवरं मथुरायास्तत्र युक्ता द्विरध्येतास्महे।

***वा परे काले ॥ १२९ ॥** अवधेः परस्मिन् भागे काले वर्त्स्यति लुट् वा भवत्यनहोरात्रे। योयमागामी संवत्सरः तस्य यत्परं आग्रहायण्यास्तत्र द्विरध्येष्यामहे। जैनेंद्रमध्येतास्महे।

१ अत्र भूतग्रहणेन भूतसामान्यविहितस्य त्यस्य परिग्रहः। न पुनरद्यतनपरोक्षयोः। ततः सामान्यातिदेशे विशेषानतिदेशाल्लङ्लिटौ न भवतः। अत्र भविष्यत्कालविषये आशंस्ये प्राप्तौ लुङ्लुटौ अनेन सूत्रेण विकल्पतः प्रतिषिध्येते। उपाध्यायश्चेदागमिष्यति तदा जैनेंद्रमध्येष्यामहे इति प्राप्तौ।

लिङ्हेतौ लृङ् क्रियावृत्तौ ॥ १३० ॥ लिङ्हेतौ वर्त्स्यति लृङ् स्यात् क्रियाया अप्रवृत्तौ सत्यां । गुरूंश्चेदुपासिष्यत शास्त्रांतमगमिष्यत् । यदि मत्समीपे आशिष्यत दध्नाऽभोक्ष्यत ।

भूते ॥ १३१ ॥ भूते काले लिङ्हेतौ क्रियावृत्तौ लृङ् स्यात् । दृष्टो मया भवतः पुत्रोऽन्नार्थी चंक्रम्यमाणः, अपरश्चातिथ्यर्थी यदि तेन दृष्टोऽभविष्यत् अप्यभोक्ष्यत । न तु दृष्टः सोऽन्येन पथा गतः नोत भुक्तवान् ।

वाऽऽशेषात् ॥ १३२ ॥ शेषेऽयदौ लृडिति वक्ष्यति । आ एतस्मात् शेषसंशब्दनात् लिङ्हेतौ क्रियावृत्तौ भूते लृङ् वा भवतीति ज्ञेयं । तत्रैवोदाहरिष्यामः ।

लट् गर्हेऽपिजात्वोः ॥ १३३ ॥ गर्हेऽर्थे धोर्लट् भवति अपिजातुशब्दयोर्वाचोः । अपि तत्र भवान् प्राणिनो हंति । जातु तत्रभवान् प्राणिनो हंति गर्हामहे । अन्याय्यमेतत् । इह लिङ्हेत्वभावात् लृङ् न भवति ।

वा कथमि लिङ् च ॥ १३४ ॥ कथमि वाचि धोर्गर्हे लिङ् वा स्यात् लट् च । वावचनात् यथाप्राप्तं च । कथं नाम तत्रभवान् भूतानि हिंस्यात् । कथं नाम तत्रभवान् भूतानि हिनस्ति, अहिंसीत्, अहिनत्, जिहिंस, हिंसिष्यति, हिंसिता, अहिंसिष्यत् गर्हामहे। अन्याय्यमेतत् ।

किंवृत्ते लिङ्लृटौ ॥ १३५ ॥ किमो वृत्तं किंवृत्तं तस्मिन् किंवृत्ते वाचि धोर्लिङ्लृटौ स्तः गर्हे । किं तत्रभवान् अनृतं ब्रूयात्, अनृतं वक्ष्यति, अनृतमवक्ष्यत् ।

***अश्रद्धामर्षे ॥ १३६ ॥** अश्रद्धायाममर्षे चार्थे धोर्लिङ्लृटौ स्तः । न श्रद्दधे नावकल्पयामि न संभावयामि किं तत्रभवान् अदत्तं गृह्णीयात् गृहीष्यति, अग्रहीष्यत् । नावमर्षयामि न क्षमे धिङ्मिथ्या नैतदस्ति किं तत्रभवान् अदत्तं गृह्णीयात् गृहीष्यति, अगृहीष्यत् ।

किंकिलास्त्यर्थयोर्लृट् ॥ १३७ ॥ किंकिलेऽस्त्यर्थे च वाचि अश्रद्धामर्षे धोर्लृट् स्यात् । न श्रद्दधे न क्षमे किं किल नाम तत्रभवान् परदारान् सेविष्यते । अस्ति नाम भवतु नाम विद्यते नाम तत्रभवान् अकल्प्यं सेविष्यते ।

जातुयद्यदायदौ लिङ् ॥ १३८ ॥ एषु वाक्षु धोरश्रद्धामर्षे लिङ् स्यात् । न प्रत्ययो मे न मर्षो मे जातु तत्रभवान् सुरां पिबेत् । यत् तत्रभवान् सुरां पिबेत् । यदा तत्रभवान् सुरां पिबेत् । यदि तत्रभवान् सुरां पिबेत् । सुरामपास्यत् ।

यच्चयत्रयोः ॥ १३९ ॥ एतयोर्वाचोरश्रद्धामर्षे धोर्लिङ् भवति । न श्रद्दधे, न मृष्यामि, यच्च तत्रभवान् आक्रोशेत् । यत्र तत्रभवान् आक्रोशेत्, आक्रोक्ष्यत् ।

गर्हे ॥ १४० ॥ गर्हेऽर्थे यच्चयत्रयोर्वाचोः धोर्लिङ् स्यात् । यच्च तत्रभवान् अस्मान् परिवदेत् । यत्र तत्रभवानस्मान् परिवदेत्, पर्यवदिष्यत् वृद्धो विद्वान् सन्नुत्कृष्टः गर्हामहे ।

***चित्रे ॥ १४१ ॥** चित्रेऽर्थे तयोर्वाचोर्धोर्लिङ् स्यात् । चित्रमाश्चर्यमद्भुतं विस्मयनीयं यच्च तत्रभवान् लोभं कुर्यात् । चित्रं यत्र तत्रभवान् अलोभिष्यत् ।

शेषेऽयदौ लृट् ॥ १४२ ॥ अयदौ शेषे यच्चयत्राभ्यामन्यस्मिन् शेषे वाचि चित्रेऽर्थे धोर्लृट् भवति यदिशब्दश्चेन्न प्रयुज्यते । चित्रं अंधो नाम पुस्तकं वाचयिष्यति । मूको नाम जैनेंद्रमध्येष्यते । बधिरो नाम धर्मं श्रोष्यति । अयदाविति किं ? आश्चर्यं यदि स भुंजीत ।

***बाढेऽप्युते लिङ् ॥ १४३ ॥** बाढार्थयोरप्युतयोर्वाचोर्धोर्लिङ् भवति । अपि कुर्यात् । उत कुर्यात् । बाढ इति किं ? अपिधास्यति द्वारं उत्पातिष्यति दंडः ।

***संभाव्येऽलम्यर्थात् ॥ १४४ ॥** संभाव्ये श्रद्धेयेऽर्थेऽलमर्थविशिष्टे वर्तमानाद्धोर्लिङ् भवति स चेदलमर्थात् स्यात् न स्वरूपतः । अपि हस्तिनं हन्यात् । अपि पर्वतं शिरसा भिंद्यात् । अपि समुद्रं दोर्भ्यां तरेत् । अर्थादिति किं ? वसति चेत्सुराष्ट्रेषु वंदिष्यतेऽलमूर्जयंतं ।

***धुक्तौ वाऽयदि ॥ १४५ ॥** धुवचने वाचि संभाव्ये धोर्लिङ् भवति यदिशब्दश्चेन्न प्रयुज्यते अलमर्थात्, अयदि वा । संभावयामि भुंजीत भवान् । अभुंक्त भवान् । धुग्रहणं किं ? अपि ग्वारीपाकं भुंजीत । अयदीति किं ? संभावयामि यन्न भुंजीत ।

हेतुफले लिङ् ॥ १४६ ॥ हेतौ फले च तत्कार्ये वर्तमानाद्धोर्लिङ् वा स्यात । यदि गुरून् उपासीत शास्त्रांतं गच्छेत् । यदि गुरूनुपासिष्यते शास्त्रांतं गमिष्यति ।

इच्छोद्बोधेऽकच्चिति ॥ १४७ ॥ इच्छोद्बोधे स्वाभिप्रायवेदने गम्यमाने धोर्लिङ् भवत्यकच्चिति–कच्चिच्छब्दाप्रयोगे । इच्छा मे शास्त्रमधीयीत भवान् । कामो मे भुंजीत भवान् । अकच्चितीति किं ?

कच्चिज्जीवति मे माता कच्चिज्जीवति मे पिता ।
मारानिद त्वां पृच्छामि कच्चिज्जीवति पार्वती ॥

इच्छार्थे लिङ्लोट् ॥ १४८ ॥ इच्छार्थे धौ वाचि धोर्लिङ्लोटौ स्तः इच्छोद्बोधे गम्यमाने । इच्छामि कामये भुंजीत भवान् । प्रार्थये भुंक्तां भवान् ।

तुमेककर्तृके ॥ १४९ ॥ एककर्तृके इच्छार्थे धौ वाचि तुम् स्यात् । इच्छति भोक्तुं । कामयते भोक्तुं । वष्टि गंतुं । एककर्तृके इति किं ? इच्छामि भुक्तां भवान् ।

लिङ् ॥ १५० ॥ इच्छार्थे एककर्तृके धौ वाचि लिङ् स्यात् । भुंजीयेति इच्छति । अधीयीयेति वांछति ।

***वेतस्सति ॥ १५१ ॥** इतोऽस्मादिच्छार्थाद्धोः सति भवति काले लिङ् वा स्यात् । इच्छेत् । इच्छति । उश्यात् । वष्टि ।

विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थने लिङ् ॥ १५२ ॥ एष्वर्थेषु लिङ् स्यात् । विधौ–दानं कुर्यात् भवान् । प्राणिनो न हिंस्यात् । निमंत्रणे–संध्यासु नियमं कुर्यात् । आमंत्रणे–इह भवान् आसीत । अधीष्टे–तत्त्वं भवान् गृह्णीयात् । संप्रश्ने–किं नु खलु जैनेंद्रमधीयीय । प्रार्थने–भवति मे जैनेंद्रमधीयीय ।

लोट् ॥ १५३ ॥ विध्यादिष्वर्थेषु धोर्लोट् स्यात् । व्रतं रक्षतु भवान् । प्राणिनो न हिनस्तु । संध्यासु नियमं करोतु । इह भवानास्तां । तत्त्वं गृह्णातु । किं नु खलु धर्मशास्त्रमध्ययै । भवति जैनेंद्रमध्ययै ।

***प्रैषानुज्ञावसरे त्याश्च ॥ १५४ ॥** एष्वर्थेषु धोर्त्याः भवंति लोट् च । भवता खलु कटः कर्तव्यः । करणीयः । कार्यः । कटं करोतु भवान् हि प्रेषितोऽनुज्ञातः । भवतोऽवसरः ।

***लिङ्चोर्ध्वमौहूर्तिके ॥ १५५ ॥** ऊर्ध्वमौहूर्तिकेऽर्थे वर्तमानाद्धोः प्रैषादौ गम्यमाने लिङ् भवति त्याश्च यथा प्राप्तं च । उपरि मुहूर्तस्य शीघ्रं भवान् दानं दद्यात् । भवता खलु दानं दातव्यं, देयं, दानीयं, ददातु भवान् । प्रेषितोऽनुज्ञातो भवतः प्राप्तकालो दानकरणे ।

स्मे लोट् ॥ १५६ ॥ स्मे वाचि लोट् भवत्यूर्ध्वमौहूर्तिकेऽर्थे प्रैषादौ गम्यमाने । ऊर्ध्वमुहूर्ताद् भवान् कटं करोतु स्म प्रेषितोऽनुज्ञातो भवतोऽवसरः ।

अधीष्टे ॥ १५७ ॥ स्मे वाचि धोर्लोट् भवत्यधीष्टेऽर्थे । अंग स्म राजन् अधीच्छामो भवानणुव्रतानि रक्षतु ।

कालवेलासमये तुम् वाऽवसरे ॥ १५८ ॥ कालादौ वाचि धोर्वा तुम् भवत्यवसरे गम्यमाने । कालो भोक्तुं । वेला भोक्तुं । समयो भोक्तुं । कालो भोक्तव्यस्य । वेला भोजनस्य । समयो भोजनस्य । अवसर इति किं ?

कालः पचति भूतानि कालः संहरते प्रजाः ।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥

लिङ् यदि ॥ १५९ ॥ यच्छब्दप्रयोगे कालादौ वाचि धोरवसरे लिङ् स्यात् । कालो यद् भुंजीत भवान् । वेला यद् भुंजीत भवान् । समयो यद् भुंजीत ।

तृज्याश्चार्हे ॥ १६० ॥ अर्हेऽर्थे धोस्तृ-

ज्या भवंति लिङ् च। भवान् खलु कन्यायाः वोढा। भवता खलु कन्या वोढव्या, वाह्या, वहनीया। भवान् कन्यां वहतु। अर्हो योग्य इत्यर्थः।

आवश्यकाधमर्ण्ये णिन् ॥१६१॥ आवश्यके आधमर्ण्ये च गम्यमाने धोर्णिन् स्यात्। अवश्यंकारी। अवश्यंलावी। शतंदायी। निष्कंदायी।

ण्याः ॥ १६२ ॥ आवश्यकाधमर्ण्ययोर्गम्यमानयोर्धोर्ण्याः भवंति। भवता खलु धर्मोऽवश्यं कर्तव्यः, करणीयः, कृत्यः, कार्यः। भवता खलु निष्को दातव्यः, दानीयः, देयः।

शकि लिङ् च ॥ १६३ ॥ शक्यऽर्थे धोर्लिङ् भवति ण्याश्च। भवान् खलु विद्यामधीयीत। भवता खलु विद्याऽध्येतव्या, अध्ययनीया। भवान् हि शक्तः।

***लोट् चाशिषि ॥ १६४॥** आशिष्यर्थे धोर्लोट् भवति लिङ् च। जयतात्। जयतां। जीयात्। जीयास्तां। आशिषि इति किं? जीवति पथ्याशी।

क्तिच्क्तौ खौ ॥ १६५ ॥ आशिष्यर्थे धोः क्तिच्क्तौ स्तः खौ। शम्यादिति शांतिः। भवतात् भूतिः। देवा एनं देयासुरिति देवदत्तः। देवा एनं शृण्वंत्विति देवश्रुतः।

माङि लुङ् ॥ १६६ ॥ माङि वाचि धोर्लुङ् भवति। माकार्षीरधर्मं। मा हार्षीः परस्वं।

सस्मे लङ् च ॥ १६७ ॥ स्मेन सह माङि वाचि धोर्लङ् भवति लुङ् च। मास्म क्रुध्यत्। मास्मक्रुधत्। मास्मकरोत्। मास्मकार्षीत्।

इति जैनेंद्रव्याकरणे शब्दार्णवचंद्रिकायां लघुवृत्तौ द्वितीयाध्यायस्य तृतीयःपादः।

चतुर्थः पादः।

—:o:—

धुयोगे त्याः ॥ १ ॥ धूनां योगे अयथाकालोक्ता अपि त्याः साधवो भवंति। विश्वदृश्वाऽस्य पुत्रो जनिता। कृतपुण्यः श्वो भविता। भाविकृत्यमासीत्। सुबंतमिहामुख्यस्य मिङंतस्य कालमनुवर्तते। तथाहि—विश्वदृश्वेति भूतकालो जनितेति भविष्यत्कालेन योज्यमानः साधुर्भवति। धोरधिकारे पुनर्धुग्रहणं जन्भ्वस्तिपरिग्रहार्थं। त्याधिकारे त्यवचनं त्यमात्रप्रतीत्यर्थं। गोमानासीत्। गोमान् भवितेति मत्वंतः संप्रतिकालोऽन्यकालेन साधुर्भवति।

***भृशाभीक्ष्ण्ये लोट् तस्य हिस्वौ वा तध्वमस्तथार्थे ॥ २ ॥** यथाविधो लोडंतस्यार्थस्तथार्थे कालाद्यस्मदाद्येकत्वाद्यभिव्यक्तिपरे कर्तृकर्मभावयुक्ते धुयोगे वाचि भृशाभीक्ष्ण्ययोरर्थयोर्वर्तमानाद्धोर्लोड् भवति सर्वलकारापवादः, तस्य लोटः हिस्वौ आदेशौ स्तः, तध्वमोस्तु वा भवतः। लुनीहि लुनीहि इत्येवाहं लुनामि। आवां लुनीवः। वयं लुनीमः। लुनीहि लुनीहि इत्येवं त्वं लुनासि। युवां लुनीथः। यूयं लुनीथ। तशब्दस्य वा—लुनीत लुनीत इत्येव यूयं लुनीथ। लुनीहि लुनीहीत्येवायं लुनाति। इमौ लुनीतः। इमे लुनंति। अधीष्वाधीष्वेत्येवाहमधीये। आवामधीवहे। वयमधीमहे। अधीष्वाधीष्वेत्येव त्वमधीषे। युवामधीयाथे। यूयमधीध्वे। ध्वमस्तु वा—अधीध्वमधीध्वमित्येव यूयमधीध्वे। अधीष्वाधीष्वेत्येवायमधीते। इमौ अधीयाते। इमे अधीयते। तथार्थे इति किं? लुनीहि लुनीहि इत्यनेन लूयते इति न भवति।

***प्रचये वा सामान्याऽर्थे ॥ ३ ॥** प्रचये समुच्चये गम्यमाने सामान्यार्थे धुयोगे वाचि लोट् स्यात् वा तस्य च हिस्वौ स्तः तध्वमोस्तु वा। क्रियाप्रचये—व्रीहीन् वप लुनीहि पुनीहि इत्येव यतते, चेष्टते, समीहते। पक्षे—व्रीहीन् वपति लुनाति पुनाति इत्येव यतते चेष्टते समीहते। कर्मप्रचये—ग्राममट वनमट गिरिमटेत्येवाटति,घटते, चेष्टते। पक्षे—ग्राममटति। वनमटति। गिरिमटति इत्येवायमटति। घटते। चेष्टते। कर्तृप्रचये—देवदत्तोऽद्धि, गुरुदत्तोऽद्धि, जिनदत्तोद्धि, इत्येव वयमोदनमद्मः। उभयप्रचये—ओदनं भुंक्ष्व, सक्तून् पिब, धानाः खाद इत्येवाभ्यवहरति। अभ्यवह्रियते। एवं—सूत्राण्यधीष्व वृत्तीरधीष्व भाष्याण्यधीष्व इत्येवाधीते पठति। पक्षे—सूत्राण्यधीते वृत्तीरधीते भाष्याण्यधीते इत्येवाधीते, पठति।

निषेधेऽलंखल्वोः क्त्वा ॥ ४ ॥ निषेधवाचिनोरलंखल्वोर्वाचोः क्त्वा वा स्यात्। अलं कृत्वा। खलु कृत्वा। अलं वाले रुदित्वा, रुदितेन, रोदनेन। निषेधे इति किं? अलंकारः।

***परावरे ॥५॥** धोःक्त्वा वा स्यात् परेऽवरे च गम्यमाने। पर्वतमतिक्रम्य नदी। नदीमप्राप्य पर्वतः। नदीपरावरः पर्वत इत्यर्थः। पर्वतातिक्रमेण नदी। नद्यप्राप्त्या पर्वतः।

***माङः स्वार्थे ॥ ६ ॥** माङः क्त्वा वा स्यात् स्वार्थे। अपमित्य याचते। याचित्वाऽपमयते।

परकालैककर्तृकात् ॥ ७ ॥ परः कालो यस्याः क्रियायाः सा परकाला तस्याः क्रियायाः एककर्तृकात् पूर्वकालाद्धोः क्त्वा वा स्यात्। आसित्वा भुंक्ते। भुक्त्वा व्रजति। वेत्यनुवर्तमानात् आसते भोक्तुमित्यपि। एककर्तृकादिति किं? भुक्तवति पात्रे दाता भुंक्ते।

***पूर्वाग्रेप्रथमाभीक्ष्ण्ये खमुञ् ॥ ८ ॥** पूर्वादौ वाचि आभीक्ष्ण्यार्थे च परकालैककर्तृकाद्धोः खमुञ् वा स्यात्। पूर्वं भोजं व्रजति। पूर्वं भुक्त्वा व्रजति। अग्रेभोजं। अग्रे भुक्त्वा। प्रथमं भोजं। प्रथमं भुक्त्वा व्रजति। आभीक्ष्ण्ये—भोजं भोजं व्रजति। भुक्त्वा भुक्त्वा व्रजति। पायं पायं, पत्विा पीत्वा व्रजति।

कृञोऽन्यथैवंकथमित्थंस्वनर्थात् ॥ ९ ॥ एषु वाक्षु कृञोऽनर्थात् एककर्तृकात् खमुञ् वा स्याद्। अन्यथाकारं भुंक्ते। एवंकारं, कथंकारं, इत्थंकारं भुंक्ते। अन्यथा कृत्वा। एवं कृत्वा। कथं कृत्वा। इत्थं कृत्वा। अनर्थादिति किं? अन्यथा कृत्वा शिरो भुंक्ते।

यथातथेऽसूयाप्रत्युक्तौ ॥१०॥ एतयोर्वाचोः कृञः खमुञ् वा स्यात् असूयाप्रत्युक्तौ गम्यमानायां। कथं भोक्ष्यते भवानिति पृष्टः असूयकः तं प्रत्याह यथाकारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये किं तवानेन। असूयाप्रत्युक्ताविति किं? यथाकृत्वाहं भोक्ष्ये तथा द्रक्ष्यसि।

*** कर्मण्याक्रोशे ॥ ११ ॥** कर्मणि वाचि कृञः खमुञ् वा भवति आक्रोशे गम्यमाने। चौरंकारमाक्रोशति। चौरं कृत्वा आक्रोशति।

स्वादुम्सु णम् ॥ १२ ॥ स्वाद्वर्थेषु कर्मसु वाक्षु कृञः णम् वा स्यात्। स्वादुंकारं भुंक्ते। स्वादुं कृत्वा। संपन्नंकारं। सम्पन्नं कृत्वा।

*** कार्त्स्न्ये दृश्विद्वयः ॥ १३ ॥** कर्मणि वाचि कार्त्स्न्ये गम्यमाने दृशेर्विद्वयश्च णम् भवति। साधुदर्शं प्रणमति। सर्वं साधुं प्रणमतीत्यर्थः। अतिथिवेदं भोजयति। यं वेत्ति, विंदति, विंत्ते वा सर्वं भोजयतीत्यर्थः। कार्त्स्न्ये इति किं? साधुं दृष्ट्वा प्रणमति। अतिथिं विदित्वा भोजयति।

*** यावति जीव्विदः ॥ १४ ॥** यावति वाचि जीवविदिभ्यां वा णम् स्यात् कार्त्स्न्ये गम्यमाने। यावज्जीवमधीते। यावद्वेदं गृह्णाति।

चर्मोदरे पूरेः ॥ १५ ॥ एतयोर्वाचोः पूरेर्वा णम् स्यात्। चर्मपूरमास्ते। उदरपूरं शेते। चर्मोदरं च पूरयित्वेत्यर्थः।

*** वर्षेयत्त्वेऽस्योत्खं वा ॥ १६ ॥** कर्मणि वाचि पूरयतेर्णम् स्यात्, अस्य पूरेरूकारस्य च खं वा वर्षेयत्त्वे वर्षप्रमाणे। गोष्पदप्रं वृष्टो देवः। गोष्पदपूरं। सीताप्रं। सीतापूरं वृष्टो देवः।

*** चेलाऽर्थे क्नोपेः ॥ १७ ॥** चेलाऽर्थे वाचि क्नोपयतेर्वा णम् स्यात् वर्षेयत्त्वे। चेलक्नोपं वृष्टो देवः। वस्त्रक्नोपं।

*** शुष्कचूर्णरूक्षे पिषस्तस्मिन् ॥ १८ ॥** एषु वाक्षु पिषेर्वाणम् स्यात् तस्मिन्नेव धौ अनुप्रयुक्ते। शुष्कपेषं पिनष्टि। शुष्कं पिनष्टीत्यर्थः। चूर्णपेषं पिनष्टि। रूक्षपेषं पिनष्टि।

जीवाकृते ग्रहकृः ॥ १९ ॥ जीवाकृतयोर्वाचोर्यथासंख्यं गृहिकृञ्भ्यां णम् स्यात् तस्मिन्नेवानुप्रयुक्ते। जीवग्राहं गृह्णाति। अकृतकारं करोति।

निमूले कषः ॥ २० ॥ निमूले कर्मणि वाचि कषेर्णम् स्यात्। निमूलकाषं कषयति।

समूले घ्नश्च ॥ २१ ॥ समूले वाचि हंतेः

१। णमूसन्निधाने मकारांतता निपात्यते।

कषेश्च णम् भवति वा तस्मिन्ननुप्रयुक्ते । समूलघातं हंति । समूलकाषं कषति ।

करणे ॥ २२ ॥ करणे वाचि हंतेर्णम् भवति तस्मिन्ननुप्रयोगे । पाणिघातं हंति । असिघातं ।

*** हस्ते वृद्ग्रहः ॥ २३ ॥** हस्तवाचिनि वाच्येभ्यो णम् वा भवति करणे तेष्वनुप्रयुक्तेषु । हस्तवर्त्तं वर्तते । करवर्तं । हस्तवर्तं वर्त्तयति । पाणिवर्त्तं । हस्तग्राहं गृह्णाति । बाहुग्राहं ।

*** स्वस्नेहे पुष्पिषः ॥ २४ ॥** स्ववाचिनि स्नेहे वाचिनि च करणे वाचि यथासंख्यं पुषिपिषिभ्यां णम् भवति तस्मिन्ननुप्रयोगे । स्वपोषं पुष्णाति । आत्मपोषं । गोपोषं । उदपेषं पिनष्टि । घृतपेषं ।

*** बंधः खौ ॥ २५ ॥** बंधेर्वा णम् स्यात् खौ तस्मिन्ननुप्रयोगे । अट्टालिकाबंधं बद्धः । मयूरिकाबंधं बद्धः । क्रौंचबंधं बद्धः । णमंताः बंधविशेषाणां संज्ञा एताः ।

*** आधारे ॥ २६ ॥** बध्नातेराधारे वाचि णम् भवति वा तस्मिन्ननुप्रयोगे । चक्रबंधं बद्धः । कूटबंधं बद्धः ।

कर्त्रोर्जीवपुरुषयोर्नश्वहोः ॥ २७ ॥ कर्तृवाचिनोर्जीवपुरुषयोर्वाचोर्यथासंख्यं नाशिवहिभ्यां णम् भवति तास्मिन्ननुप्रयोगे । जीवनाशं नश्यति । पुरुषवाहं वहति । कर्त्रोरिति किं ? जीवेन नष्टः । पुरुषं वहति ।

ऊर्ध्वे शुष्पूरः ॥ २८ ॥ ऊर्ध्वे कर्तृवाचिनि वाचि शुषिपूरिभ्यां णम् भवति तस्मिन्ननुप्रयोगे । ऊर्ध्वशोषं शुष्यति । ऊर्ध्वपूरं पूर्यते ।

कर्मणि चेवे ॥ २९ ॥ कर्मणि कर्तरि च वाचि इवाऽर्थे णम् भवति तस्मिन्नेव धावनुप्रयुक्ते । घृतनिधायं निहितं । घृतमिव निहितमित्यर्थः । जीवितरक्षं रक्षितः । कर्तरि–संभिन्ननाशं नश्यति । संभिन्न इव नश्यतीत्यर्थः । अक्रूरनाशं नष्टः ।

उपदंशो भायां ॥ ३० ॥ भांते वाचि उपपूर्वाद्दंशेर्णम् स्यात् वा । मूलकोपदंशं भुंक्ते, मूलकेनोपदंशं । मूलकेनोपदश्य भुंक्ते ।

*** हिंसार्थादेकाप्यात् ॥ ३१ ॥** हिंसार्थाद्धोरेकाप्याद्देककर्मकाद् भांते वाचि णम् स्यात् । दंडाघातं गाः कलयति । दंडेनाघातं । दंडाताडं गाः सादयति । दंडेनाताडं । हिंसार्थादिति किं ? चंदनेनानुलिप्य देवानाराधयति । एकाप्यादिति किं ? दंडेनाहत्य गोपालं गाः सादयति चौरः ।

*** ईपि चोपे पीड्रुत्कृषः ॥ ३२ ॥** ईपि भायां च वाचि पीडादेरुपपूर्वाद् णम् स्यात् । पार्श्वोपपीडं शेते, पार्श्वयोरुपपीडं । पार्श्वाभ्यामुपपीडं शेते, पार्श्वोपपीडं शेते । व्रजोपरोधं । व्रजे उपरोधं । व्रजोपरोधं, व्रजेनोपरोधं गाः स्थापयति । पाण्युपकर्षं, पाणौ उपकर्षं । पाण्युपकर्षं, पाणिनोपकर्षं धानाः पिनष्टि ।

प्रमाणासत्त्योः ॥ ३३ ॥ ईपि भायां च वाचि धोर्णम् भवति प्रमाणे आसत्तौ चार्थे । द्व्यंगुलोत्कर्षं गंडिकाश्छिनत्ति, द्व्यंगुले उत्कर्षं । द्व्यंगुलेनोत्कर्षं । केशग्राहं युध्यंते । केशेषु ग्राहं । केशैर्ग्राहं ।

त्वर्यपादाने ॥ ३४ ॥ त्वरायामुत्सुकत्वेऽर्थे धोः अपादाने वाचि णम् भवति । शय्योत्थायं धावति । शय्याया उत्थायं धावति । भ्राष्ट्रापकर्षं अपूपान् भक्षयति । भ्राष्ट्राद् अपकर्षं । त्वरीति किं ? आसनादुत्थाय गच्छति ।

इपि ॥ ३५ ॥ इपि वाचि धोस्त्वराऽर्थे णम् भवति । यष्टिग्राहं युध्यंते । यष्टीर्ग्राहं । पटापकर्षं । पटपमकर्षं ।

स्वांगेऽध्रुवे ॥ ३६ ॥ स्वांगे इबंते वाच्यध्रुवे धोर्वा णम् भवति । अक्षिनिकोचं जल्पति । आक्षिणी निकोचं । भ्रूक्षेपं, भ्रुवमुत्क्षेपं कथयति । अध्रुव इति किं ? शिरः समुत्क्षिप्य व्याहरति ।

सक्लेशे ॥ ३७ ॥ सक्लेशे स्वांगे इबंते वाचि धोर्णम् भवति । उरःप्रतिपेषं युध्यंते । उरांसि प्रतिपेषं । शिरश्छेदं, शिरांसि छेदं युध्यंते ।

विशपत्पदस्कंदां व्याप्यासेव्ये ॥ ३८ ॥ एभ्यो णम् भवति व्याप्यासेव्ययोरिबंतयोर्वाचोः । व्याप्ये–गेहानुप्रवेशमास्ते । गेहं गेहमनुप्रवेशं । गेहमनुप्रवेशमनुप्रवेशमास्ते । आसेव्ये-गेहानुप्रपातमास्ते । गेहंगेहमनुप्रपातं, गेहमनुप्रपातमनुप्रपातं । गेहानुप्रपा-

दमास्ते । गेहंगेहमनुप्रपादं । गेहमनुप्रपादमनुप्रपादं । गेहावस्कंदमास्ते । गेहंगेहमवस्कंदं । गेहमवस्कंदमवस्कंदं । व्याप्यासेव्य इति किं ? गेहमनुप्रविश्य भुंक्ते ।

* तृप्स्वोः कालेऽन्तरे ॥ ३९ ॥ तृष्यसिभ्यां अंतरे काले इबंते वाचि णम् भवति । द्व्यहात्यपतर्षं गाः पाययति । द्व्यहमपतर्षं । त्र्यहापतर्षं । त्र्यहमपतर्षं । द्व्यहात्यासं । द्व्यहमत्यासं । तृषस्वोरिति किं ? द्व्यहमुपोष्य भुंक्ते । काल इति किं ? योजनं तर्षित्वा गावः पिबंति । अंतर इति किं ? अहरत्यस्येनो गतः ।

* नाम्नि ग्रहादिशः ॥ ४० ॥ नाम्नि इबंते वाचि ग्रहेरादिशेश्च णम् स्यात् । नामग्राहमाचष्टे । नामानि ग्राहं । नामादेशमाकारयति । नामान्यादेशं ।

झार्वनिष्टोक्तौ कृः क्त्वाणम् ॥ ४१ ॥ झिसंज्ञके वाचि कृञः क्त्वाणमौ वा स्तोऽनिष्टोक्तौ गम्यमानायां । ब्राह्मण पुत्रस्ते जातः किं तर्हि वृषल नीचैष्कृत्याचष्टे । नीचैः कृत्वा । नीचैःकारं । उच्चैर्नाम प्रियमाख्येयं नीचैराख्यायमानमनिष्टं भवति । ब्राह्मण कन्या ते गर्भिणी जाता । किं तर्हि जाल्म उच्चैःकृत्याचष्टे । उच्चैष्कृत्वा । उच्चैःकारं । नीचैर्नामाप्रियमाख्येयं । उच्चैरुच्चार्यमाणमनिष्टं भवति ।

तिरश्च्यपवर्गे ॥ ४२ ॥ तिर्यक्शब्दे वाचि कृञः क्त्वाणमौ वा स्तः अपवर्गे समाप्तौ गम्यमाने । तिर्यक्कृत्य । तिर्यक्कृत्वा । तिर्यक्कारं गतः । अपवर्गे इति किं ? तिर्यक्कृत्वा काष्ठं गतः ।

* भुवोऽनूच्यानुलोम्ये ॥ ४३ ॥ अन्वक्छब्दे वाचि आनुलोम्ये आनुकूल्ये गम्यमाने भुवः क्त्वाणमौ वा स्तः । अन्वग्भूय । अन्वग्भूत्वा । अन्वग्भावं तिष्ठति ।

* तूष्णीमि ॥ ४४ ॥ अस्मिन् वाचि भुवः क्त्वाणमौ वा स्तः । तूष्णींभूय । तूष्णीं भूत्वा । तूष्णींभावमास्ते ।

१ । क्त्वाधिकारे क्त्वाग्रहणं "क्त्वा" इति वृत्तिविकल्पार्थं । भाधिकाराभावात्पूर्वत्र न वृत्तिः । क्त्वा चेति वक्तव्ये णम्ग्रहणमुत्तरत्रानुवृत्त्यर्थं ।

स्वांगे तस्त्ये कृभ्वोः ॥ ४५ ॥ तस्यांते स्वांगे वाचि कृभूभ्यां क्त्वाणमौ वा स्तः । मुखतःकृत्य । मुखतः कृत्वा । मुखतःकारं । पृष्ठतःकृत्य । पृष्ठतः कृत्वा । पृष्ठतःकारं । मुखतोभूय । मुखतो भूत्वा । मुखतोभावं । स्वांग इति किं ? सर्वतः कृत्वा ।

* धाणित्रनानानाच्वौ ॥ ४६ ॥ धाणिति धाध्यमुञ्धमुञेयां इत्येतेषां ग्रहणं । धाणंते च्व्यर्थे झिसंज्ञके विनानानाशब्दयोश्च वाचोस्ताभ्यां क्त्वाणमौ वा स्तः । अद्विधा द्विधा कृत्वा द्विधाकृत्य, द्विधा कृत्वा । द्विधाकारं । द्विधाभूय । द्विधा भूत्वा । द्विधाभावं । ऐकध्यं कृत्य । ऐकध्यंभूय । द्वैधंकृत्य । द्वैधंभूय । द्वेधाकृत्य । द्वेधाभूय । विनाकृत्य । विनाभूय । नानाकृत्य । नाना भूय ।

* समर्थास्त्यर्थशकधृषज्ञाग्लाघटरभलभक्रमसहार्हे तुम् ॥ ४७ ॥ समर्थोऽर्थेषु अस्त्यर्थेषु शकादिषु च वाक्षु धोस्तुम् स्यात् । समर्थो भोक्तुं । प्रभुर्भोक्तुं । पर्याप्तो भोक्तुं । अलंभोक्तुं । अस्ति भोक्तुं । भवति विद्यते च भोक्तुं । शक्नोति भोक्तुं । धृष्णोति भोक्तुं । जानाति भोक्तुं । ग्लायति भोक्तुं । घटते भोक्तुं । आरभते भोक्तुं । लभते भोक्तुं । प्रक्रमते भोक्तुं । सहते भोक्तुं । अर्हति भोक्तुं ।

* कृत्कर्तर्यझिः ॥ ४८ ॥ झिवर्जिताः कृतः कर्तरि कारके भवंति । कर्ता । कारकः । अझिरिति किं ? कर्तुं गच्छति ।

* संगतेऽजर्यं ॥ ४९ ॥ संगतेऽर्थे कर्तरि अजर्यमिति निपात्यते । न जीर्यतीत्यजर्यमार्यसंगतं । अजरोऽन्यत्र ।

* रुच्याव्यथ्यौ ॥ ५० ॥ एतौ निपात्यौ । रोचतेर्नञ्पूर्वाच्च व्यथः क्यप् । रोचतेऽसौ रुच्यो मोदकः । न व्यथत इत्यव्यथ्यो यतिः ।

* जन्भूगो यो वा ॥ ५१ ॥ एभ्यः कर्तरि यो वा स्यात् । जायतेऽसौ जन्यः । जन्यमनेन । भव्योऽयं । भव्यमनेन । गेयो माणवको गाथानां । गेयो माणवकेन पञ्चः ।

* **प्रोपाद् व्रस्थोऽनीयः ॥ ५२ ॥** प्रोपपूर्वाभ्यां व्रस्थाभ्यामनीयः कर्तरि वा स्यात् । प्रवचनीयो गुरुः शास्त्रस्य । प्रवचनीयं गुरुणा शास्त्रं । उपस्थानीयः शिष्यो गुरोः । उपस्थानीयः शिष्येण गुरुः ।

* **आपत्ल्वोण्यः ॥ ५३ ॥** आङ्पूर्वाभ्यां पतिप्लुभ्यां ण्यः कर्तरि वा स्यात् । आपात्योऽयं । आपात्यमनेन । आप्लाव्योऽयं । आप्लाव्यमनेन ।

* **श्लिषशीङ्स्थास्वसजन्रुहजृपारंभात्क्तः ॥ ५४ ॥** श्लिषादेः आरंभादादिकर्मार्थाच्च यः क्तः स कर्तरि वा स्यात् । आश्लिष्टः कन्यां भवान् । आश्लिष्टा कन्या भवता । आश्लिष्टं भवता । अतिशयितो गुरुं भवान् । अतिशयितो गुरुर्भवता । अतिशयितं च । उपस्थितो गुरुं भवान् । उपस्थितो गुरुस्त्वया । उपस्थितं च । उपासितो गुरुं भवान् । उपासितो गुरुर्भवता । उपासितं च । अनूषितो गुरुं भवान् । अनूषितो गुरुर्भवता । अनूषितं च । अनुजातो माणविकां माणवकः । अनुजाता माणविका माणविकेन । अनुजातं च । आरूढो वृक्षं भवान् । आरूढो वृक्षो भवता । आरूढं च । अनुजीर्णो वृषलीं भवान् । अनुजीर्णा वृषली भवता । अनुजीर्णं च । प्रकृतः कटं भवान् । प्रकृतः कटो भवता । प्रकृतं च । प्रभुक्तो भवानोदनं । प्रभुक्तः ओदनो भवता । प्रभुक्तं च । प्रासितो भवान् । आसितं भवता । प्रसुप्तो भवान् । प्रसुप्तं भवता ।

धिगत्यर्थाच्च ॥ ५५ ॥ धिसंज्ञकात् गत्यर्थाच्च क्तः कर्तरि वा भवति यथाप्राप्तं च । आसितो भवान् । आसितं भवता । गतो ग्रामं भवान् । गतो ग्रामो भवता । गतं च । यातो ग्रामं भवान् । यातो ग्रामो भवता । यातं च ।

* **आधारे चाद्यर्थाच्च ॥ ५६ ॥** अद्यर्थाद्धिगत्यर्थाच्चाधारे वा क्तः स्यात् । यथा प्राप्तं च । अस्मिन्निमे अदंति स्म—इदमेषां जग्धं । इदमेषां भुक्तं । इह एभिर्जग्ध ओदनः । इह एभिः पीतं मधु । भावे-इह जग्धमेभिः । धेः-इदमेषामासितं । इदमेषां शयितं । इह भवानासितः । आसितं भवता । इदमेषां गतं । इदमेषां यातं । गतो ग्रामं भवान् । गतो ग्रामो भवता । गतं भवता ।

लः कर्मणि च भावे च धेः ॥ ५७ ॥ सकर्मकाद्धोः लकाराः कर्मणि कर्तरि च भवंति धेर्भावे कर्तरि च । क्रियते कटः । करोति कटं । धेः-सुप्यते भवता । स्वपिति भवान् ।

तयोर्व्यक्तखार्थाः ॥ ५८ ॥ तयोः कर्मभावयोः व्यक्तखार्था भवंति । कर्तव्यः कटः । शयितव्यं भवता । कृतः कटः । शयितं भवता । सुकरः कटो भवता । ईषत्करः । सुपानं पयो भवता स्वाढ्यंभवं भवता ।

\+ **धिगम्यर्थवहनीह्रीकृषजिदंडेः कर्मणि लादिः ॥ ५९ ॥** मुख्ये कर्मणि धिप्रभृतीनां लादयः स्युः । शाय्यते माणवको मासं । आस्यते माणवको गोदोहं । गम्यते माणवको ग्रामं । उह्यते भारो ग्रामं । नीयते अजा ग्रामं । ह्रियते भारो ग्रामं । कृष्यते शाखा ग्रामं । जीयते दत्तः शतं । दंड्यते ग्रामः शतं । शयितव्यो माणवको मासं । इति तव्यादयोऽपि योज्याः ।

\+ **दुहादीनां गौणे ॥ ६० ॥** एषां गौणे कर्मणि लादयो भवंति । दुह्यते पयो गौः । याच्यते गां देवदत्तः । पृच्छ्यते धर्ममाचार्यः । दोग्धव्या, दोहनीया, दोह्या पयो गौः ।

\+ **ज्ञाद्यर्थं तयोः ॥ ६१ ॥** ज्ञादीनामद्यर्थानां च धूनां तयोः प्रधानाप्रधानकर्मणोर्लादयः स्युः । ज्ञाप्यते माणवको धर्मं । ज्ञाप्यते माणवकं धर्मः । बोध्यते माणवको ग्रंथं । माणवकं ग्रंथो वा । भोज्यते माणवकः ओदनं । माणवकमोदनो वा ।

* **घुरकेलिमास्वङ्कृष्टपच्याः कर्मकर्तरि ॥ ६२ ॥** घुरादयः कर्मकर्तरि भवंति । भंगुरं । भिदुरं काष्ठं । पचेलिमा माषाः । भिदेलिमानि काष्ठानि । पर्यास्थितां कुंडे स्वयमेव । कृष्टे पच्यंते कृष्टपच्याः शालयः स्वयमेव । पचेर्यलो निपात्यः ।

भीमादयोऽपादाने ॥ ६३ ॥ एते अपादाने कारके भवंति । बिभेत्यस्मात् भीमः । भीष्मः । भयानकः । चरुः । प्रपतनं । समुद्रः ।

*उणादयः संप्रदानाचान्यत्र ॥ ६४ ॥ उणादयः त्याः संप्रदानापादानाचान्यत्र कारकेषु भवंति । करोतीति कारुः। वृश्चति तं वृक्षः । ऋचंति तया ऋक् । वृत्तं तत्र वर्त्म ।

*लां ॥ ६५ ॥ लामिति नव लकाराः । लट् । लिट् । लुट् । लट् । लोट् । लङ् । लिङ् । लुङ् । लङ् । इति यदग्रे वक्ष्यामि तदेतेषामुत्सृष्ट-विशेषणानां भवतीत्यधिकृतं वेदितव्यं ।

मिब्वस्मस्सिप्थस्थतिप्तस्झीड्वहिम-हिथासाथांध्वमताताम्झङ् ॥ ६६ ॥ मिबादयो लस्यादेशाः भवंति । पचामि । पचावः । पचामः । पचसि । पचथः । पचथ । पचति । पचतः । पचंति । टितां दविषये रूपांतराणि वक्ष्यति । लिटो मानां णशादींश्च । लुट्—पक्तास्मि । पक्तास्वः । पक्तास्मः । लृट्—वक्ष्यामि । वक्ष्यावः । वक्ष्यामः । लोटमग्रे वक्ष्यति ङितां मविषये च । लङ्—अपचे । अपचावहि । अपचामहि । अपचथाः । अपचेथां । अपचध्वं । अपचत । अपचेतां। अपचंत । लिङमग्रे वक्ष्यति । लुङ्—अपक्षि । अपक्ष्वहि । अपक्ष्महि । अपक्थाः । अपक्षाथां । अपग्ध्वं। अपक्त । अपक्षातां । अपक्षत । लृङ्—अपक्ष्ये । अपक्ष्यावहि । अपक्ष्यामहि ।

टिद्देटेरेः ॥ ६७ ॥ टितां लकाराणां दस्य टेरेत्त्वं स्यात् । पचे । पचावहे । पचामहे । लिट्-पेचे । पेचिवहे । पेचिमहे । लुट्—पक्ताहे । पक्तास्वहे । पक्तास्महे । लृट्—पक्ष्ये । पक्ष्यावहे । पक्ष्यामहे । लोट् वक्ष्यते ।

थासः सेः ॥ ६८ ॥ टितो लकारस्य थासः से इत्ययमादेशो भवति । पचसे । पेचिषे । पक्तासे । पक्ष्यसे ।

*लेस्तझस्यैशिरे ॥ ६९ ॥ टितो लेस्तझयोः एश् इरे इत्येतावादेशौ भवतः । पेचे । पेचिरे ।

*मानां णशवमथाथुसश्णशतुसुसः॥७०॥ टितो लेर्मानां णशादयो भवंति । पपाच । पेचिव । पेचिम । पेचिथ । पेचथुः । पेच । पपाच । पेचतुः । पेचुः ।

विदो लटो वा ॥ ७१ ॥ वेत्तेः परस्य लटो मानां णशादयो वा स्युः । वेद । विद्व । विद्म । वेत्थ । विदथुः । विद । वेद । विदतुः । विदुः । पक्षे—वेद्मि । विद्वः । विद्मः । वेत्सि । वित्थः । वित्थ । वेत्ति । वित्तः । विदंति ।

ब्रुव आहश्च ॥ ७२ ॥ ब्रुवः परस्य लटो मानां ते वा स्युः ब्रुवश्चाहादेशः तत्सन्निधाने । आत्थ । आहथुः । आह । आहतुः । आहुः । पक्षे—ब्रवीषि । ब्रूथः । ब्रवीति । ब्रूतः । ब्रुवंति ।

न थास्मदः ॥ ७३ ॥ ब्रुवः परस्य लटो मानां थस्यास्मदश्च ते न भवंति तत्संनियोगादाहश्च । ब्रूथ । ब्रवीमि । ब्रूवः । ब्रूमः ।

लोटो लङ्वत् ॥ ७४ ॥ लोटो लङ इव कार्यं स्यात् । पचाव । पचाम । पचत । पचंत । पचतां । ङितः सखं, मिप्थ्सुथतसोंऽततामिति च सिद्धं ।

एरुः ॥ ७५ ॥ लोटो मानां इकारस्योर्भवति । पचतु । नमंतु चंद्रप्रभेशं ।

*सेर्हिर्ङित् ॥ ७६ ॥ लोटः सेर्हिर्भवति ङिच्च । लुनीहि । आप्नुहि ।

मेर्निः ॥ ७७ ॥ लोटो मेर्निरादेशो भवति । पचानि । करवाणि ।

आमेतः ॥ ७८ ॥ लोट एकारस्य आम् भवति । पचेथां । पचतां । पचेतां । पचंतां ।

स्वो वाऽम् ॥ ७९ ॥ सकारवकाराभ्यां परस्य लोट एकारस्य व अम् इत्येतावादेशौ भवतः । पचस्व । पचध्वं ।

*टाव्रस्मदः ॥ ८० ॥ लोटोऽस्मदः टाव्र भवति । करवाणि । करवाव । करवाम । चिनवानि । चिनवाव । चिनवाम ।

एत ऐ ॥ ८१ ॥ लोटोऽस्मदः एकारस्य ऐत्वं भवति । करवै । करवावहै । करवामहै ।

ङितः सखं ॥ ८२ ॥ ङितां लकाराणामस्मदः सकारस्य खं स्यात् । अपचाव । अपचाम । पचेव । पचेम । अपाक्ष्व । अपाक्ष्म । अपक्ष्याव । अपक्ष्याम ।

एर्मे ॥ ८३ ॥ ङितां लकाराणां इकारस्य खं भवति मविषये । अपचः । अपचत् । अपचन् । पचेः । पचेत् । अपाक्षीः । अपाक्षीत् । अपक्ष्यः । अपक्ष्यत् । अपक्ष्यन् ।

***मिथस्थतसोऽमृंततताः ॥८४॥** ङितां लां मिबादीनां अमादय आदेशाः भवंति । अपचं । अपचतं । अपचत । अपचतां । एवं सर्वत्र ।

लेस्सीयुट् ॥ ८५ ॥ लिङादेशानां लेः सीयुड् भवति । पचेय । पचेवहि । पचेमहि । पक्षीय । पक्षीवहि । पक्षीमहि ।

***ङ्यासुण्मे ॥ ८६ ॥** लिङः ङ्यासुट् स्यात् मविषये । यजेयं । यजेव । यजेम । वच्याव । वच्याम । कुर्यां । कुर्याव । कुर्याम ।

किदाशिषि ॥ ८७ ॥ लिङो ङ्यासुट् किद् भवति आशिषि । उच्यासं । उच्यास्व । उच्यास्म । इज्यासं । इज्यास्व । इज्यास्म । जागर्यासं । जागर्यास्व । जागर्यास्म ।

रन्नज्झेटः ॥८८॥ लिङो झस्य इटश्च रन् अत् इत्येतावादेशौ भवतः । पचेरन् । पचेय । पक्षीरन् । पक्षीय ।

सुट् तथोः ॥ ८९ ॥ लिङस्तकारथकारयोः सुट् स्यात् । पक्षीष्ठाः । पक्षीयास्थां । पक्षीष्ट । पक्षीयास्तां ।

झेर्जुस् ॥ ९० ॥ लिङो झेर्जुस् भवति । कुर्युः । क्रियासुः ।

थवित्सेः ॥ ९१ ॥ एभ्यः परस्य झेर्जुस् स्यात्।अबीभयुः । अददुः । अजागरुः।अविदुः।अकार्षुः।

आतः ॥ ९२ ॥ आकारांतात्सेः परस्य झेर्जुस् स्यात् । अदुः । अधुः । अस्थुः । अगुः । नियमोऽयं—आत एव स्युवंतात् झेर्जुस् नान्यस्मात् । अभूवन् ।

लङो वा ॥ ९३ ॥ आतः परस्य लङो झेर्जुस् भवति वा । अयुः । अयान् । अवुः । अवान् ।

द्विषः ॥ ९४ ॥ द्विषः परस्य लङो झेर्जुस् वा स्यात् । अद्विषुः । अद्विषन् ।

मिङ्शिद्गः ॥ ९५ ॥ धोर्विहिता मिङः शितश्च त्या गसंज्ञका भवंति । मिङ्—भूयते । तरति । शित्—गच्छन् । यजमानः ।

शेषोऽग एव ॥ ९६ ॥ मिङ्शिद्भ्यामन्यः शेषः अगसंज्ञक एव भवति । भविता । भवितुं । भवितव्यं ।

लिट् ॥ ९७ ॥ लिट् अगसंज्ञो भवति । पेचिथ । शेकिथ ।

लिङाशिषि ॥ ९८ ॥ आशिषि लिङ् अगसंज्ञो भवति । भावे—जागरिषीष्ट । कर्मणि—पविषीष्ट । आशिषीति किं ? जागृयात् । जागृयातां ।

***तुह्योर्ङ्ताद्वा ॥ ९९ ॥** तुह्योराशिषि ङ्ताद्वा स्यात् । जीवतात् भवान् । जीवतु भवान् । जीवतात् त्वं । जीव त्वं । कुरुतात् । मृष्टात् ।

लुटोऽन्यस्य डारौरसः ॥ १०० ॥ लुटोऽन्यसंज्ञकत्य डारौरसो भवंति । श्रोता । श्रोतारौ । श्रोतारः । अध्येता । अध्येतारौ । अध्येतारः ।

इति जैनेंद्रव्याकरणे शब्दार्णवापरनामधेये
शब्दार्णवचंद्रिकानाम्नि लघुवृत्तौ
द्वितीयोऽध्यायः समाप्तः

अथ तृतीयोऽध्यायः

प्रथमःपादः ।

ङ्याम्मृदः ॥ १ ॥ ङ्यंतादाबंतान्मृदश्च वक्ष्यमाणास्त्या भवंतीत्येषोऽधिकारो वेदितव्यः आ इञ्विधेः । ङी इति स्वरूपग्रहणं । आबिति टाप्-डापोः सामान्यग्रहणं । मृदिति संज्ञानिर्देशः ।

स्वौजसमौट्शष्टाभ्याभिस्ङेभ्याभ्यस्-ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुप् ॥ २ ॥ ङ्याम्मृदः स्वादयो भवंति । गौरी । गौर्यौ । गौर्यः । गौरीं । गौर्यौ । गौरीः । गौर्या । गौरीभ्यां । गौरीभिः । गौर्यै । गौरीभ्यां । गौरीभ्यः । गौर्याः । गौरीभ्यां । गौरीभ्यः । गौर्याः । गौर्योः । गौरीणां । गौर्यां । गौर्योः । गौरीषु ॥ माला । माले । मालाः । मालां । माले । मालाः । मालया । मालाभ्यां । मालाभिः । मालायै । मालाभ्यां । मालाभ्यः । मालायाः । मालाभ्यां । मालाभ्यः । मालायाः । मालयोः । मालानां । मालायां । मालयोः । मालासु । एवं— दामा । दामे । दामाः । दृषद् । दृषदौ । दृषदः । दृषदं । दृषदौ । दृषदः । दृषदा । दृषद्भ्यां । दृषद्भिः । दृषदे । दृषद्भ्यां । दृषद्भ्यः । दृषदः । दृषद्भ्यां । दृषद्भ्यः । दृषदः । दृषदोः । दृषदां । दृषदि । दृषदोः । दृषत्सु ।

स्त्रियां ॥ ३ ॥ यदित ऊर्ध्वमनुक्रमिष्यामः तत्स्त्रियां वर्तमानान्मृदो भवतीत्यधिकारो वेदितव्यः । तत्रैवोदाहिष्यते ।

***अजाद्यतां टाप् ॥ ४ ॥** अजादीनामकारांतानां च स्त्रियां टाप् स्यात् । अजा । एलका । चटका । कोकिला । अतः—देवदत्ता । खट्वा । कारीषगंध्या । स्त्रियामिति किं ? अजः । देवदत्तः ।

***ङ्युगिदृन्नंचोः ॥ ५ ॥** उगितः ऋकारतान्नकारांतादंचत्यंताच्च ङी भवति । श्रेयसी । विदुषी । तत्रभवती । पचंती । कर्त्री । हर्त्री । राज्ञी । दंडिनी । प्राची । प्रतीची । उदीची । अपाची । धुष्वंचतेरेव उगितो नान्यस्मादिति । पर्णध्वत्कन्या ।

वनोऽहशो रश्च ॥ ६ ॥ अहशंताद्यो वन् तदंतात् ङी भवति रेफश्चांतादेशः । धीवरी । पीवरी । मेरुदृश्वरी । शर्वरी । अहश इति किं ? सहयुद्ध्वा स्त्री ।

नेल्स्वस्रादेः ॥ ७ ॥ इल्संज्ञकात् स्वस्रादेश्च यदुक्तं तन्न स्यात् । पंच कुमार्यः । सप्त रोहिण्यः । स्वसा । दुहिता । ननांदा । याता ।

मनो डाप् च ॥ ८ ॥ मन्नंतान्मृदः स्त्रियां डाप् स्यात् ङीनिषेधश्च । पामे । पामाः । पामानौ । पामानः । दामे । दामानौ ।

अनश्च बात् ॥ ९ ॥ अन्नंताद् बसान्मृदः स्त्रियां डाप् स्यात् न ङी च । सुधर्मे । सुधर्माणौ । सुपर्वे । सुपर्वाणौ । बादिति किं ? अतिपर्वणी यष्टिः ।

वोङ्खे ॥ १० ॥ अन्नंताद् बसात् उङ्खवतः वा डाप् भवति न ङी च । बहुराजे । बहुराजानौ । बहुराज्ञ्यौ । बहुधीवे । बहुधीवानौ । बहुधीवर्यौ । उङ्ख इति किं ? सुधर्मे । सुधर्माणौ । अन इति किं ? सुमत्स्या नदी ।

ङी खौ ॥ ११ ॥ अन्नंताद्बसात् ङी भवति खौ । अधिराज्ञी । सुराज्ञी ग्रामः ।

ऊध्नः ॥ १२ ॥ ऊधन्नंताद् बसात् ङी भवति । कुंडमिवोधो अस्याः-कुंडोध्नी । घटोध्नी ।

***दाम्नः स्येः ॥ १३ ॥** दामांताद् बसात् स्यिसंज्ञादेः ङी स्यात् । द्विदाम्नी । त्रिदाम्नी । स्येरिति किं ? उद्दामा वडवा । उद्दाम्नी वडवा ।

***हायनाद् वयसि ॥ १४ ॥** हायनांताद् बसात् स्यिसंज्ञादेर्ङी स्यात् वयसि गम्यमाने । द्विहायनी । त्रिहायणी वत्सा । वयसीति किं ? चतुर्हायना शाला ।

पादो वा ॥ १५ ॥ पादंताद् बसात् स्त्रियां वा ङी स्यात् । द्विपदी । द्विपात् । त्रिपदी । त्रिपात् ।

टाबृचि ॥ १६ ॥ पादंतान्मृत्संज्ञकात् टाप्

स्यात् ऋच्यभिधेयायां । द्विपदा, त्रिपदा ऋक् । ऋचीति किं ? द्विपदी स्त्री ।

अनीचः ॥ १७ ॥ यदितोऽग्रे वक्ष्यामः तदनीचो वेदितव्यं । वक्ष्यति–इञटिड्ढादि । कुरुचरी । अनीच इति किं ? बहुकुरुचरा ।

***इञटिड्ढाणञठणठञः ॥ १८ ॥** एभ्यः स्त्रियां ङी स्यात् । सौतंगमी नगरी । मद्रचरी । सौपर्णेयी । कुंभकारी । औत्सी । लाक्षिकी । पारायणिकी ।

***यञोऽषावटात् ॥ १९ ॥** यञंतान्मृदः स्त्रियां ङी स्यात् षकारांतादवटाच्च परं यङं विहाय । गार्गी । वात्सी । अषावटादिति किं ? गौकक्ष्या । आवटया ।

फट् ॥ २० ॥ यञंताद् फट् स्यात् । गार्ग्यायणी । पौतिमाष्यायणी । आवट्यायनी ।

लोहितादिशकलांतात् ॥ २१ ॥ लोहितादिभ्यः शकलपर्यंतेभ्यः फट् स्यात् । लौहित्यायनी । शाशित्यायनी । शाकल्यायनी । लोहितादिः गर्गाद्यंतर्गणः ।

कौरव्यासुरिमांडूकात् ॥ २२ ॥ एभ्यः फट् भवति । कौरव्यायणी । आसुरायणी । मांडूकायनी ।

गौरादिभ्यः ॥ २३ ॥ एभ्यः स्त्रियां ङी स्यात् । गौरी । मत्सी । मानुषी ।

वयस्यनंत्ये ॥ २४ ॥ वयसि अनंत्ये वर्तमानान्मृदः स्त्रियां ङी स्यात् । कुमारी । किशोरी । बर्करी । अनंत्य इति किं ? स्थविरा ।

रात् ॥ २५ ॥ रसंज्ञकान्मृदः स्त्रियां ङी भवति । पंचपूली । पंचतक्षी । दशखट्वी ।

परिमाणाद्धदुपि ॥ २६ ॥ परिमाणांतात् राद् हृदुपि सति ङी स्यात् । द्वाभ्यां कुडवाभ्यां क्रीता द्विकुडवी । त्रिकुडवी । द्व्याढकी । परिमाणादिति किं ? पंचाश्वा ।

न विस्ताचितकंबल्यात् ॥ २७ ॥ विस्ताद्यंताद् हृदुपि सति ङी न स्यात् । द्विविस्ता । त्रिविस्ता । द्व्याचिता । द्विकंबल्या ।

कांडात् क्षेत्रे ॥ २८ ॥ कांडात् रात् हृदुपि ङी न स्यात् क्षेत्रे । द्वे कांडे प्रमाणमस्याः द्विकांडा, त्रिकांडा क्षेत्रभक्तिः । क्षेत्र इति किं ? द्विकांडी रज्जुः ।

पुरुषात् प्रमाणे वा ॥ २९ ॥ पुरुषांतात् रात् प्रमाणे वा ङी स्यात् हृदुपि । द्वौ पुरुषौ प्रमाणमस्याः द्विपुरुषी । द्विपुरुषा । त्रिपुरुषी । त्रिपुरुषा खाता । प्रमाण इति किं ? द्विपुरुषा ।

गुणोक्तेरुतोऽखरुस्फोङः ॥ ३० ॥ गुणवचनान्मृदः खरुस्फोङवर्जितात् उकारांतात् वा ङी स्यात् । पटुः । पट्वी । मृदुः । मृद्वी । पृथुः । पृथ्वी । तनुः । तन्वी । गुणोक्तेरिति किं ? आखुरियं । उत इति किं ? शुचिः स्त्री । अखरुस्फोङः इति किं ? खरुरियं । पांडुरियं ।

बह्वादेः ॥ ३१ ॥ बह्वादिभ्यो वा ङी स्यात् स्त्रियां । बहुः । बह्वी । पद्धतिः । पद्धती । अंचतिः । अंचती ।

+ इतोऽक्तेः ॥ ३२ ॥ अक्त्यंतादिकारांताद् मृदः स्त्रियां वा ङी स्यात् । भूमिः । भूमी । अशनिः । अशनी । आत्मंभरिः । आत्मंभरी । अक्तेरिति किं ? कृतिः ।

+ चंद्रभागान्नद्यां ॥ ३३ ॥ चंद्रभागाद्वा ङी भवति नद्यां । चंद्रभागी, चंद्रभागा नदी । चंद्रभागान्या ।

***शोणश्यैतैतहरितभरतलोहिताद्वर्णात्तो नश्च ॥ ३४ ॥** शोणादेर्वर्णवाचकात् वा ङी स्यात् तत्संनिधाने तकारस्य च नकारः । शोणी । शोणा । श्येनी, श्येता । एनी, एता । हरिणी, हरिता । भरणी, भरता । लोहिनी, लोहिता । शोणादेरिति किं ? पीता ।

***क्नोऽसितपलितात् ॥ ३५ ॥** वर्णवाचिभ्यामसितपलिताभ्यां वा ङी स्यात् तकारस्यच । क्नादेशः । असिक्नी, असिता । पलिक्नी, पलिता

***कालशबलसारंगपिशंगपिंगलकल्माषात्**

॥ ३६ ॥ कालादेर्वर्णवाचिनो मृदः स्त्रियां ङी भवति। काली। शबली। सारंगी। पिशंगी। पिंगली। कल्माषी। वर्णादिति किं ? काला। शबला।

*** रोहिणरेवताद्भे** ॥ ३७ ॥ आभ्यां भे नक्षत्रे ङी स्यात्। रोहिणी। रेवती नक्षत्रं।

+ नीलात् प्राण्योषध्योः ॥ ३८ ॥ नीलात् ङी भवति प्राणिनि ओषधौ च। नीली गौः ओषधिश्च। नीला शाटी अन्यत्र।

+ खौ क्ताच्च ॥ ३९ ॥ क्तांतान्नीलाच्च स्त्रियां ङी वा स्यात् खौ। प्रवृद्धा च सा विलूना च प्रवृद्धविलूनी। प्रवृद्धविलूना। नीली। नीला।

केवलमामकभागधेयपापावरसमानार्यकृतसुमंगलभेषजात्[1] ॥ ४० ॥ एभ्यो ङी भवति खौ। केवली। मामकी। भागधेयी। पापी। अवरी। समानी। आर्यकृती। सुमंगली। भेषजी।

*** कुंडगोणस्थलभाजनागकुशकामुककबरकटात् पात्रावपनाकृत्रिमाश्राणास्थूलायसरिरंसुकेशवेशश्रोणौ** ॥ ४१ ॥ कुंडादिभ्यः पात्रादिष्वर्थेषु यथासंख्यं स्त्रियां ङी भवति। कुंडी पात्रं। गोणी-आवपनं। स्थली-अकृत्रिमा। भाजी श्राणा। नागी-स्थूला। कुशी--अयोविकारः। कामुकी-रिरंसुः। कबरी-केशवेशः। कटी-श्रोणी। अन्यत्र-कुंडा। गोणा। स्थला। भाजा। नागा। कुशा। कामुका। कबरा। कटा।

***क्षत्रियार्याद् वान्** ॥ ४२ ॥ आभ्यां स्त्रियां आन् ङो वा स्यात्। क्षत्रियाणी। क्षत्रिया। आर्याणी। आर्या।

***पुंयोगादज्येष्ठादिभ्यः** ॥ ४३ ॥ पुंयोगात् यः शब्दः स्त्रियां वर्तते तस्मात् ज्येष्ठादिवर्जितात् ङी भवति। उपाध्यायस्य भार्या उपाध्यायी। प्रष्ठी। महामात्री। पुंयोगादिति किं ? यज्ञदत्ता। अज्येष्ठादिभ्य इति किं ? ज्येष्ठा। कनिष्ठा। गोपालिका।

[1] । नास्य स्थाने सूत्रं वार्तिकं वा।

पूतक्रतुवृषाकप्यग्निकुसितकुसीदादैश्च ॥ ४४ ॥ एभ्यः पुंयोगात् ङी भवति ऐकारश्चांतादेशः। पूतक्रतायी। वृषाकपायी। अग्नायी। कुसितायी। कुसीदायी।

मनोरैच ॥ ४५ ॥ पुंयोगान्मनोः स्त्रियां ङी भवति ऐजंतादेशश्च। मनायी। मनावी।

*** मातुलाचार्योपाध्यायाद्वानुक् च** ॥ ४६ ॥ मातुलादेः पुंयोगात् स्त्रियां ङी भवत्यानुगागमोऽपि वा तत्संनिधाने। मातुली, मातुलानी, मातुला। आचार्यी, आचार्यानी, आचार्या। उपाध्यायी, उपाध्यायानी, उपाध्याया।

*** वरुणभवशर्वरुद्रेन्द्रमृडात्** ॥ ४७ ॥ एभ्यः पुंयोगात् ङी भवत्यानुग्च। वरुणानी। भवानी। शर्वाणी। रुद्राणी। इंद्राणी। मृडानी।

*** सूर्याद्देव्यां** ॥ ४८ ॥ सूर्यात् पुंयोगात् ङी भवत्यानुग् च देव्यां। सूर्याणी। सूरीत्यन्या।

+ टाप् ॥ ४९ ॥ सूर्याद् पुंयोगाद् टाप् स्यात् देव्यां। सूर्या देवी।

*** यवयवनाद् दुष्टलिपौ** ॥ ५० ॥ आभ्यां ङी भवत्यानुग् च दुष्टे लिपौ चार्थे। दुष्टो यवो यवानी। यवनानां लिपिर्यवनानी। अन्यत्र। यवा। यवना।

*** हिमारण्यादुरौ** ॥ ५१ ॥ आभ्यां ङी भवत्यानुग्च उरौ महत्यर्थे। उरु हिमं हिमानी। उर्वरण्यमरण्यानी। हिमा, अरण्यान्यत्र।

*** पतिवत्न्यंतर्वत्न्यविधवागर्भिणी** ॥ ५२ ॥ पतिवत्नी अंतर्वत्नी च निपात्यते अविधवा गर्भिणी चेत्। पतिरस्याः अस्तीति पतिवत्नी जीवत्पतिः। मतोर्वत्वं नुग्च ङ्यां। पतिमती पृथ्वीत्यन्यत्र। अंतरस्यामस्तीति अंतर्वत्नी गर्भिणी। मतोर्वत्वं नुग् च।

*** वा नः पत्यंतस्य** ॥ ५३ ॥ पतिशब्दांतस्य नादेशो भवति वा। दृढः पतिरस्याः दृढपत्नी। दृढपतिः। एवं-वृद्धपत्नी। स्थिरपत्नी। स्थूलपत्नी। दासपत्नी। ग्रामपत्नी।

सपत्न्यादौ ॥ ५४ ॥ सपत्न्यादिषु प-

तिशब्दस्य नादेशो भवति । समानः पतिरस्याः सपत्नी । एकपत्नी । वीरपत्नी ।

***करणात् क्रीतात् ॥ ५५ ॥** करणपूर्वात् क्रीतांतात् ङी स्यात् । वस्त्रेण क्रीयते स्म वस्त्रक्रीती। वसनक्रीती । करणादिति किं ?सुक्रीता ।

क्तादल्पे ॥ ५६ ॥ करणपूर्वात् क्तांतात् ङी भवत्यल्पेऽर्थे । अभ्रैर्विलिप्यते स्म अभ्रविलिप्ती द्यौः । सूपविलिप्ती पात्री । अल्पे इति किं? चंदनानुलिप्ता स्त्री ।

***जातेर्बादप्रतिपज्जन्माकृः ॥ ५७ ॥** जातिपूर्वात् क्तांतात् प्रतिपदादिवर्जितात् बसात् ङी स्यात् । शंखौ भिन्नौ अस्याः शंखभिन्नी । ऊरुछिन्नी । केशलूनी । जानुभग्नी । जातेरिति किं ? मासयाता । बादिति किं ? पादपातिता । अप्रतिपदादेरिति किं? दंतप्रतिपन्ना । दंतमिता । दंतजाता । दंतकृता ।

***पाणिगृहीत्यादिः पत्नी ॥ ५८ ॥** पाणिगृहीत्यादिङ्यंतो बसः साधुः स्यात् पत्नी वाच्या चेत् । पाणिर्गृहीतो यस्याः सा पाणिगृहीती । करगृहीती । पाण्यात्ती । पाणिगृहीताऽन्या ।

***वाऽवस्त्राऽस्वांगात् ॥ ५९ ॥** वस्त्रवर्जितादस्वांगजातिवाचिनः परात् क्तांतात् प्रतिपदादिवर्जिताद् बसात् वा ङी स्यात् । सांगरं जग्धमनया सांगरजग्धी। सांगरजग्धा। पलांडुभक्षिती। पलांडुभक्षिता। सुरापीती। सुरापीता। अवस्त्रास्वांगादिति किं? वस्त्रं छन्नमस्याः वस्त्रछन्ना । शंखभिन्नी ।

स्वांगान्नीचाऽस्फोडः ॥ ६० ॥ स्वांगान्नीचः स्फोड्वर्जितात् स्त्रियां ङी वा स्यात् । स्निग्धमुखी । स्निग्धमुखा । पृथुस्तनी । पृथुस्तना । दीर्घकेशी । दीर्घकेशा । स्वांगादिति किं ? बहुयवा । वाधिकारे पुनर्न्यग्ग्रहणं षार्थं । प्राप्तकेशी, प्राप्तकेशा लिक्षा । निष्केशी, निष्केशा यूका । अस्फोडः इति किं ? सुगुल्फा । कल्याणगुल्फा । चारुपार्श्वा ।

***नासिकोदरौष्ठजंघादंतकर्णशृंगांगजंगात्रकंठात् ॥ ६१ ॥** न्यग्भूतनासिकाद्यंतात् स्त्रियां ङी वा स्यात्। दीर्घनासिकी। दीर्घनासिका। तनूदरी। तनूदरा । बिम्बोष्ठी । बिम्बोष्ठा । समजंघी । समजंघा । समदंती । समदंता । चारुकर्णी । चारुकर्णा। तीक्ष्णशृंगी । तीक्ष्णशृंगा । मृद्वंगी । मृद्वंगा । तनुगात्री । तनुगात्रा। कलकंठी । कलकंठा ।

+दीर्घजिह्वात् ॥ ६२ ॥ अस्माद् स्वांगवाचकाद् वा ङी स्यात् । दीर्घजिह्वा । दीर्घजिह्वी ।

+पुच्छात् ॥ ६३ ॥ पुच्छात् स्वांगाद् नीचः स्त्रियां वा ङी स्यात् । कल्याणपुच्छी। कल्याणपुच्छा ।

+मणिशरकबरविषात् ॥ ६४ ॥ मण्यादिपूर्वात् पुच्छान्नीचः ङी स्यात् । मणिः पुच्छे अस्याः मणिपुच्छी । शरपुच्छी । कबरं पुच्छमस्याः—कबरपुच्छी । विषपुच्छी ।

पक्षाच्चेवात् ॥६५॥ इवार्थात् पक्षांतात्पुच्छांताच्च नीचः स्त्रियां ङी स्यात् । उलूक इव पक्षौ यस्याः सा उलूकपक्षी शाला । उलूकपुच्छी सेना ।

न क्रोडादिबह्वज्भ्यः ॥ ६६ ॥ क्रोडाद्यंतात् बह्वजंताच्च मृदः स्त्रियां ङी न स्यात् । कल्याणी क्रोडाऽस्याः कल्याणक्रोडा । कल्याणखुरा । कल्याणबाला । बह्वज्भ्यः—पृथुजघना । दृढहृदया । महाललाटा ।

सहनञ्विद्यमानात् ॥ ६७ ॥ सहादिभ्यः परात् स्वांगात् ङी न स्यात् । सकेशा । सनासिका । अकेशा । अनासिका । विद्यमानकेशा । विद्यमाननासिका ।

नखमुखात् खौ ॥ ६८ ॥ नखमुखांतात् ङी न स्यात् खौ । सूर्पणखा । व्याघ्रणखा । गौरमुखा । श्लक्ष्णमुखा । खाविति किं ? सूर्पमिव नखा यस्याः सा सूर्पनखी । सूर्पनखा । चंद्रमुखी । चंद्रमुखा ।

***सख्यशिश्वीनार्यः ॥ ६९ ॥** एते शब्दा निपात्यंते । सखीयं । सखिशब्दाद्वा ङीत्ये प्राप्ते सखाद्वापि च नित्यो ङीत्यः । नास्याः शिशुरस्ति अशिश्वी । नारी स्त्री । नृनरयोः ङी नारादेशश्च ।

***जातेरयोङ्शूद्रात् ॥ ७० ॥** योङ्शूद्रवर्जितादतः जातिवाचिनः स्त्रियां ङी स्यात् । कुक्कुटी । कठी । मयूरी । शूकरी । जातेरिति किं ?

शुक्ला । अयोऽशूद्रादिति किं ? इभ्या । आर्या । क्षत्रिया । शूद्रा ।

* पाककर्णपर्णवालद्योः ॥ ७१ ॥ पाकादियुभूताज्जातिवाचिनः स्त्रियां ङी स्यात् । ओदनस्य पाक इव पाको यस्याः सा ओदनपाकी । मूषिककर्णी । शालिपर्णी । अश्ववाली । नियमोऽयं ये नित्यं स्त्रीविषया जातिवाचिनः शब्दास्तेषु ऐभ्य एव स्त्रियां ङी नान्यस्मात् । बलाका । मक्षिका ।

+ पुष्पादसत्कांडप्रांतशतैकांचः ॥ ७२ ॥ सदादिवर्जितात् पुष्पांतात् ङी भवति । शंखपुष्पी । सुवर्णपुष्पी । असदादेरिति किं ? सत्पुष्पा । कांडपुष्पा । प्रांतपुष्पा । शतपुष्पा । एकपुष्पा, प्राक्पुष्पा ।

+ फलादसंभस्त्रैकाजिनशणपिंडात् ॥ ७३ ॥ समादिवर्जितात् फलांतात् ङी भवति । वासीफली । पूगफली । असमादेरिति किं ? संफला । भस्त्राफला । एकफला । अजिनफला । शणफला । पिंडफला ।

+ मूलादनञः ॥ ७४ ॥ अनञ्पूर्वात् मूलांतात् ङी भवति । दर्भमूली । शीर्षमूली । अनञ इति किं ? अमूला ।

* नुरितः ॥ ७५ ॥ इकारांतात् नुर्मनुष्यस्य जातिवाचकात् ङी भवति । कुंती । अवंती । दाक्षी । औदमेयी । नुरिति किं ? तित्तिरिः । इत इति किं ? दरदा ।

* ऊरुतोऽयोः ॥ ७६ ॥ युशब्दांतवर्जितात् उकारांतात् नृजातिवाचिनः स्त्रियां ऊत्यो भवति । इक्ष्वाकूः । कुरूः । पर्शूः । उत इति किं ? चित् । अयोरिति किं ? अध्वर्युः ।

पंगोः ॥७७॥ पंगुशब्दाद् ऊर्भवतिः । पंगूः ।

+ श्वश्रूः ॥ ७८ ॥ श्वशुरशब्दस्योकाराकारयोः खं ऊश्चत्यो निपात्यः । श्वश्रूः ।

ऊरुद्योरिवे ॥ ७९ ॥ ऊरूत्तरपदादिवार्थे ऊर्भवति । करभस्य ऊरुरिव ऊरू यस्याः सा करभोरूः । कदलीस्तंभोरूः । करिकरवृत्तोरूः । इव इति किं ? वृत्तोरुः पुत्री ।

* सहसांहितसंहितशफलक्ष्मणवामादेः ॥ ८० सहादिपूर्वात् ऊरुद्योः ऊर्भवति । सहोरूः । सहितोरूः । संहितोरूः । शफोरूः । लक्ष्मणोरूः । वामोरूः ।

बाह्वंतकद्रूकमंडलोः खौ ॥ ८१ ॥ बाहुशब्दांतात् कद्रूकमंडलुभ्यां च ऊर्भवति खौ । भद्रबाहूः । मद्रबाहूः । कद्रूः । कमंडलूः । खाविति किं ? वृत्तबाहुः । कद्रुः । कमंडलुः ।

इतः ॥ ८२ ॥ इत इत्ययमधिकारो वेदितव्यः आ इचः । तत्रैवोदाहरिष्यामः ।

यूनस्तिः ॥ ८३ ॥ युवन्शब्दात्तिर्भवति स्त्रियां । युवतिः ।

ष्योऽक्षु रूपांत्ययोर्गोत्रेऽनार्षेऽणिञोः ।८४ अणिञौ यौ गोत्रेऽनार्षे विहितौ अक्षु मध्ये रूपांत्यौ तयोः ष्यो भवति । करीषगंधेरपत्यं स्त्री कारीषगंध्या । कौमुदगंध्या । दैवदत्त्या । रूपांत्ययोरिति किं ? औपगवी । गोत्र इति किं ? अहिच्छत्रे जाता आहिच्छत्री । अनार्ष इति किं ? वाशिष्ठी । अणिञोरिति किं ? आर्तभागी ।

* गोत्रांशाद् वृद्धे ॥ ८५ ॥ गोत्रांशात् गोत्रावयवात् वृद्धे अनार्षे विहितयोः अणिञोः ष्यो भवति । पुणिकस्यापत्यं वृद्धं स्त्री पौणिक्या । भौणिक्या ।

क्रोडादिभ्यः ॥ ८६ ॥ एभ्योऽणिञोः ष्यो भवति । क्रोडस्यापत्यं स्त्री क्रौड्या । व्याड्या, चौपयतोऽपत्यं स्त्री चौपयत्या । चैटयत्या ।

+ सूत्याभोज्ये युवतिक्षत्रिये ॥ ८७ ॥ सूत्याभोज्य इति सूतभोजशब्दौ स्त्रियां ष्यांतौ निपात्यौ युवतौ क्षत्रियायां च । सूत्या युवतिः । भोज्या क्षत्रिया । अन्यत्र-सूता । भोजा ।

* देवयज्ञशुचिवृक्षसत्यमुग्रकंठेविद्धाद्वा ।८८ एभ्यः परस्येञः स्त्रियां ष्यो वा स्यात् । देवयज्ञस्यापत्यं स्त्री दैवयज्ञ्या । दैवयज्ञी । शौचिवृक्ष्या । शौचिवृक्षी । सात्यमुग्र्या । सात्यमुग्री । कांठेविध्या, कांठेविद्धी ।

* वाद्यात् समर्थात् ॥ ८९ ॥ वेति च आद्यादिति समर्थादिति च एतत्त्रितयं अधिकृतं वादे-

तव्यं । वक्ष्यति—तस्यापत्यमिति । उपगोरपत्यं औपगवः । वाग्रहणाद् वाक्यमपि साधुः । आद्यादिति किं ? अपत्यशब्दात्त्योत्पत्तिर्माभूत् । समर्थादिति किं ? कंबल उपगोरपत्यं देवदत्तस्य ।

+ गोत्रघोर्गोत्रादिवाजिह्वाहरितकात्यात् ९० जिह्वाकात्यहरितकात्यवर्जितात् गोत्रघोः गोत्रादिव वक्ष्यमाणस्त्यो भवति । कंबलचारायणस्येमे कंबलचारायणीयाः । वृद्धकाश्यपीयाः । अजिह्वाहरितकात्यादिति किं ? जिह्वाचपलः कात्यः जिह्वाकात्यः । तस्येमे जैह्वाकाताः । हरितभक्षः कात्यः हरितकात्यः तस्येमे हारितकाताः—अणेवात्र न तु छः ।

+ गोर्योऽचि ॥ ९१ ॥ गोशब्दात् अजादित्यप्रसंगे यस्त्यो भवति । गोरपत्यं गव्यः । गौर्देवताऽस्य गव्यः । गवि भवं गव्यं । अचीति किं ? गोमयं ।

प्राग्द्रोरण् ॥ ९२ ॥ प्राग् द्रुशब्दात् येऽर्था वक्ष्यंते तेष्वण् अधिकृतो वेदितव्यः । वक्ष्यति—तेन रक्तं रागात् । कषायेण रक्तं वस्त्रं काषायं ।

अश्वपत्यादेः ॥ ९३ ॥ अश्वपत्यादिभ्यो वाऽण् भवति प्राग् द्रोरर्थेषु । आश्वपतः । गाणपतः । धानपतः ।

*** यमादित्यदित्यादित्यपतिघोर्ण्योऽणपवादे चाऽस्वे ॥ ९४ ॥** यमादेः पतिघोश्च प्राग्द्रवीये स्ववर्जितेऽर्थेऽपत्यादौ अणपवादविषये च ण्यः स्यात् । यमस्यापत्यं यमो देवता वाऽस्य-याम्यः । दितेरपत्यं दैत्यः । अदितेरपत्यं आदित्यः । आदित्यस्यापत्यं आदित्यः । वानस्पत्यः । वार्हस्पत्यः । सैनापत्यः । प्राजापत्यः । अणपवादे च—याम्यः । आदित्यः । अत इञ् प्राप्तः । अस्व इति किं ? उष्ट्रपतिर्नाम वाहनं तस्य स्वं—औष्ट्रपतं । पत्रादित्यण् ।

+ बहिषष्टीकण् च ॥ ९५ ॥ बहिःशब्दात् टीकण् स्यात् ण्यश्च । बहिर्जातो बाहीकः । बाह्यः । बाहीकी ।

+ ञः पृथिव्याः ॥ ९६ ॥ पृथिवीशब्दात् प्राग्द्रवीयेऽर्थे ञो भवति । पृथिव्याः अपत्यं तत्र भवो वा पार्थिवः । पार्थिवा ।

उत्सादेश्चाञ् ॥ ९७ ॥ एभ्यः पृथिव्याश्च प्राग्द्रवीयेऽञ् भवति । औत्सः । औदपानः । तरुणी—तारुणः । पार्थिवः । पार्थिवी ।

+ ग्रीष्मादछंदसि ॥ ९८ ॥ ग्रीष्मादञ् भवत्यछंदसि । ग्रीष्मे भवः ग्रैष्मः घर्मः । अछंदसीति किं ? ग्रैष्मो देवताऽस्याः ग्रैष्मी त्रिष्टुप् ।

+ वष्कयादसे ॥ ९९ ॥ वष्कयशब्दाद् प्राग्द्रवीयेऽर्थे अञ् भवत्यसे । वष्कयस्यापत्यं वाष्कयः । अस इति किं ? सौवष्कयिः ।

+ देवाद् यञ् च ॥१००॥ देवात् यञ् भवति अञ् च । दैव्यं । दैवं ।

*** कल्यग्नेर्ढण् ॥ १०१ ॥** आभ्यां ढण् स्यात् प्राग्द्रवीयेऽर्थे । कलिर्देवताऽस्य तत्र भवं तस्मादागतं वा कालेयं । आग्नेयं ।

स्थाम्नोऽत् ॥ १०२ ॥ स्थामन्शब्दांतात् प्राग्द्रवीयेऽर्थे अद्भवति । अश्वत्थाम्नोऽपत्यं अश्वत्थामः ।

+ लोम्नोऽपत्येषु ॥१०३॥ लोमन्शब्दांतात् अपत्येषु बहुषु अद्भवति । उडुलोम्नोऽपत्यानि बहूनि उडुलोमाः । सर्लोमाः । अपत्येष्विति किं ? औडुलोमिः ।

गोत्रेऽच्यनुप् ॥१०४॥ यस्कादेर्गोत्रे इत्यादिना य उबुक्तः तस्य प्राग्द्रवीयेऽर्थे अजादित्यविषये अनुप् भवति । यस्कानां छात्राः यास्कीयाः । शिवाद्यण उप् प्राप्तः । गार्गीयाः । आत्रेयीयाः । गर्गादियञः । अचीति किं ? गर्गेभ्य आगतं गर्गरूप्यं । गर्गमयं । प्राग्द्रोरिति किं ? गर्गेभ्यो हितं गर्गीयं ।

+ गर्गभार्गविका ॥१०५॥ अणोऽनुप् निपात्यते विवाहे वुन्यचि । गर्गाणां भृगूणां च यूनां विवाहो गर्गभार्गविका ।

रादुबनपत्ये ॥१०६॥ रादनुबंतात् परो योऽजादिह्रत् तस्योप् भवत्यपत्यवर्जिते प्राग्द्रवीयेऽर्थे । पंचसु गुरुषु भवः पंचगुरुर्नमस्कारः । दशधर्मो मोक्षः । द्वावनुयोगौ अधीते द्व्यनुयोगः । त्र्यनुयोगः । अनुप इति किं ? पंचसु कपालेषु संस्कृतं पंचकपालं । तस्येदं पांचकपालं । अनपत्य इति किं ? द्वयोर्देवदत्तयोरपत्यं द्वैदेवदत्तिः । त्रैदेवदत्तिः ।

यूनि ॥ १०७ ॥ यूनि यस्त्यस्तस्योप् भवति अजादित्यविषये । फांटाहृतस्यापत्यं वृद्धं फांटाहृतिः ।

तस्यापत्यं युवा फांटाहृतः। तस्य यूनः छात्राः फाटाहृताः। णस्योपि सति इञंतं शब्दरूपमिति इञः इत्यञ् भवति। भागवित्तेरपत्यं युवा भागवित्तिकः। तस्य छात्राः भागवित्ताः ठण उपि कृते-ऽत्राप्यंऽञ्।

फणफिञोर्वा ॥ १०८ ॥ फणः फिञश्च युवत्यस्य वोप् भवति प्राग्द्रवीयेऽजादौ त्ये विवक्षिते। गार्ग्यायणस्य यूनश्छात्राः गार्गीयाः। गार्ग्यायणीयाः। यास्कायनेः छात्राः यास्कीयाः। यास्कायनीयाः।

***स्त्रीपुंसान्नणट्स्नणट् वतः ॥ १०९ ॥** प्राग्वतो येऽर्थाः वक्ष्यंते तेषु स्त्रीपुंसशब्दाभ्यां नणट् स्नणटौ स्तः। स्त्रियाः अपत्यं, स्त्रीषु भवं, स्त्रीणां समूहः, स्त्रीभ्य आगतं, स्त्रीभ्यो हितं वा स्त्रैणं। पौंस्नं। स्त्रैणी। पौंस्नी। प्राग्वत इति किं? स्त्रीवत्। पुंवत्।

+त्वे वा ॥ ११० ॥ स्त्रीपुंसाभ्यां तौ वा स्तः त्वत्ये विषये। स्त्रियाः भावः स्त्रैणं, स्त्रीत्वं। पौंस्नं। पुंस्त्वं।

तस्यापत्यं ॥ १११ ॥ तस्येति तासमर्थात् अपत्यमित्येतस्मिन्नर्थे यथाविहितं त्यो भवति। उपगोरपत्यं औपगवः।आश्वपतः। सैनापत्यः। औत्सः।

पौत्रादि वृद्धं ॥ ११२ ॥ प्रथमस्यापत्यवतो यदपत्यं पौत्रादि तत् वृद्धसंज्ञं भवति। गर्गस्य पौत्राद्यपत्यं गार्ग्यः। पौत्रादीति किं? गार्गिः।

एकः ॥ ११३ ॥ वृद्धेऽपत्ये विवक्षिते आद्यप्रकृतेरेक एव त्यो भवति। गर्गस्यापत्यं गार्ग्यः तस्यापि गार्ग्यः।

ततो यूनि ॥ ११४ ॥ ततो वृद्धत्यांतात् यून्यपत्ये एक एव त्यो भवति। गर्गस्यापत्यं युवा गार्ग्यायणः। औपगवस्यापत्यं युवा औपगविः,

***सति वंश्ये युवाऽस्त्री ॥ ११५ ॥** वंश्ये पित्रादौ सति जीवति पौत्रादेर्यदपत्यं चतुर्थादिकं स्त्रीवर्जितं तद् युवसंज्ञं स्यात्। गर्गे सति गार्ग्यायणः। मृते—गार्ग्यः। अस्त्रीति किं? गार्ग्यस्यापत्यं स्त्री गार्गी।

***ज्यायोभ्रातरि ॥ ११६ ॥** भ्रातरि च ज्यायसि जीवति कनीयान् युवसंज्ञो भवति। गार्ग्यायणो लघुभ्राता।

+ सद्वा सपिंडेऽधिवयःस्थाने ॥ ११७ ॥ प्रथमप्रकृतेः पौत्रादेरपत्यं स्त्रीवर्जितं वयःस्थानाभ्यां अधिके सपिंडे जीवति सति सज्जीवदेव युवसंज्ञं वा स्यात्। गार्ग्यायणो गार्ग्यः। दाक्षायणः। दाक्षिः।

***आर्थोऽर्चाकुत्सयोः ॥ ११८ ॥** वृद्धस्यार्चायां यूनश्च कुत्सायां आर्थः संज्ञाव्यतिहारः स्याद् वा। गर्गस्यापत्यं वृद्धं अर्चितं तत्रभवान् गार्ग्यायणः। तत्रभवान् गार्ग्यः। गर्गस्यापत्यं युवा कुत्सितः गार्ग्यः, गार्ग्यायणो वा जाल्मः।

***इञतः ॥ ११९ ॥** अकारान्मृदः तासमर्थादपत्ये अनंतरे वृद्धे यूनि च इञ् भवति। अस्यापत्यं इः। आकंपनिः। आश्वग्रीविः।

***बाह्वादिभ्यो गोत्रे ॥ १२० ॥** एभ्यस्तासमर्थेभ्योऽपत्ये गोत्रेऽर्थे इञ्स्यात्। बाहविः। औपचाकविः। औदंचिः।

***वर्मणोऽचक्रात् ॥ १२१ ॥** चक्रवर्जितात् परात् वर्मन् शब्दाद् अपत्येऽर्थे इञ् भवति। जैनवर्मिः। अचक्रादिति किं? चाक्रवर्मणः।

+अजादिभ्यो धेनोः ॥ १२२ ॥ एभ्यःपरात् धेनुशब्दादपत्येऽर्थे इञ् भवति। आजधैनविः। आज धेनविः। बाष्कधैनविः। बाष्कधेनविः।

+ब्राह्मणाद्वा ॥ १२३ ॥ ब्राह्मणात् परो यो धेनुशब्दस्तदंतादपत्येऽर्थे वा इञ् स्याद्। ब्राह्मणधेनविः। ब्राह्मणधेनवः।

षाडिवाड्वलिसांभूय्यांभ्यामितौज्यौदिः ॥ १२४ ॥ एते अपत्यार्थे इञंताः निपात्याः। षण्णामपत्यं षाडिः। डत्वं निपात्यं। वाग्वादस्यापत्यं वाड्वलिः। वाचो डत्वं घोश्च वलभावः। संभूयसः सांभूयिः। अंभसः-आंभिः। अमितौजसः—आमितौजिः। सखमत्र। उदकस्य—औदिः। कखमत्र।

१ मृतेऽपि वंश्ये प्राप्त्यर्थमिदं। २ ययोः पूर्वः सप्तमः एकस्तावन्योन्यस्य सपिंडौ। ३ स्वस्यापत्यं संतानस्य स्वव्यपदेशनिमित्तं ऋषेरनृषेर्वाऽऽद्यः पुरुषो यस्तद्गमात्रं गोत्रं।

जैनी भाइयोंसे प्रार्थना।

यह ग्रंथमाला प्राचीन जैनग्रंथोंके जीर्णोद्धारार्थ व जैनधर्मके प्रचारार्थ प्रकाशित की जाती है। इसमें जो कुछ द्रव्यलाभ होगा वह भी धर्मप्रचार व परोपकारमें ही लगाया जायगा। इसकारण प्रत्येक धर्मात्मा उदार महाशयोंको चाहिये कि प्रथम तो एक एक दो दो ग्रंथ छपाकर जीर्णोद्धार करनेकेलिये अथवा अपने पिता आदिकी स्मृतिकेलिये द्रव्य प्रदान करें। दूसरे प्रत्येक मंदिरजीके शास्त्रभंडारमेंसे ग्राहक बनकर इन सब ग्रंथोंका संग्रह करके भगवानकी प्रतिमाकी तरह दर्शन पूजा व रक्षा करें अथवा स्वयं दानी ग्राहक (प्रचारक) बनकर अपने यहांके संस्कृत पढनेवाले विद्यार्थियोंको अथवा संस्कृतज्ञ अन्यमती विद्वानोंको अथवा पुस्तकालयको दान देकर सत्यार्थ पदार्थोंका प्रचार करें। शास्त्रदानी महाशयोंकेलिये ही हमने पांचवां नियम बनाया है।

प्रार्थी—पन्नालाल बाकलीवाल।

इस ग्रंथमालामें क्रमशः नीचे लिखे ग्रंथ छपेंगे।

जैनदर्शनग्रंथ।

ग्रंथनाम—	टीकाकार व ग्रंथकर्त्ताओंके नाम—
तत्त्वार्थाधिगममोक्षशास्त्रपर गंधहस्तमहाभाष्य (८४००० श्लोक)	श्रीमत्स्वामी समंतभद्राचार्य
,, श्लोकवार्तिकालंकार	स्याद्वादविद्यापति श्रीमद्विद्यानंदस्वामी

जैनसिद्धांतग्रंथ।

गोमट्टसार टीका	श्रीमदभयचंद्रसिद्धांतचक्रवर्ती
गोमट्टसार टीका	श्रीकेशव वर्णी
परमात्माप्रकाश सटीक	श्रीयोगींद्रदेव
नाटकत्रय सटीक	श्रीमदमृतचंद्रसूरिप्रभृति

जैनन्यायग्रंथ।

न्यायविनिश्चयालंकार	श्रीमद्भट्टाकलंकदेव
न्यायकुमुदचंद्रोदय	श्रीमत्प्रभाचंद्राचार्य
आप्तमीमांसालंकृति (अष्टसहस्री)	स्याद्वादविद्यापति श्रीमद्विद्यानंदस्वामी

जैनव्याकरणग्रंथ।

शब्दानुशासन (शाकटायन व्याकरण)	श्रुतकेवलिदेशीय श्रीमत् शाकटायनाचार्य
शब्दानुशासन अमोघवृत्तिसहित	अमोघाचार्य (?)
शब्दानुशासन चिंतामणिटीकासहित	यक्षवर्मा
शब्दार्णव (जैनेंद्रमहावृत्तिसहित)	श्रीमत्पूज्यपादस्वामी देवनंद्याचार्य
प्राकृतलक्षण-शब्दचिंतामणिः स्वोपज्ञटीकासह	शुभचंद्राचार्य

जैनसाहित्यग्रंथ।

अलंकारचिंतामणि सटीक	श्रीमदजितसेनाचार्य (वादीभसिंहसूरि)
विक्रांतकौरवीय नाटक	महाकवि हस्तिमल्ल
अंजनापवनंजय नाटक	,, ,,
मैथिलीपरिणयनाटक सुभद्रा नाटिका च	,, ,,
चतुःसंधान, सप्तसंधान, चतुर्विंशतिसंधान	श्रीमत्पंडितराज जगन्नाथ महाकवि

पौराणिक काव्यग्रंथ।

त्रिषष्टिशलाका महापुराण	(प्राकृत)	श्रीमत्पुष्पदंताचार्य
हरिवंशपुराण और पद्मपुराण	,,	,, ,,
पद्मपुराण (जैनरामायण १८,००० श्लोक)	संस्कृत	श्रीमद्रविषेणाचार्य
पांडवपुराण (जैनमहाभारत) पार्श्वपुराण	,,	महाकविश्रीमद्वादिराजसूरि

गणितज्योतिष ग्रंथ।

गणितसारसंग्रह		गणिताचार्यशिरोमणि श्रीवीराचार्य
त्रिलोकसार सटीक (प्राकृत)		श्रीनेमिचंद्राचार्य जैनसिद्धांतचक्रवर्ती
भद्रबाहु संहिता	,, सार्द्धद्वयद्वीपप्रज्ञप्ति	ज्योतिषाचार्य श्रीमद्भद्रबाहुस्वामी
जंबूद्वीपप्रज्ञप्ति	,,	श्रीपद्मनंद्याचार्य
चंद्रप्रज्ञप्ति और सूर्यप्रज्ञप्ति,,		श्रीमदमितगत्याचार्य इत्यादि २

C. P. Press, Benares City